www.thearyasamaj.org

# गीतासोपानम्

## प्रथमभागः



संस्कृतभारती
नवदेहली

www.thearyasamaj.org

## भवताम् अध्ययनस्य अनुकूलतायै संस्कृतभारत्या सञ्जीकृताः सन्ति अन्येऽपि बहवः ग्रन्थाः । यथा –

भाषाभ्यासाय –

▸ अभ्यासपुस्तकम् ▸ विभक्तिवल्लरी ▸ शतृशानजन्तमञ्जरी ▸ अभ्यासदर्शिनी
▸ सम्भाषणसोपानम् ▸ कालबोधिनी ▸ णत्वणिजन्तम् ▸ सन्देशसंस्कृतम्
▸ सम्भाषणसंस्कृतम् (ध्वनिमुद्रिकासहितम्) ▸ प्रयोगाः (ध्वनिमुद्रिकासहितम्)

भाषाज्ञानवर्धनाय –

▸ समासः ▸ सन्धिः ▸ कारकम् ▸ शुद्धिकौमुदी ▸ भाषापाकः ▸ इड्व्यवस्था

विचारशक्तिवर्धनाय –

▸ परिष्कारः ▸ संस्कृतभारती ▸ परिवर्तनम् ▸ सङ्क्रमणम्
▸ उत्तिष्ठत मा स्वप्त ▸ सप्तदशी ▸ पूर्णाङ्कं प्रति ▸ ज्ञानदीप्तिः

संस्कारवर्धनाय –

▸ सुगन्धः ▸ पञ्चतन्त्रकथाः ▸ शृण्वन्तु कथाम् एकाम्
▸ प्रेरणादीपः ▸ हे मनः ! समाश्वसितु

प्रेरणावर्धनाय –

▸ Pride of India (आङ्ग्लभाषया) ▸ भारतीयविज्ञानपरम्परा
▸ भुवमानीता भगवद्भाषा ▸ युगावतारः ।

मनोविनोदाय भाषाभ्यासाय च –

▸ सार्थः ▸ धर्मश्रीः ▸ ऋणविमुक्तिः ।

अभिनयाय –

▸ नवरूपकम् ▸ कविकोपकलापः ▸ जागरूको भव ।

श्रवणसुखाय भाषाभ्यासाय च ध्वनिमुद्रिकाः –

▸ गीतसंस्कृतम् ▸ गेयसंस्कृतम् ▸ शिशुसंस्कृतम् ▸ हितोपदेशकथाः
▸ श्रीकृष्णजननम् ▸ संस्कृतोज्जीवनम् ।

---

पुस्तकानि ध्वनिमुद्रिकाश्च प्राप्तुं भवतां केन्द्रसंयोजकस्य सम्पर्कं कुर्वन्तु ।

www.thearyasamaj.org

# गीतासोपानम्

प्रथमभागः

संस्कृतभारती
नवदेहली

www.thearyasamaj.org

प्रकाशनम्
**संस्कृतभारती,**
10196, माता मंदिर गली,
झण्डेवाला, नई दिल्ली - ११००५५

© प्रकाशकस्य एव

| | |
|---|---|
| मुखपुटविन्यासः | - सुधाकर दर्बे |
| आन्तरसज्जता | - शान्तला |
| साहाय्यम् | - महालक्ष्मीः, हरिणाक्षी, शिवकुमारः |
| प्रथममुद्रणम् | - मार्च - 2009, प्रतिकृतयः - 10,000 |
| द्वितीयमुद्रणम् | - अगस्त - 2009, प्रतिकृतयः - 10,000 |
| तृतीयमुद्रणम् | - जनवरी - 2013, प्रतिकृतयः - 5,000 |
| मूल्यम् | - रु. 150/- |
| मुद्रणम् | - प्रिण्ट्टक् इण्टरनेशनल,<br>बि. 36, डि.एस्.आय्.डि.सि कोम्प्लेक्स,<br>झिलमिल इण्डस्ट्रियल एरिया<br>नई दिल्ली - 98 |
| **ISBN** | **- 978-81-87276-44-4** |

**GEETASOPAANAM (PRATHAMABHAAGAH)**
A text book to learn Samskrit through Bhagavadgeetaa written by various authors.
Publisher - SAMSKRITA BHARATI - Mata Mandir Gali, Jhandewala, New Delhi - 110055. Ph - (011) 23517689.
E-mail:- samskritabharatidelhi@yahoo.co.in
Website - www.samskritabharati.in
Pages - 206+8 Price - Rs.150/- Third Edition - January 2013
Printed at - Printech International, B-36, DSIDC Complex, Jhilmill Industrial Area, New Delhi - 98

www.thearyasamaj.org

# गीतासोपानम्

## प्रथमभागः

**मार्गदर्शकसमितिः**

चमू कृष्णशास्त्री

डा. चान्दकिरण सलूजा

**सम्पादकसमितिः**

डा. विश्वासः

डा. को. न. पद्मकुमारः

प. नन्दकुमारः

दोर्बल प्रभाकरशर्मा

रामकृष्णः तद्दलसे

डा. सञ्जीवकुमाररायः

श्रीरामः

को. रणजित्

मुरलीकृष्णः

सुधीष्टकुमारमिश्रः

सचीनः कठाळे

**साहाय्यम्**

नरेन्द्रः

हिमाञ्जयः पालीवालः

जयप्रकाशः गौतमः

प्रतापसिंहः

---

संस्कृतभारती

नवदेहली

www.thearyasamaj.org

प्रियबन्धवः !

भगवतः श्रीकृष्णस्य मुखपद्मात् विनिःसृता श्रीमद्भगवद्गीता भारतीयसंस्कृतेः सारसर्वस्वभूता अस्ति। 'गीता अध्येतव्या' इति सर्वस्य अपि जनस्य इच्छा भवति एव। भगवता कृष्णेन गीता उक्ता अस्ति संस्कृतभाषया। संस्कृतज्ञानाभावे गीतायाः अवगमनं क्लेशाय एव। अतः गीतायाः माध्यमेनैव संस्कृतभाषायाः अभ्यासः यथा कर्तुं शक्यते तादृशः कश्चन पाठ्यक्रमः संस्कृतभारत्या कल्पितः अस्ति, यस्य च प्रथमभागः अस्ति एतत् गीतासोपानं नाम। तस्य गीतासोपानस्य प्रथमभागः एषः।

गीतायाः आधारेण सोपानक्रमेण भवतां संस्कृतभाषाज्ञानवर्धनाय कौशलविकासाय च अत्रत्याः पाठाः सज्जीकृताः सन्ति। अत्र प्रत्येकं पाठबिन्दोः उपस्थापनाय अभ्यासाय च गीतासम्बन्धीनि महाभारतसम्बन्धीनि वा वाक्यानि एव अधिकतया स्वीकृतानि सन्ति। पाठानां शीर्षकेषु अपि यावच्छक्यं गीतायां प्रयुक्तानि तत्तत्पाठबिन्दुसहितानि वाक्यानि एव उपयुक्तानि सन्ति। प्रतिपाठम् आरम्भे दत्तां सूचनां सावधानतया पठन्तु। ततः भवतां शिक्षकस्य मार्गदर्शनम् अनुसृत्य ताः तथैव पालयन्तु। आरम्भदिनेषु उच्चैः पठनं महते लाभाय भवति। अतः यत्र यत्र 'उच्चैः पठत' इति सूचना दत्ता अस्ति तत्र सर्वत्र अवश्यम् उच्चैः पठन्तु। 'वाक्यानि वदत' इति यत्र सूचना अस्ति तत्र निस्सङ्कोचतया तानि वाक्यानि वदन्तु। यदि भवतां देवनागरीलिप्याः अधिकः अभ्यासः नास्ति तर्हि तदर्थं संस्कृतभारत्या प्रकाशितानि अन्यानि पुस्तकानि स्वीकृत्य अभ्यासं कर्तुं शक्नुवन्ति। तादृशानाम् अन्येषां बहूनां पुस्तकानां विवरणाय भवतां केन्द्रशिक्षकं संयोजकं वा विचारयन्तु। पाठेषु अभ्यासेषु यदि यत्र कुत्रापि भवतां संशयः भवति तर्हि निस्सङ्कोचतया भवतां शिक्षकं पृष्ट्वा मार्गदर्शनं प्राप्नुवन्तु। प्रतिदिनं संस्कृताभ्यासाय स्वल्पं समयं रक्षन्तु, तस्मिन् समये तदेव कार्यं कुर्वन्तु। तेन भवताम् अध्ययनं व्यवस्थितं भविष्यति।

भवतां संस्कृताध्ययनं सफलं भवतु। गीताचार्यः सर्वान् अनुगृह्णातु इति आशास्य विरम्यते।

शुभं भवतु।

— **सम्पादकः**

www.thearyasamaj.org

# अनुक्रमणिका


| पाठसंख्या | पाठः | पृष्ठसंख्या |
|---|---|---|
| 1. | विद्धि माम् (मम /भवतः / भवत्याः) | 3 |
| 2. | पुरुषः सः (सः / सा /तत्, एषः / एषा / एतत्) | 4 |
| 3. | कृष्णः गोपिकाः च | 9 |
| 4. | अजन्ताः शब्दाः | 11 |
| 5. | को भवान् ? (अहम् / त्वम् / भवान् / भवती) | 14 |
| 6. | न करोति (आम् / न / किम् ?) | 18 |
| 7. | नास्ति बुद्धिः अयुक्तस्य (अस्ति / नास्ति) | 19 |
| 8. | तत्र का परिदेवना ? (अत्र/तत्र/ कुत्र ? अन्यत्र/सर्वत्र/एकत्र) | 20 |
| 9. | अहं सर्वस्य प्रभवः (षष्ठीविभक्तिः) | 21 |
| 10. | तस्य तस्याचला श्रद्धा (षष्ठीविभक्तिः – सर्वनामशब्दाः) | 24 |
| 11. | अथ पृष्ठतस्ते (पुरतः/पृष्ठतः/वामतः/दक्षिणतः/उपरि/अधः) | 32 |
| 12. | मा ते सङ्गोऽस्तु (आवश्यकम्/मास्तु/पर्याप्तम्/धन्यवादः) | 35 |
| 13. | न शोचति न काङ्क्षति (लट्लकारः) | 36 |
| 14. | संक्षेपगीता | 44 |
| 15. | भ्रातृमेलनम् (आत्मनेपदिधातूनां परिचयः – लट्लकारः) | 45 |
| 16. | उत्तिष्ठ, यशो लभस्व (लोट्लकारः) | 50 |
| 17. | पञ्चैतानि महाबाहो ! (संख्याः) | 58 |
| 18. | अभ्यासं करोतु (क्रियापदस्य विभज्य प्रयोगः) | 60 |
| 19. | स्वधर्मे निधनं श्रेयः (सप्तमीविभक्तिः) | 63 |
| 20. | कृष्णः कदा उत्तिष्ठति ? (कदा) | 72 |
| 21. | श्वः कस्य जयः ? (अद्य / श्वः / परश्वः ....) | 74 |
| 22. | किमकुर्वत सञ्जय ! (भूतकालः – अस्धातुः) | 77 |
| 23. | क्रोधपिशाचः (क्तवतुप्रत्ययान्तानि) | 87 |

www.thearyasamaj.org


| पाठसंख्या | पाठः | पृष्ठसंख्या |
|---|---|---|
| 24. | संशयात्मा विनश्यति (उपसर्गाः) | 90 |
| 25. | योगक्षेमं वहाम्यहम् (द्वितीयाविभक्तिः) | 98 |
| 26. | गीतोपदेशप्रसङ्गः | 107 |
| 27. | करिष्ये वचनं तव (लृट्लकारः) | 110 |
| 28. | तदा किं किं भविष्यति ? (लृट्लकारः) | 116 |
| 29. | गाण्डीवं स्रंसते हस्तात् (पञ्चमीविभक्तिः) | 119 |
| 30. | नगरदर्शनं कदा ? (तः – पर्यन्तम्) | 126 |
| 31. | कति वारं पठानि ? (वारम् / अद्य आरभ्य) | 127 |
| 32. | शनैः शनैः उपरमेत् (शीघ्रम् / मन्दम् / उच्चैः / शनैः) | 128 |
| 33. | त्यक्त्वोत्तिष्ठ परन्तप ! (क्त्वाप्रत्ययान्तानि) | 129 |
| 34. | अखण्डविश्वासः | 132 |
| 35. | अवलोक्य विश्वरूपम् (ल्यप्प्रत्ययान्तानि) | 134 |
| 36. | आत्मैव आत्मनो बन्धुः (च / अपि / एव/ इति / यत्) | 139 |
| 37. | दिव्यं ददामि ते चक्षुः (चतुर्थीविभक्तिः) | 147 |
| 38. | अन्धाय अनन्धाय देहि (अव्ययानि) | 157 |
| 39. | असङ्गशस्त्रेण दृढेन छित्त्वा (तृतीयाविभक्तिः) | 167 |
| 40. | न त्वं शोचितुम् अर्हसि (तुमुन्प्रत्ययान्तानि) | 177 |
| 41. | अतः अस्मि लोके (अतः) | 180 |
| 42. | हे कृष्ण ! हे माधव ! (सम्बोधनम्) | 183 |
| 43. | गर्वभङ्गः (अव्ययानि) | 185 |
| 44. | दशमस्त्वमसि (सप्तविभक्तयः) | 192 |
| | परिशिष्टम् | 197 |
| | उत्तराणि | 202 |

www.thearyasamaj.org

## कण्ठस्थीकरणविज्ञानम्

श्लोकानां मन्त्राणां वा कण्ठस्थीकरणस्य यत् भारतीयं विज्ञानम् अस्ति तत् विश्वे एव अत्यपूर्वम्। अन्यस्मिन् कस्मिन् अपि देशे एतादृशं स्मरणविज्ञानं नास्ति। अतः एतत् विश्वाय भारतस्य अनितरसाधारणं प्रदानम्। एतया कण्ठस्थीकरणपद्धत्या एव चतुर्णामपि वेदानां कण्ठस्थीकरणं कुर्वन्ति। अनया पद्धत्या एकवर्षाभ्यन्तरे, विना श्रमं, भगवद्गीतायाः कण्ठस्थीकरणं वयोभेदं विना सर्वैः अपि जनैः कर्तुं शक्यम्।

तत् अभ्यसनं त्रिषु सोपानेषु भवति – 1) गुरुः एकं पादम् एकवारं वदेत्, छात्रः तदेव द्विवारं वदेत् इति एवं पादचतुष्टयस्य अभ्यासः भवेत्। तदनन्तरं गुरुः तस्यैव श्लोकस्य पादद्वयं वदेत्। छात्रः द्विवारम् अनुवदेत् इति एवं पङ्क्तिद्वयस्य अभ्यासः भवेत्। तदनन्तरं गुरुः तं पूर्णं श्लोकं वदेत्, छात्रः द्विवारम् अनुवदेत् इति। एतेन प्रकारेण दशश्लोकानां गुरूच्चारणस्य अनूच्चारणं भवेत्, एकादशस्य श्लोकस्य पादद्वयस्य अपि (एकपङ्क्तेः) अनूच्चारणं भवेत्। 2) तत्पश्चात् छात्रः गृहे अनुकूले समये स्वतन्त्रतया तेषां दशानां श्लोकानां निरन्तरतया दशवारम् आवृत्तिं कुर्यात्, दशदिनानि यावत् प्रतिदिनम्। तथा आवृत्तिसमये दशमश्लोकानन्तरम् एकादशस्य श्लोकस्य एकां पङ्क्तिम् अपि वदेत्। अग्रिमदशश्लोकानाम् आवृत्तिसमये आरम्भः एकादशश्लोकस्य प्रथमपादतः एव करणीयः। एवं पूर्वम् अनन्तरं च इति द्विवारं कथनेन दशानां श्लोकगुच्छानां मध्ये परस्परसम्बन्धस्मरणं भवति। दशदिनानि दशवारम् इति शतवारम् आवृत्तिकरणेन ते श्लोकाः मुखोद्गताः भवन्ति। 3) तदनन्तरं सप्ताहे वा पक्षे वा तावत्पर्यन्तं पठितानां सर्वेषां श्लोकानाम् एकवारं मुखेन कथनं भवेत्।

यथासमयानुकूलं गुरूच्चारण–अनूच्चारणयोः दशश्लोकानां स्थाने पञ्चश्लोकाः अपि भवितुम् अर्हन्ति, पञ्चदश अपि वा। प्रतिदिनं दशवारम् इव दशदिनानि यावत् इत्येतद् अपि विंशतिवारं पञ्चदिनानि इत्यपि भवितुम् अर्हति। गुरोः अभावे छात्रः स्वयमेव अनया पद्धत्या पठित्वा अभ्यासं कर्तुं शक्नोति। अनेन क्रमेण 18 मासाभ्यन्तरे सम्पूर्णायाः गीतायाः कण्ठस्थीकरणाय प्रयत्नः भवेत्।

www.thearyasamaj.org

गीतां पठन्तु,

संस्कृतम् अभ्यस्यन्तु !

गीताप्रवेशः
द्वितीयभागः

गीताप्रवेशः
प्रथमभागः

गीतासोपानम्
द्वितीयभागः

गीतासोपानम्
प्रथमभागः

भवन्तः अत्र सन्ति !

www.thearyasamaj.org



# ध्यानश्लोकाः

ॐ पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्येमहाभारतम्।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीम्
अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥1॥

नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः ॥2॥

प्रपन्नपारिजाताय तोत्त्रवेत्रैकपाणये।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥3॥
वसुदेवसुतं देवं कंसचाणूरमर्दनम्।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥4॥

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला
शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला।
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः ॥5॥

पाराशर्यवचःसरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासम्बोधनाबोधितम्।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥6॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥7॥

www.thearyasamaj.org



## अथ गीतामाहात्म्यम्

गीताशास्त्रमिदं पुण्यं यः पठेत्प्रयतः पुमान् ।
विष्णोः पदमवाप्नोति भयशोकविवर्जितः ॥1॥

गीताध्ययनशीलस्य प्राणायामपरस्य च ।
नैव सन्ति हि पापानि पूर्वजन्मकृतानि च ॥2॥

मलनिर्मोचनं पुंसां जलस्नानं दिने दिने ।
सकृद् गीताम्भसि स्नानं संसारमलनाशनम् ॥3॥

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः ।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिःसृता ॥4॥

भारतामृतसर्वस्वं विष्णोर्वक्त्राद्विनिःसृतम् ।
गीतागङ्गोदकं पीत्वा पुनर्जन्म न विद्यते ॥5॥

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥6॥

एकं शास्त्रं देवकीपुत्रगीतमेको देवो देवकीपुत्र एव ।
एको मन्त्रस्तस्य नामानि यानि कर्माप्येकं तस्य देवस्य सेवा ॥7॥

## अथ ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानिगम्यम्
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैः
वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

* * *

www.thearyasamaj.org

# 1 विद्धि माम्



मम / भवतः / भवत्याः










उदाहरणं दृष्ट्वा रिक्तं स्थानं पूरयत –

| | | | |
|---|---|---|---|
| रमेशः – | भवतः नाम किम् ? | गोविन्दः – | ........ ........ ........ |
| रमेशः – | भवत्याः नाम किम् ? | लीला – | ........ ........ ........ |
| गीता – | ........ ........ ........? | गोविन्दः – | ........ ........ ........ |

www.thearyasamaj.org



# 2 पुरुषः सः

उच्चैः पठत, लिखत च –

सः / सा / तत् / एषः / एषा / एतत्




शिक्षकः / सैनिकः / नकुलः / द्रोणः
गजः / सिंहः / दीपः / सहोदरः

रथः / बाणः / आचार्यः / खड्गः
शिष्यः / चापः / रथिकः / वृक्षः

एषः शिक्षकः । ....... ............. । सः रथः । ....... ............. ।
एषः नकुलः । ....... ............. । सः आचार्यः । ....... ............. ।
....... .......... । ....... ............. । ....... ........ । ....... ............. ।
....... .......... । ....... .............। ....... ........ । ..... ............... ।






शिक्षिका / भक्ता / माला / सेना
द्विचक्रिका / लता / गुलिका / गीता

गायत्री / दूरवाणी / द्रौपदी / माद्री
लक्ष्मीः / घटी / पार्वती / सत्यवती

एषा शिक्षिका । ....... ................ । सा गायत्री । ....... ................ ।
एषा माला । ....... ................ । सा द्रौपदी । ....... ................ ।
............. । ....... ................ । ........... ।....... ................ ।
............. । ....... ................ । ........... । ....... ................ ।

www.thearyasamaj.org






तत् स्यन्दनम् ।



| वस्त्रम् / नारिकेलम् / द्वारम् / व्यजनम् | कन्दुकम् / दूरदर्शनम् / गाण्डीवम् / कवचम् |
| --- | --- |

एतत् वस्त्रम् । ....... ........... । तत् कन्दुकम् । ....... ........... ।

....... ........... । ....... ........... । ....... ........... । ....... ...........।

उच्चैः पठत, लिखत च –




एषः अश्वः । एतौ अश्वौ । एते अश्वाः ।

एषः अश्वः । एतौ अश्वौ । एते अश्वाः । स: सैनिकः । ...... ....। ...... ...... ।

एषः ग्रामः । ...... ...... । ...... ...... । स: रथः । ...... ......। ...... ...... ।

एषः सर्पः । ...... ...... । ...... ...... । स: यज्ञः । ...... ...... । ...... ...... ।

एषः शूरः । एतौ शूरौ । एते शूराः । स: योधः । ...... ......। ...... ...... ।

एषः कौरवः । ...... ...... । ...... ...... । स: वीरः । ...... ...... । ...... ...... ।

एषः पाण्डवः । ...... ...... । ...... ...... । स: महारथः । ...... महारथौ । ...... महारथाः ।

www.thearyasamaj.org



उच्चैः पठत, लिखत च –



का | के | काः



एषा गदा ।



एते गदे ।



एताः गदाः ।

| | | | | | |
|---|---|---|---|---|---|
| एषा वैद्या । | एते वैद्ये । | एताः वैद्याः । | सा नदी । | ते नद्यौ । | ताः नद्यः । |
| एषा भक्ता । | .... .... । | .... .... । | सा कूपी । | .... .... । | .... .... । |
| .... .... । | एते बालिके । | .... .... । | .... .... । | .... .... । | ताः सूच्यः । |
| .... .... । | .... .... । | एताः लताः । | .... .... । | ते जनन्यौ । | .... .... । |
| एषा सेना । | एते .... । | एताः .... । | सा चालनी | .... .... । | .... .... । |
| एषा भेरी । | .... .... । | .... .... । | .... .... । | ते भगिन्यौ । | .... .... । |

उच्चैः पठत, लिखत च –



किम् | के | कानि



एतत् स्यन्दनम् ।



एते स्यन्दने ।



एतानि स्यन्दनानि ।

| | | | | | |
|---|---|---|---|---|---|
| एतत् फलम् । | एते फले । | एतानि फलानि । | तत् नक्षत्रम् । | ते नक्षत्रे । | तानि नक्षत्राणि । |
| एतत् चक्रम् । | .... .... । | .... .... । | .... .... । | ते उपनेत्रे । | ...... ...... । |
| .... .... । | एते पुस्तके । | .... .... । | तत् पर्णम् । | .... .... । | ...... ...... । |
| .... .... । | .... .... । | एतानि यानानि । | तत् शस्त्रम् । | ते ...... । | तानि ........ । |
| एतत् मुखम् । | .... .... । | .... .... । | .... .... । | ते चित्रे । | ............ । |
| .... .... । | एते नगरे । | .... .... । | तत् बलम् । | .... ..... । | ...... ...... । |

www.thearyasamaj.org



उच्चैः पठत, जानीत च –

**अवधेयम्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| अकारान्तः पुंलिङ्गः | यादवः | यादवौ | यादवाः |
| आकारान्तः स्त्रीलिङ्गः | सेना | सेने | सेनाः |
| ईकारान्तः स्त्रीलिङ्गः | मही | मह्यौ | मह्यः |
| अकारान्तः नपुंसकलिङ्गः | सुखम् | सुखे | सुखानि |

## अभ्यासः

1. कोष्ठकयोः शब्दान् स्वीकृत्य यथोदाहरणं वाक्यानि रचयत–

एषः, एतौ, एते / सः, तौ, ते
एषा, एते, एताः / सा, ते, ताः
एतत्, एते, एतानि / तत्, ते, तानि

नर्तक्यः, गीतम्, आभरणानि, उपन्यासः, जनभाषा, पात्रे, कूप्यः, मापिके, प्रकोष्ठौ, कण्ठः, गुलिकाः, तालाः, स्नुषा, रथौ, सेवकाः, शङ्खाः, भेर्यः, लोकयानानि, मामकाः, ग्रामाः, पर्णानि, घट्यौ, श्लोकाः, अभ्यासाः, सूच्यः, शाटिका, आसनम्, माला, वस्त्रे, पाण्डवौ, द्रौपदेयाः, नायकः, हयाः, पितामहः, स्यन्दने, संस्कृतगृहम्

एषः उपन्यासः । ...................... । ...................... ।
...................... । ...................... । ...................... ।
...................... । ...................... । ...................... ।
...................... । ...................... । ...................... ।
...................... । ...................... । ...................... ।
...................... । ...................... । ...................... ।
...................... । ...................... । ...................... ।

www.thearyasamaj.org

...................... । ...................... । ...................... ।

...................... । ...................... । ...................... ।

...................... । ...................... । ...................... ।

यथोदाहरणं वाक्यानि रचयत –

| | | |
|---|---|---|
| कः | कौ | के |
| का | के | काः |
| किम् | के | कानि |

?

**शूराः, पुष्पम्, योधाः, शस्त्राणि, लते, रथौ, सेने, जाह्नवी, चक्रे, अश्वत्थः, वंशी, गजेन्द्रः, मकरौ, विद्याः, अयनानि ।**

के शूराः ? ...................... । ...................... ।

...................... । ...................... । ...................... ।

...................... । ...................... । ...................... ।

...................... । ...................... । ...................... ।

...................... । ...................... । ...................... ।

...................... । ...................... । ...................... ।

...................... । ...................... । ...................... ।

www.thearyasamaj.org

# 3 कृष्णः गोपिकाः च



एतत् चित्रं पश्यत, पार्श्वस्थानि वाक्यानि उच्चैः पठत च –




एतानि वाक्यानि उच्चैः पठत –

| | | |
|---|---|---|
| सः पार्थः । | तौ धनुर्धरौ । | ते सैनिकाः । |
| सा कुन्ती । | ते सैनिके । | ताः सख्यः । |
| तत् महाभारतम् । | ते काव्ये । | तानि पुराणानि । |

| | | |
|---|---|---|
| एषः कृष्णः । | एतौ वृक्षौ । | एते हंसाः । |
| एषा नदी । | एते लते । | एताः गोपिकाः । |
| एतत् जलम् । | एते फले । | एतानि कमलानि । |

www.thearyasamaj.org

## अभ्यासः

1. पाठं दृष्ट्वा रिक्तस्थानानि पूरयत –

| | | |
|---|---|---|
| ............ कृष्णः । | ............ वृक्षौ । | ............ लते । |
| ............ गोपिका । | ............ बर्हम् । | ............ पर्णानि । |
| ............ पर्णम् । | ............ फले । | ............ माला । |
| ............ हंसौ । | ............ वृक्षाः । | ............ वेण्यः । |
| ............ लता । | ............ गोपिकाः । | ............ गोपिके । |
| ............ शाखाः । | ............ वस्त्राणि । | ............ कमलानि । |

उच्चैः पठत, जानीत च –

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| पुं | एषः | एतौ | एते | सः | तौ | ते | कः | कौ | के |
| स्त्री | एषा | एते | एताः | सा | ते | ताः | का | के | काः |
| नपुं | एतत् | एते | एतानि | तत् | ते | तानि | किम् | के | कानि |

2. एतानि रूपाणि पठित्वा एतेषाम् उत्तराणां प्रश्नवाक्यानि लिखत –

यथा – एषः ग्रन्थालयः ।     एषः कः ?

| | | | |
|---|---|---|---|
| 1. एते छात्राः । | .............. ? | 2. एतत् मन्दिरम् । | .............. ? |
| 3. एताः सञ्चिकाः । | .............. ? | 4. एतौ सहोदरौ । | .............. ? |
| 5. एषा सखी । | .............. ? | 6. एते बान्धवाः । | .............. ? |
| 7. सः सचिवः । | .............. ? | 8. तानि पर्णानि । | .............. ? |
| 9. ते नक्षत्रे । | .............. ? | 10. तौ कार्यालयौ । | .............. ? |
| 11. ताः विज्ञापिकाः । | .............. ? | 12. सा वृद्धा । | .............. ? |

www.thearyasamaj.org



# 4 अजन्ताः शब्दाः

उच्चैः पठत, लिखत च –





| | | |
|---|---|---|
| एषः कविः। | एतौ कवी। | एते कवयः। |
| एषः ऋषिः। | .... ....। | .... ....। |
| .... ....। | .... यती। | .... ....। |





| | | |
|---|---|---|
| सः तरुः। | तौ तरू। | ते तरवः। |
| सः प्रभुः। | .... ....। | .... ....। |





| | | |
|---|---|---|
| भवान् योद्धा। | भवन्तौ योद्धारौ। | भवन्तः योद्धारः। |
| .... भोक्ता। | ...... ..........। | ...... ..........। |
| ...... ..........। | ...... ..........। | .......... श्रोतारः। |





| | | |
|---|---|---|
| एषा यष्टिः। | एते यष्टी। | एताः यष्टयः। |
| एषा तिथिः। | .... ....। | .... .......। |

www.thearyasamaj.org



सा धेनुः ।
.... .... ।



ते धेनू ।
.... .... ।



ताः धेनवः ।
.... रज्जवः ।

| स्वसा | स्वसारौ | स्वसारः |
|---|---|---|



एतत् अस्थि ।
एतत् अक्षि ।



एते अस्थिनी ।
एते ...... ।



एतानि अस्थीनि ।
एतानि ....... ।



तत् जानु ।
.... .... ।
.... .... ।



ते जानुनी ।
.... अम्बुनी ।
.... ....... ।



तानि जानूनि ।
.... .... ।
.... मधूनि ।

www.thearyasamaj.org



एतानि रूपाणि पुनःपुनः उच्चैः पठत, जानीत च –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| अकारान्तः पुंलिङ्गशब्दः | वेदः | वेदौ | वेदाः |
| ,, ,, | क्षत्रियः | क्षत्रियौ | क्षत्रियाः |
| ,, ,, | पुरुषः | पुरुषौ | पुरुषाः |
| इकारान्तः पुंलिङ्गशब्दः | कविः | कवी | कवयः |
| ,, ,, | मुनिः | मुनी | मुनयः |
| उकारान्तः पुंलिङ्गशब्दः | वायुः | वायू | वायवः |
| ,, ,, | गुरुः | गुरू | गुरवः |
| ऋकारान्तः पुंलिङ्गशब्दः | भ्राता | भ्रातरौ | भ्रातरः |
| ,, ,, | पिता | पितरौ | पितरः |
| ,, ,, | कर्ता | कर्तारौ | कर्तारः |
| आकारान्तः स्त्रीलिङ्गशब्दः | माला | माले | मालाः |
| ,, ,, | गदा | गदे | गदाः |
| इकारान्तः स्त्रीलिङ्गशब्दः | मतिः | मती | मतयः |
| ,, ,, | तिथिः | तिथी | तिथयः |
| ईकारान्तः स्त्रीलिङ्गशब्दः | नदी | नद्यौ | नद्यः |
| ,, ,, | भगिनी | भगिन्यौ | भगिन्यः |
| ,, ,, | श्रीः | श्रियौ | श्रियः |
| उकारान्तः स्त्रीलिङ्गशब्दः | धेनुः | धेनू | धेनवः |
| ,, ,, | रज्जुः | रज्जू | रज्जवः |
| ऊकारान्तः स्त्रीलिङ्गशब्दः | वधूः | वध्वौ | वध्वः |
| ,, ,, | चमूः | चम्वौ | चम्वः |
| ऋकारान्तः स्त्रीलिङ्गशब्दः | माता | मातरौ | मातरः |
| ,, ,, | स्वसा | स्वसारौ | स्वसारः |
| अकारान्तः नपुंसकलिङ्गशब्दः | अयनम् | अयने | अयनानि |
| इकारान्तः नपुंसकलिङ्गशब्दः | दधि | दधिनी | दधीनि |
| उकारान्तः नपुंसकलिङ्गशब्दः | वस्तु | वस्तुनी | वस्तूनि |

www.thearyasamaj.org



# 5 को भवान् ?

उच्चैः पठत, लिखत च –

| अहम् / त्वम् / भवान् / भवती |
|---|



अहं पाण्डवः ।



आवां पाण्डवौ ।



वयं पाण्डवाः ।





त्वं कुम्भकारः ।



युवां कुम्भकारौ ।



यूयं कुम्भकाराः ।





भवान् योद्धा ।



भवन्तौ योद्धारौ ।



भवन्तः योद्धारः ।





भवती गोपिका ।



भवत्यौ गोपिके ।



भवत्यः गोपिकाः ।

www.thearyasamaj.org



## अभ्यासः

1. उदाहरणं दृष्ट्वा रिक्तस्थानं पूरयत –

| | | |
|---|---|---|
| 1. भवान् सारथिः। | भवन्तौ सारथी। | भवन्तः सारथयः। |
| 2. ...... .......... । | भवन्तौ शिष्यौ। | ...... .......... । |
| 3. ...... .......... । | ...... .......... । | भवन्तः दातारः। |
| 4. भवती गायिका। | ...... .......... । | ...... .......... । |
| 5. ...... .......... । | भवत्यौ सख्यौ। | ...... .......... । |
| 6. ...... .......... । | ...... .......... । | भवत्यः मातरः। |
| 7. अहं सैनिकः। | आवां ........... । | वयं ........... । |
| 8. अहं ........ । | ........... आचार्यौ। | ...................। |
| 9. ........ अधिवक्ता। | ................... । | ...................। |
| 10. त्वं कौन्तेयः। | युवां ......... । | यूयं ............. । |
| 11. ................ । | ............गुरू। | ...................। |
| 12. त्वं ........ । | ........ नायकौ। | ...................। |
| 13. अहं ........... । | ...................। | ...........भक्ताः। |
| 14. ............... । | आवां शिष्यौ। | ...................। |
| 15. त्वं बुधः। | ...................। | ...................। |
| 16. ...................। | ...................। | यूयं सेनापतयः। |

2. गीतायाः एतत्संख्याकेषु श्लोकेषु 'अहम्' इति शब्दम् अन्विष्यत –

7.25, 8.4, 8.14, 9.4,

9.16, 9.29, 10.2, 10.20.

3. एतत्संख्याकेषु श्लोकेषु 'भवान्' इति शब्दम् अन्विष्यत –

1.8, 10.12, 11.31.

4. एतत्संख्याकेषु श्लोकेषु 'त्वम्' इति शब्दम् अन्विष्यत –

2.11, 2.12, 2.26, 2.27, 2.30, 2.33, 2.35.

www.thearyasamaj.org



5. यथोदाहरणं रिक्तस्थानानि पूरयत –

| | | |
|---|---|---|
| 1. भवान् सिद्धः। | भवन्तौ ......... । | भवन्तः सिद्धाः। |
| 2. ................ । | ......... नरौ । | ................ । |
| 3. ................ । | ................ । | ......... साधवः। |
| 4. भवान् श्रोता। | भवन्तौ श्रोतारौ। | भवन्तः श्रोतारः। |
| 5. भवान् ज्ञाता। | ................ । | ................ । |
| 6. ................ । | भवन्तौ दातारौ। | ................ । |
| 7. भवान् दाशरथिः। | ................ । | ................ । |
| 8. ................ । | भवन्तौ अतिथी। | ................ । |
| 9. ................ । | ................ । | भवन्तः गुरवः। |
| 10. ................ । | भवन्तौ पटू। | ................ । |
| 11. भवती महिला। | भवत्यौ ......... । | भवत्यः ......... । |
| 12. ................ । | ......... शिक्षिके। | ................ । |
| 13. ................ । | ................ । | भवत्यः नायिकाः। |
| 14. भवती भगिनी। | ................ । | ................ । |
| 15. भवती माता। | ................ । | ................ । |
| 16. ................ । | भवत्यौ वध्वौ। | ................ । |
| 17. त्वं भक्तः। | युवां ......... । | यूयं ......... । |
| 18. ................ । | युवाम् अर्चकौ। | ................ । |
| 19. त्वं कविः। | ................ । | ................ । |
| 20. ................ । | ................ । | यूयं स्थितप्रज्ञाः। |
| 21. ................ । | ................ । | तानि अस्थीनि। |
| 22. सा विभूतिः। | ................ । | ................ । |
| 23. ................ । | एते प्रमाथिनी। | ................ |
| 24. एषा सृतिः। | ................ । | ................ । |
| 25. ................ ? | कौ महर्षी ? | ................ ? |

www.thearyasamaj.org



6. उचितशब्दयोः संयोजनेन वाक्यं रचयत –

यथा – त्वं सुभद्रा।

1. ........................... ।
2. ........................... ।
3. ........................... ।
4. ........................... ।
5. ........................... ।
6. ........................... ।
7. ........................... ।
8. ........................... ।

| | |
|---|---|
| 1. त्वम् | शिक्षकाः |
| 2. आवाम् | सैनिकः |
| 3. वयम् | आचार्याः |
| 4. युवाम् | पार्थः |
| 5. अहम् | शिष्यौ |
| 6. भवान् | भ्रातरौ |
| 7. यूयम् | सुभद्रा |
| 8. भवन्तः | गोपिकाः |

7. कोष्ठके विद्यमानानां रूपाणां साहाय्येन रिक्तस्थानं पूरयत –

| | | |
|---|---|---|
| अहम् आवाम् वयम् | भवान् भवन्तौ भवन्तः | जिज्ञासुः कविः गुरुः लेखिका युवती |
| त्वम् युवाम् यूयम् | भवती भवत्यौ भवत्यः | गायिका आचार्यः सखी मित्रम् |

यथा – अहं जिज्ञासुः। आवां जिज्ञासू। वयं ................. ।

1. ......... गायिका। ..................... । ..................... ।
2. ......... आचार्यः। ..................... । ..................... ।
3. ......... युवती। ..................... । ..................... ।

**महात्मानः गीताविषये एवं वदन्ति –**

"यथा अहं जानामि, विश्वसाहित्यसङ्ग्रहे कोऽपि तादृशः अन्यः ग्रन्थः नास्ति यः भगवद्गीता इव सर्वश्रेष्ठः स्यात्। अयं धर्मनिधिः ग्रन्थः न केवलं हिन्दूनां कृते अपि तु समस्तमानवजातये अस्ति।"

*– मदनमोहनमालवीयः*

www.thearyasamaj.org



# 6 न करोति

उच्चैः पठत –

आम् / न / किम् ?



एषः भीष्मः किम् ?
आम्, एषः भीष्मः ।



सः अभिमन्युः किम् ?
आम्, सः अभिमन्युः ।



एषा सरस्वती किम् ?
न, एषा कालिका ।

तत् स्यन्दनं किम् ?
न, तत् विमानम् ।



## अभ्यासः

1. कोष्ठकस्थं चिह्नं दृष्ट्वा उचितानि वाक्यानि लिखत –

| | | |
|---|---|---|
| कृष्णः | योगेश्वरः ✓ | सामान्यः X |
| अर्जुनः | गदाधरः X | धनुर्धरः ✓ |
| धृतराष्ट्रः | दृष्टिमान् X | अन्धः ✓ |
| दुर्योधनः | सज्जनः X | दुष्टः ✓ |
| विदुरः | राजा X | मन्त्री ✓ |
| अब्दुल्कलामः | वैज्ञानिकः ✓ | सैनिकः X |

उदा – कृष्णः योगेश्वरः किम् ? आम्, कृष्णः योगेश्वरः । सः सामान्यः न ।

1. अर्जुनः गदाधरः किम् ? .................... । .................... ।
2. .................... । .................... । .................... ।
3. .................... । .................... । .................... ।
4. .................... । .................... । .................... ।
5. .................... । .................... । .................... ।

www.thearyasamaj.org



# 7 नास्ति बुद्धिः अयुक्तस्य

अस्ति / नास्ति



चापः अस्ति।
शरः नास्ति।

सिंहासनम् अस्ति।
महाराजः नास्ति।



1. अत्र चित्रद्वयम् अस्ति। प्रथमे चित्रे किं किम् अस्ति इति तस्य अधः लिखत। द्वितीयचित्रे तेषु किं किं नास्ति इति तस्य अधः लिखत –





| | | |
|---|---|---|
| यथा – | अर्जुनः अस्ति। | अर्जुनः नास्ति। |
| | 1. .......... .......... । | 1. .......... .......... । |
| | 2. .......... .......... । | 2. .......... .......... । |
| | 3. .......... .......... । | 3. .......... .......... । |
| | 4. .......... .......... । | 4. .......... .......... । |

## प्रहेलिका

अस्थि नास्ति शिरो नास्ति बाहुरस्ति निरङ्गुलिः।
नास्ति पादद्वयं गाढम् अङ्गमालिङ्गति स्वयम्॥

(किं तत् इति कथयतु यस्य अस्थि नास्ति, शिरः नास्ति, बाहुद्वयम् अस्ति, अङ्गुलिः नास्ति, पादौ न स्तः, परन्तु शरीरं दृढम् आलिङ्गति ?)

उत्तरम् – कञ्चुकम्

**कक्ष्याकार्यम्**

गीतायाः एतत्संख्याकेषु श्लोकेषु अस्ति / नास्ति इति पदम् अन्विष्यत –

2.66, 3.22, 4.31, 4.40, 6.16, 8.5.

www.thearyasamaj.org



# 8 तत्र का परिदेवना ?

पश्यत, उच्चैः पठत च –

अत्र / तत्र / कुत्र ? अन्यत्र / सर्वत्र / एकत्र





अर्जुनः कुत्र अस्ति ? भीष्मः कुत्र अस्ति ?

अर्जुनः अत्र अस्ति । भीष्मः तत्र अस्ति ।

भगवान् सर्वत्र अस्ति ।

कोष्ठकं दृष्ट्वा कः कुत्र अस्ति इति वदत –

पाण्डवपक्षः  कौरवपक्षः

| | |
|---|---|
| अभिमन्युः, युयुत्सुः, घटोत्कचः, द्रुपदः, विराटः | भीष्मः, कृपः, भगदत्तः, जयद्रथः, धृष्टकेतुः |

यथा – अभिमन्युः अत्र अस्ति । भीष्मः तत्र अस्ति ।

एतानि वाक्यानि उच्चैः पठत –

कुरुक्षेत्ररणरङ्गे पाण्डवाः एकत्र तिष्ठन्ति । कौरवाः एकत्र तिष्ठन्ति ।

महाभारतयुद्धसमये बलरामः अन्यत्र भवति ।

## अभ्यासः











रिक्तस्थानानि पूरयत –

1. स्यूतः अत्र अस्ति । 3. चषकः तत्र अस्ति । 5. घटी .................. ।
2. लेखनी ........... । 4. वायुः .................. । 6. पर्वतः .................. ।

www.thearyasamaj.org



# 9 अहं सर्वस्य प्रभवः

पश्यत, उच्चैः पठत च -

षष्ठीविभक्तिः



कृष्णः



बलरामः

कृष्णस्य भ्राता बलरामः।



गान्धारी धृतराष्ट्रः

गान्धार्याः पतिः धृतराष्ट्रः।



सुभद्रा अभिमन्युः

सुभद्रायाः पुत्रः अभिमन्युः।



महाभारतम् व्यासः

महाभारतस्य कर्ता व्यासः।

1. अर्जुनस्य गुरुः द्रोणः।
2. देशस्य नाम भारतम्।
3. अर्जुनस्य आयुधं गाण्डीवम्।
4. दुश्शलायाः पतिः जयद्रथः।
5. कौरवसेनायाः नायकः भीष्मः।
6. नद्याः नाम गङ्गा।
7. कादम्बर्याः रचयिता बाणभट्टः।
8. पुस्तकस्य नाम गीतासोपानम्।
9. रामायणस्य कर्ता वाल्मीकिः।
10. नगरस्य नाम इन्द्रप्रस्थम्।

## अवधेयम्

| | |
|---|---|
| कृष्णः | - कृष्णस्य |
| गीता | - गीतायाः |
| वाणी | - वाण्याः |
| चक्रम् | - चक्रस्य |

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| वृक्षः - | वृक्षस्य | वृक्षयोः | वृक्षाणाम् |
| सेना - | सेनायाः | सेनयोः | सेनानाम् |
| नारी - | नार्याः | नार्योः | नारीणाम् |
| ज्ञानम् - | ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |

www.thearyasamaj.org



## अभ्यासः

1. कोष्ठके विद्यमानानां शब्दानां साहाय्येन वाक्यानि लिखत –

| | | |
|---|---|---|
| कृष्णः | शङ्खः | पाञ्चजन्यः |
| युधिष्ठिरः | शङ्खः | अनन्तविजयः |
| नारदः | वीणा | महती |
| विष्णुः | गदा | कौमोदकी |
| शम्भुः | धनुः | पिनाकः |
| सरस्वती | वाहनम् | हंसः |

उदा – कृष्णस्य शङ्खः पाञ्चजन्यः ।

1. .................. ......... ........।
2. .................. ......... ........।
3. .................. ......... ........।
4. .................. ......... ........।
5. .................. ......... ........।

उच्चैः पठत –

1. मुनेः नाम व्यासः ।
2. पाण्डवानां ज्येष्ठः युधिष्ठिरः ।
3. कवीनां कृतयः काव्यानि ।
4. अभिमन्योः पिता अर्जुनः ।
5. सेनयोः उभयोः मध्ये रथं स्थापय ।
6. गीताध्यायानां प्रथमः अर्जुनविषादयोगः ।
7. पितुः आज्ञा पालनीया ।
8. भ्रात्रोः प्रिया भगिनी सुभद्रा ।
9. साधूनां परित्राणं करणीयम् ।
10. वारिणः संरक्षणं कर्तव्यम् ।

## अभ्यासः

2. कोष्ठके विद्यमानानां शब्दानाम् उपयोगेन वाक्यानि रचयत –

| | | | | | |
|---|---|---|---|---|---|
| आदित्याः | – | विष्णुः | देवाः | – | वासवः |
| पाण्डवाः | – | धनञ्जयः | नक्षत्राणि | – | शशी |
| वेदाः | – | सामवेदः | इन्द्रियाणि | – | मनः |
| रुद्राः | – | शङ्करः | भूतानि | – | चेतना |
| मासाः | – | मार्गशीर्षः | अक्षराणि | – | अकारः |

उदा – भगवान् आदित्यानां विष्णुः । देवानां वासवः ।

1. ...................... ।
2. ...................... ।
3. ...................... ।
4. ...................... ।
5. ...................... ।
6. ...................... ।
7. ...................... ।
8. ...................... ।

www.thearyasamaj.org



## अवधेयम्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| कविः – | कवेः | कव्योः | कवीनाम् |
| वसुः – | वसोः | वस्वोः | वसूनाम् |
| पिता – | पितुः | पित्रोः | पितॄणाम् |
| वारि – | वारिणः | वारिणोः | वारीणाम् |
| मधु – | मधुनः | मधुनोः | मधूनाम् |
| सेनानीः – | सेनान्यः | सेनान्योः | सेनानीनाम् |

## अभ्यासः

3. गीतायाः दशमस्य अध्यायस्य तत्तत्संख्याकं श्लोकं परिशील्य रिक्तस्थानानि पूरयत –

उदा – भगवान् सेनानीनां स्कन्दः । (10.24)

1. .............. भृगुः । (10.25)
2. .............. हिमालयः । (10.25)
3. .............. अश्वत्थः । (10.26)
4. .............. नारदः । (10.26)
5. .............. ऐरावतः । (10.27)
6. .............. वज्रम् । (10.28)
7. .............. वासुकिः । (10.28 )
8. .............. अनन्तः । (10.29)
9. .............. अर्यमा । (10.29)
10. .............. अध्यात्मविद्या ।(10.32)

उच्चैः पठत –

1. बुद्धेः भेदः न जननीयः ।
2. दनोः पुत्रः दानवः ।
3. गत्योः शुक्ला गतिः श्रेष्ठा ।
4. धृतीनां तामसी अधमा ।
5. चम्वाः नायकः धृष्टद्युम्नः ।
6. भ्रुवोः मध्ये प्राणः आवेशनीयः ।
7. वधूनां रक्षणं करणीयम् ।
8. मातुः कृपया जीवामि ।
9. गणेशः द्वयोः मात्रोः पुत्रः (द्वैमातुरः) ।
10. रामः मातॄणां प्रियः पुत्रः ।
11. तत्र द्वयोः पङ्क्त्योः मध्ये स्थानं नास्ति ।
12. संस्कृते सूक्तीनां महत्त्वम् अस्ति ।
13. रज्जोः अग्रभागं गृह्णातु ।
14. आञ्जनेयस्य हन्वोः प्रहारः आसीत् ।
15. मातॄणां वचनानि हिताय एव भवन्ति ।

www.thearyasamaj.org



# 10 तस्य तस्याचला श्रद्धा

**अवधेयम्**

| | एकवचनम् | द्विवचनम् | बहुवचनाम् |
|---|---|---|---|
| मतिः – | मत्याः / मतेः | मत्योः | मतीनाम् |
| तनुः – | तन्वाः / तनोः | तन्वोः | तनूनाम् |
| चमूः – | चम्वाः | चम्वोः | चमूनाम् |
| माता – | मातुः | मात्रोः | मातृणाम् |

पश्यत उच्चैः पठत च –

**षष्ठीविभक्तिः – सर्वनामशब्दाः**



एतस्य नाम विष्णुः ।



एतस्याः नाम लक्ष्मीः ।



एतस्य नाम महाभारतम् ।

एतत् सम्भाषणम् उच्चैः पठत –

(काचित् महाभारतप्रदर्शिनी । माता तां दर्शयन्ती पुत्रं विवृणोति ।)



माता – एषा महाभारतप्रदर्शिनी । एतस्याः दर्शनेन महाभारतं सम्यक् अवगन्तुं शक्यते ।

पुत्रः – एतस्य नाम किम् ?

माता – एतस्य नाम धृतराष्ट्रः ।

पुत्रः – एतस्याः नाम किम् ?

माता – एतस्याः नाम गान्धारी । एतयोः पुत्राः एव कौरवाः ।

पुत्रः – एतेषां पाण्डवानां च कः सम्बन्धः ?

माता – पाण्डवाः एतेषां दायादाः ।

पुत्रः – तेषाम् एतेषां मध्ये किं प्रवृत्तम् ?

माता – महत् युद्धं प्रवृत्तम् । तदेव महाभारतयुद्धम् । तत्र कृष्णः पाण्डवपक्षे आसीत् ।

पुत्रः – कृष्णः मम प्रियः देवः । सः तवापि प्रियः किम् ?

www.thearyasamaj.org



माता – अस्माकं देशे कृष्णः सर्वेषां प्रियः एव। अहं तस्य भक्ता।

रक्षकः – भोः, कृपया शनैः वदतु। युवयोः सम्भाषणेन अन्येषां विघ्नः भवेत्।

माता – तथैव भवतु। वत्स ! आवयोः विलम्बः जातः। चलतु, गच्छाव।

## अवधेयम्

| | | एकवचनम् | द्विवचीनम् | बहुवचनम् |
|---|---|---|---|---|
| एतद् | पुंलिङ्गे नपुंसकलिङ्गे च | एतस्य | एतयोः | एतेषाम् |
| | स्त्रीलिङ्गे | एतस्याः | एतयोः | एतासाम् |
| तद् | पुंलिङ्गे नपुंसकलिङ्गे च | तस्य | तयोः | तेषाम् |
| | स्त्रीलिङ्गे | तस्याः | तयोः | तासाम् |
| अस्मद् | त्रिषु लिङ्गेषु | मम | आवयोः | अस्माकम् |
| युष्मद् | त्रिषु लिङ्गेषु | तव | युवयोः | युष्माकम् |

## अभ्यासः

1. आवरणे विद्यमानयोः शब्दयोः साहाय्येन वाक्यानि रचयत –

उदा – वसुदेवः – देवकी (पतिः – पत्नी) वसुदेवस्य पत्नी देवकी, देवक्याः पतिः वसुदेवः।

1. बलरामः – दुर्योधनः (गुरुः – शिष्यः)

............................................................ ।

2. हरिः – लक्ष्मीः (पतिः–पत्नी)

............................................................ ।

3. जमदग्निः – रेणुका (पतिः–पत्नी)

............................................................ ।

4. अभिमन्युः – सुभद्रा (पुत्रः – माता)

............................................................ ।

2. आवरणे विद्यमानस्य शब्दस्य षष्ठीविभक्तिरूपेण रिक्तस्थानानि पूरयत –

उदा – भारतस्य राजधानी देहली। (भारतम्)

1. ............................ राजा धृतराष्ट्रः। (हास्तिनपुरम्)

2. ............................ पुत्रः कर्णः। (रविः)

www.thearyasamaj.org



3. ......................... ध्वनिः मधुरः । (वेणुः)
4. ......................... मनः प्रशान्तं भवति । (मुनिः)
5. ......................... छाया शीतला भवति । (लता)
6. अर्जुनः ......................... प्रियः । (गुरुः)
7. मनसस्तु परा बुद्धिः यो ........... परतस्तु सः । (बुद्धिः)
8. ......................... स्नेहः अतुलः । (माता)
9. ......................... मूल्यम् अधिकम् । (वस्तु)

3. यथोदाहरणं वाक्यानि रचयत –




उदा – वसुदेवस्य पुत्रः कृष्णः ।
1. ......................... ।
2. ......................... ।
3. ......................... ।
4. ......................... ।
5. ......................... ।
6. ......................... ।
7. ......................... ।

4. यथोदाहरणं वाक्यानि रचयत –

| | | | | |
|---|---|---|---|---|
| हिमालयः | ← | गिरिः | → | मेरुः |
| सन्देशः | ← | पत्रिका | → | चन्दमामा |
| गार्गी | ← | ब्रह्मवादिनी | → | मैत्रेयी |
| पणवः | ← | वाद्यम् | → | गोमुखः |

www.thearyasamaj.org



गिरेः नाम हिमालयः ।    गिरेः नाम मेरुः ।

1. ..................... ।    ..................... ।
2. ..................... ।    ..................... ।
3. ..................... ।    ..................... ।

5. यथोदाहरणं वाक्यानि रचयत –

उदा – (सेने) सेनयोः मध्ये युद्धं भवति।

1. (हस्तौ) ..................... संयोजनेन अञ्जलिः भवति।
2. सः (गुरू) ..................... आशीर्वादं प्राप्नोति।
3. (भ्रातरौ) ..................... कलहेन भगिनी खिन्ना भवति।
4. श्रीकृष्णः (सेने) ..................... मध्ये अर्जुनस्य रथं स्थापयति।
5. अद्य (कवी) ..................... सम्माननकार्यक्रमः अस्ति।
6. मम (भगिन्यौ) ..................... निवासः ग्रामे अस्ति।
7. कौरवाः–पिता–धृतराष्ट्रः   कौरवाणां पिता धृतराष्ट्रः।
8. पाण्डवाः – रक्षकः – कृष्णः ..................................................... ।
9. भारतीयाः – धर्मः – सनातनः ..................................................... ।
10. वयम् – भाषा – संस्कृतम् .....................................................।
11. नद्यः – जीवनं – परोपकारार्थम्..................................................... ।
12. भाषाः – जननी – संस्कृतम् ..................................................... ।

कक्ष्याकार्यम् – गीतायाः दशमाध्यायस्य 21–40 संख्याकान् श्लोकान् उच्चैः पठत। षष्ठीविभक्तिरूपाणि जानीत च।

6. आवरणे विद्यमानस्य शब्दस्य षष्ठीविभक्तिरूपेण रिक्तस्थानानि पूरयत –

1. मयूराः ..................... (मेघाः) गर्जनम् इच्छन्ति।
2. पण्डितः ..................... (नाटकानि) रचनां करोति।
3. बृहस्पतिः ..................... (देवाः) गुरुः अस्ति।
4. सज्जनाः ..................... (सूक्तयः) स्मरणं कुर्वन्ति।
5. गोपालकः ..................... (धेनवः) पालनं करोति।
6. पिता ..................... (वस्तूनि) गणनां करोति।
7. वयं ..................... (कार्यकर्तारः) वचनं शृणुमः।

www.thearyasamaj.org



8. अहं .................... (गुरवः) सेवां करोमि ।
9. सभायां .................... (वाद्यानि) ध्वनिः अधिकः अस्ति ।
10. माता .................... (अपत्यानि) पालनं करोति ।

7. कोष्ठकस्थैः उचितपदैः रिक्तस्थानानि पूरयत –

1. वयं प्रतिदिनं .................... जीवनचरित्रं पठामः ।
2. तेषां .................... कविताः रमणीयाः सन्ति ।
3. विवेकानन्दस्य .................... पठनेन स्फूर्तिः लभ्यते ।
4. तयोः .................... मैत्री जगत्प्रसिद्धा ।
5. .................... अनुसरणेन जीवने अनुशासनं भवति ।
6. .................... मध्ये सहकारभावः आवश्यकः ।
7. .................... ऐक्यं न सुलभम् ।
8. अद्यत्वे .................... जलं कलुषितं भवति ।
9. अश्वपालकः .................... पालनं करोति ।
10. .................... आज्ञा पालनीया ।

अश्वानाम्
नियमानाम्
महापुरुषाणाम्
गुरूणाम्
नदीनाम्
कवीनाम्
वचनानाम्
मित्रयोः
मतीनाम्
कार्यकर्तॄणाम्

8. बन्धुवाचकपदानि पठत, वाक्यानि पूरयत च –

| | | | |
|---|---|---|---|
| उदा– पितुः पिता | पितामहः | लवः – दशरथः | लवस्य पितामहः दशरथः । |
| 1. पितुः माता | पितामही | लवः – कौसल्या | ........................ । |
| 2. मातुः पिता | मातामहः | कुशः – जनकः | ........................ । |
| 3. मातुः माता | मातामही | कुशः – सुमेधा | ........................ । |
| 4. पुत्रस्य पुत्रः | पौत्रः | दशरथः – लवः | ........................ । |
| 5. पुत्र्याः पुत्रः | दौहित्रः | जनकः – कुशः | ........................ । |
| 6. सहोदरस्य पत्नी | भ्रातृजाया | लक्ष्मणः – सीता | ........................ । |
| 7. पत्युः सहोदरः | देवरः | सीता – लक्ष्मणः | ........................ । |
| 8. पत्न्याः सहोदरः | श्यालः | अर्जुनः – धृष्टद्युम्नः | ........................ । |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| 9. पत्युः भगिनी | ननान्दा | रुक्मिणी – सुभद्रा | ........................ । |
| 10. पितुः सहोदरः | पितृव्यः | अर्जुनः – धृतराष्ट्रः | ........................ । |
| 11. मातुः सहोदरः | मातुलः | दुर्योधनः – शकुनिः | ........................ । |
| 12. भगिन्याः पुत्रः | भागिनेयः | कंसः – कृष्णः | ........................ । |
| 13. पितृव्यस्य पत्नी | पितृव्या | अर्जुनः – गान्धारी | ........................ । |
| 14. मातुलस्य पत्नी | मातुलानी | अभिमन्युः – रुक्मिणी | ........................ । |

9. स्वस्य बान्धवानां सम्बन्धे 5 वाक्यानि रचयत –

................................................................................ ।
................................................................................ ।
................................................................................ ।
................................................................................ ।
................................................................................ ।

10. एतत् सुभाषितं पठत, रिक्तस्थानानि पूरयत च –

*ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो*
*ज्ञानस्योपशमो कुलस्य विनयो वित्तस्य पात्रे व्ययः ।*
*अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता*
*सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥*

उदा – ऐश्वर्यस्य विभूषणं सुजनता ।
1. .......... विभूषणं वाक्संयमः ।
2. .......... विभूषणम् उपशमः ।
3. .......... विभूषणं .......... ।
4. .......... विभूषणं पात्रे व्ययः ।
5. तपसः विभूषणं .......... ।
6. .......... विभूषणं क्षमा ।
7. .......... विभूषणं .......... ।
8. .......... विभूषणं शीलम् ।

www.thearyasamaj.org

11. चित्रे वृक्षस्य मूलं, फलं च दृष्ट्वा सङ्ख्याम् अनुसृत्य कस्य मूलस्य किं फलम् इति लिखत –




1. (अहङ्कारः) अहङ्कारस्य फलं क्रोधः ।
2. (क्षमा) ........................... ।
3. (उद्वेगः) ........................... ।
4. (आशा) ........................... ।
5. (भक्तिः) ........................... ।
6. (द्वेषः) ........................... ।
7. (शुचिता) ........................... ।
8. (परोपकारः) ........................... ।
9. (सेवा) ........................... ।
10. (परिश्रमः) ........................... ।

www.thearyasamaj.org



12. एतानि सुभाषितानि उच्चैः पठत –

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः ।
फलं पापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः ॥

(जनाः पुण्यस्य फलम् इच्छन्ति, किन्तु पुण्यकार्याणि कर्तुं न इच्छन्ति । पापस्य फलं न इच्छन्ति, किन्तु प्रयत्नेन पापकार्याणि कुर्वन्ति ।)

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ॥

(दानकरणम् एव हस्तस्य भूषणम् । सत्यभाषणम् एव कण्ठस्य भूषणम् । शास्त्रश्रवणम् एव कर्णस्य भूषणम् । अतः अन्यैः आभरणैः किमपि प्रयोजनं नास्ति ।)

पापानां शोधकं नित्यं परानन्दस्य बोधकम् ।
रोचकं चित्तवृत्तीनां भजध्वं नाम मङ्गलम् ॥

(भगवतः नाम पापानां शोधनं करोति । परानन्दं बोधयति । चित्तवृत्तीनां रोचकं भवति । अतः तत् सेवनीयम् ।)

13. उपरितनेषु श्लोकेषु विद्यमानानि षष्ठीविभक्तिरूपाणि अत्र लिखत –

........................ ........................ ........................
........................ ........................ ........................
........................ ........................ ........................

14. तत्तत्संख्याकं गीताश्लोकं परिशील्य एतेषां प्रश्नानाम् उत्तराणि एकेन शब्देन लिखत –

| | | |
|---|---|---|
| उदा – शङ्खघोषः केषां हृदयानि व्यदारयत् ? | – 1.19 | धार्तराष्ट्राणाम् । |
| 1. युद्धे कस्य प्रियचिकीर्षवः समागताः ? | – 1.23 | .................. |
| 2. वर्णसङ्करः केषां नरकाय भवति ? | – 1.42 | .................. |
| 3. नरके केषाम् अनियतं वासः भवति ? | – 1.44 | .................. |
| 4. कस्य मृत्युः ध्रुवः ? कस्य जन्म च ध्रुवम् ? | – 2.27 | .................. |
| 5. भगवान् कदा आत्मानं सृजति ? | – 4.7 | .................. |
| 6. कृष्णः कयोः मध्ये रथं स्थापयति ? | – 1.24 | .................. |

www.thearyasamaj.org



# 11 अथ पृष्ठतस्ते

उच्चैः पठत –

पुरतः / पृष्ठतः / वामतः / दक्षिणतः
उपरि / अधः / अन्तः



योगी शुचौ देशे आसनं प्रतिष्ठापयति। तत् आसनं न अत्युन्नतं, न वा अतिनीचं भवति। तस्य उपरि योगी कुशान् प्रसारयति। कुशानाम् उपरि कृष्णाजिनं स्थापयति। तदुपरि वस्त्रं स्थापयति। इदानीं वस्त्रस्य अधः कृष्णाजिनं, तस्य अधः कुशाः च भवन्ति। योगी तस्मिन् आसने उपविशति। सः दिशः न अवलोकते। वामतः दक्षिणतः पुरतः पृष्ठतः वापि दृष्टिं न प्रसारयति। मनः संयम्य अन्तः वर्तमानम् आत्मानमेव ध्यायति।

**अवधेयम्**

पुरतः, पृष्ठतः, दक्षिणतः, वामतः, उपरि, अधः, अन्तः इत्येतेषां योगे षष्ठीविभक्तिः प्रयुज्यते।

**अभ्यासः**

1. गीतायाः षष्ठाध्यायस्य 10–18 श्लोकान् उच्चैः पठत –

2. पुरतः, पृष्ठतः, वामतः, दक्षिणतः, उपरि, अधः, अन्तः – एतेषु उचितेन शब्देन रिक्तं स्थानं पूरयत –

   1. पाण्डवाः शिखण्डिनं .......... स्थापयित्वा भीष्मेण सह युद्धं कुर्वन्ति।
   2. दुर्योधनः वैशम्पायनसरोवरस्य .......... आसीत्।
   3. अर्जुनः विश्वरूपिणं कृष्णं .......... ......... च नमस्कृतवान्। (11.40)
   4. सत्त्वस्थाः .......... गच्छन्ति, तामसाः .......... गच्छन्ति। (14–18)

www.thearyasamaj.org



## अवधेयम्

सावधानं पठत, अवगच्छत च –

वयम् आचार्यः, शूरः, घोषः, कविः, गुरुः, पिता – इत्येतादृशान् पुंलिङ्गशब्दान्, कृपा, सेना, चिन्ता, मतिः नारी, माता – इत्येतादृशान् स्त्रीलिङ्गशब्दान्, बलम्, वचनम्, वाक्यम्, वारि – इत्येतादृशान् नपुंसकलिङ्गशब्दान् च ज्ञातवन्तः। अस्मिन् पाठे तेषां शब्दानां वर्णक्रमाणां परिचयं प्राप्नुमः।

'आचार्यः' इति शब्दस्य वर्णक्रमः एवम् अस्ति – आ + च् + आ + र् + य् + अ + :

अन्येषाम् अपि शब्दानां वर्णक्रमं पश्यत –

| | | |
|---|---|---|
| गुरुः | – | ग् + उ + र् + उ + : |
| पिता | – | प् + इ + त् + आ |
| सेना | – | स् + ए + न् + आ |
| वयम् | – | व् + अ + य् + अ + म् |
| वचनम् | – | व् + अ + च् + अ + न् + अ + म् |
| शरीराणि | – | श् + अ + र् + ई + र् + आ + ण् + इ |

आचार्यः इति प्रथमाविभक्तेः एकवचनरूपम्। शब्दस्य मूलं तु 'आचार्य' इति प्रातिपदिकम्। एवमेव 'गुरुः' इति प्रथमाविभक्तेः एकवचनरूपम्। शब्दस्य मूलं तु 'गुरु' इति प्रातिपदिकम्।

अग्रे लिखितानां शब्दानां प्रातिपदिकं प्रथमाविभक्तेः एकवचनरूपं च सावधानतया परिशीलयत –

| प्रातिपदिकम् | प्रथमाविभक्तेः एकवचनरूपम् |
|---|---|
| पुरुष | पुरुषः |
| पितृ | पिता |
| अरि | अरिः |
| प्रीति | प्रीतिः |
| माया | माया |
| राज्य | राज्यम् |
| बल | बलम् |

प्रातिपदिकस्य अन्ते यः वर्णः अस्ति शब्दः तदन्तः भवति।

यथा – केशव – क् + ए + श् + अ + व् + अ

अन्तिमवर्णः 'अ' अस्ति। अतः केशवशब्दः 'अ'कारान्तः।

www.thearyasamaj.org



कवि – क् + अ + व् + इ
अन्तिमवर्णः 'इ' अस्ति। अतः कविशब्दः 'इ'कारान्तः।
माया – म् + आ + य् + आ
अन्तिमवर्णः 'आ' अस्ति। अतः मायाशब्दः 'आ'कारान्तः।
नारी – न् + आ + र् + ई
अन्तिमवर्णः 'ई' अस्ति। अतः नारीशब्दः 'ई'कारान्तः।
पितृ – प् + इ + त् + ऋ
अन्तिमवर्णः 'ऋ' अस्ति। अतः पितृशब्दः 'ऋ'कारान्तः।

1. एतेषां प्रातिपदिकानां वर्णक्रमं लिखित्वा अन्तनिर्णयं कुरुत –

यथा – कृप – क् +ऋ +प् +अ – 'अ'कारान्तः
शूर – ..........................................................
शङ्ख – ..........................................................
भ्रातृ – ..........................................................
सात्यकि – ..........................................................
पृथिवी – ..........................................................
स्त्री – ..........................................................
कुल – ..........................................................
नरक – ..........................................................
कृपा – ..........................................................
प्रीति – ..........................................................
शस्त्र – ..........................................................
शरीर – ..........................................................
कर्तृ – ..........................................................
सुख – ..........................................................
भूमि – ..........................................................
हेतु – ..........................................................
सखी – ..........................................................

एतेषु सर्वेषु शब्देषु अन्तिमः वर्णः स्वरः (अ, आ, इ, ई, उ, ऊ, ऋ, ए, ऐ, ओ, औ) एव अस्ति। स्वराक्षराणाम् 'अच्' इति नाम। अतः एते सर्वे शब्दाः अजन्ताः। (अच् अन्ते यस्य सः अजन्तः।)

www.thearyasamaj.org



# 12 मा ते सङ्गोऽस्तु

| |
|---|
| आवश्यकम् / मास्तु / पर्याप्तम् |
| धन्यवादः / स्वागतम् |

एतत् सम्भाषणम् उच्चैः पठत अवगच्छत च –

आचार्यः – नमो नमः। अद्य गीतापठनम् आवश्यकं किम् ?

अशोकः – आम्, आवश्यकम्। निश्चयेन आवश्यकम्। आचार्य ! गीतापठनार्थं किं किम् आवश्यकम् ?

आचार्यः – गीतापुस्तकम् आवश्यकम्।

अनिलः – लिपिज्ञानम् आवश्यकं किम् ?

आचार्यः – आम्, लिपिज्ञानम् आवश्यकम्।

अशोकः – कृष्णफलकम् आवश्यकम् किम् ?

आचार्यः – कृष्णफलकं मास्तु।

प्रकाशः – मम उच्चारणदोषः अस्ति। भवतः साहाय्यम् आवश्यकम् आचार्य !

आचार्यः – भयं मास्तु। अहं साहाय्यं करोमि।

प्रकाशः – श्लोकानां कण्ठस्थीकरणम् आवश्यकं किम् ?

आचार्यः – मास्तु। प्रतिदिनं पारायणं पर्याप्तम्। तेन स्वयमेव श्लोकाः कण्ठस्थाः भवन्ति। भवतः गीतापुस्तकम् आवश्यकं किम् ?

प्रकाशः – मम मास्तु। गोविन्दस्य आवश्यकम्। मम गृहे व्याख्यानसहितं पुस्तकम् अस्ति। आनयामि किम् ?

आचार्यः – मास्तु। मूलमात्रं पर्याप्तम्।

प्रकाशः – अस्तु आचार्य ! धन्यवादः।

आचार्यः – स्वागतम्

## अभ्यासः

1. श्रीकृष्णस्य मतानुगुणं किम् आवश्यकं किं मास्तु इति अत्र सूचितम् अस्ति। एतेषां साहाय्येन पृथक् वाक्यानि वदत –

| |
|---|
| क्लैब्यम्, शोकः, चिन्ता, फले अधिकारः, विमूढभावः, व्यथा, युद्धम्, सङ्गं त्यक्त्वा कर्माचरणम्, इन्द्रियनियमनम्, योगसेवनम्, भगवद्भजनम् |

उदा – क्लैब्यं मास्तु। – युद्धम् आवश्यकम्।

www.thearyasamaj.org



# 13 न शोचति न काङ्क्षति

पश्यत, उच्चैः पठत अवगच्छत च –

लट्लकारः

|  |  |  |
| --- | --- | --- |
| रथः गच्छति। | रथौ गच्छतः। | रथाः गच्छन्ति। |
| आचार्यः उपदिशति। | आचार्यौ उपदिशतः। | आचार्याः उपदिशन्ति। |
| मातुलः तिष्ठति। | मातुलौ तिष्ठतः। | मातुलाः तिष्ठन्ति। |
| सचिवः वर्णयति। | सचिवौ वर्णयतः। | सचिवाः वर्णयन्ति। |
| व्यूहः अस्ति। | व्यूहौ स्तः। | व्यूहाः सन्ति। |
| सैनिकः पश्यति। | सैनिकौ पश्यतः। | सैनिकाः पश्यन्ति। |
| धीरः मुह्यति। | धीरौ मुह्यतः। | धीराः मुह्यन्ति। |
| स्थितप्रज्ञः अभिनन्दति। | स्थितप्रज्ञौ अभिनन्दतः। | स्थितप्रज्ञाः अभिनन्दन्ति। |
| भगिनी वदति। | भगिन्यौ वदतः। | भगिन्यः वदन्ति। |
| गात्रं सीदति। | गात्रे सीदतः। | गात्राणि सीदन्ति। |
| मुखं शुष्यति। | मुखे शुष्यतः। | मुखानि शुष्यन्ति। |
| इन्द्रियं हरति। | इन्द्रिये हरतः। | इन्द्रियाणि हरन्ति। |
|  |  |  |
| अहं नमामि। | आवां नमावः। | वयं नमामः। |
| अहं गायामि। | आवां गायावः। | वयं गायामः। |
| अहं गणयामि। | आवां गणयावः। | वयं गणयामः। |
| अहम् इच्छामि। | आवाम् इच्छावः। | वयम् इच्छामः। |
| अहं विन्दामि। | आवां विन्दावः। | वयं विन्दामः। |

www.thearyasamaj.org





| त्वं पठसि। | युवां पठथः। | यूयं पठथ। |
|---|---|---|
| त्वम् अर्हसि। | युवाम् अर्हथः। | यूयम् अर्हथ। |
| त्वं छात्रः असि। | युवां छात्रौ स्थः। | यूयं छात्राः स्थ। |
| त्वम् उपविशसि। | युवाम् उपविशथः। | यूयम् उपविशथ। |
| त्वं कथयसि। | युवां कथयथः। | यूयं कथयथ। |

## अभ्यासः

1. यथोदाहरणं रिक्तस्थानानि पूरयत –

| | | |
|---|---|---|
| 1. स्यूतः अस्ति। | स्यूतौ स्तः। | स्यूताः सन्ति। |
| 2. .............. । | .............. । | बालाः उपविशन्ति। |
| 3. अश्वः धावति। | .............. । | .............. । |
| 4. .............. । | धेनू चरतः। | .............. । |
| 5. .............. । | .............. । | फलानि पतन्ति। |
| 6. .............. । | बालौ क्रीडतः। | .............. । |
| 7. नर्तकी नृत्यति। | .............. । | .............. । |
| 8. .............. । | सैनिकौ आरोहतः। | .............. । |
| 9. भक्तः प्रयच्छति। | .............. । | .............. । |
| 10. .............. । | .............. । | दुष्टाः प्रणश्यन्ति। |
| 11. .............. । | नृपौ तुष्यतः। | .............. । |
| 12. एषा कुप्यति। | .............. । | .............. । |
| 13. .............. । | .............. । | एते शोचन्ति। |

www.thearyasamaj.org



## अवधेयम्

| | | |
|---|---|---|
| बालकः | बालकौ | बालकाः |
| मित्रम् | मित्रे | मित्राणि |
| बालिका | बालिके | बालिकाः |
| भवती | भवत्यौ | भवत्यः |
| भवान् | भवन्तौ | भवन्तः |
| सः | तौ | ते |
| सा | ते | ताः |
| तत् | ते | तानि |
| एषः | एतौ | एते |
| एषा | एते | एताः |
| मुनिः | मुनी | मुनयः |
| गुरुः | गुरू | गुरवः |
| पिता | पितरौ | पितरः |
| माता | मातरौ | मातरः |
| व्यक्तिः | व्यक्ती | व्यक्तयः |
| धेनुः | धेनू | धेनवः |
| वधूः | वध्वौ | वध्वः |

**प्रथमपुरुषः**

| | | |
|---|---|---|
| अस्ति | स्तः | सन्ति |
| इच्छति | इच्छतः | इच्छन्ति |
| वदति | वदतः | वदन्ति |

**मध्यमपुरुषः**

| | | |
|---|---|---|
| त्वम् | युवाम् | यूयम् |
| असि | स्थः | स्थ |
| गच्छसि | गच्छथः | गच्छथ |
| वससि | वसथः | वसथ |

**उत्तमपुरुषः**

| | | |
|---|---|---|
| अहम् | आवाम् | वयम् |
| अस्मि | स्वः | स्मः |
| गच्छामि | गच्छावः | गच्छामः |
| वसामि | वसावः | वसामः |

www.thearyasamaj.org



उच्चैः पठत, जानीत च –

वर्तमानकाले विशेषक्रियापदानि

एकवचनप्रयोगः यथा –

| | | | |
|---|---|---|---|
| कः जानाति ? | का करोति ? | भवान् चिनोति। | होता जुहोति। |
| एषः क्रीणाति। | एषा शक्नोति। | मित्रं प्राप्नोति। | दाता ददाति। |
| सः गृह्णाति। | सा शृणोति। | भीरुः रोदिति। | एषः बध्नाति। |

प्रथमपुरुषस्य – द्विवचनप्रयोगः यथा –

| | | | |
|---|---|---|---|
| कौ जानीतः ? | तौ कुरुतः। | ते चिनुतः। | होतारौ जुहुतः। |
| भवत्यौ क्रीणीतः। | एतौ शक्नुतः। | मित्रे प्राप्नुतः। | दातारौ दत्तः। |
| मित्रे गृह्णीतः। | कौ शृणुतः ? | भीरू रुदितः। | एतौ बध्नीतः। |

बहुवचनप्रयोगः यथा –

| | | | |
|---|---|---|---|
| काः जानन्ति ? | भवन्तः कुर्वन्ति। | ते चिन्वन्ति। | होतारः जुह्वति |
| एताः क्रीणन्ति। | भवत्यः शक्नुवन्ति। | एते प्राप्नुवन्ति। | दातारः ददति। |
| काः गृह्णन्ति ? | मित्राणि शृण्वन्ति। | के रुदन्ति ? | एते बध्नन्ति। |

## अभ्यासः

2. एतत् चित्रं पश्यत। चित्रे के के किं कुर्वन्ति इति यथोदाहरणं वाक्यानि लिखत –



यथा – धेनवः चरन्ति।

............................ ।

............................ ।

............................ ।

............................ ।

............................ ।

............................ ।

............................ ।

............................ ।

www.thearyasamaj.org



3. एतस्य कोष्ठकस्य साहाय्येन यथोदाहरणं 15 वाक्यानि वदत –

| | | |
|---|---|---|
| सारथिः | सारथी | सारथयः |
| मुनिः | मुनी | मुनयः |
| शत्रुः | शत्रू | शत्रवः |
| इन्द्रियम् | इन्द्रिये | इन्द्रियाणि |
| दुष्टः | दुष्टौ | दुष्टाः |
| त्वम् | युवाम् | यूयम् |
| अश्वः | अश्वौ | अश्वाः |

| | | |
|---|---|---|
| चालयति | चालयतः | चालयन्ति |
| जपति | जपतः | जपन्ति |
| असूयति | असूयतः | असूयन्ति |
| हरति | हरतः | हरन्ति |
| विनश्यति | विनश्यतः | विनश्यन्ति |
| मोहयसि | मोहयथः | मोहयथ |
| धावति | धावतः | धावन्ति |

उदा – सारथिः चालयति । सारथी चालयतः । सारथयः चालयन्ति ।

.......................... । .......................... । .......................... ।

.......................... । .......................... । .......................... ।

.......................... । .......................... । .......................... ।

.......................... । .......................... । .......................... ।

.......................... । .......................... । .......................... ।

4. एतत् सम्भाषणम् उच्चैः पठत, अवगच्छत च –

यशोदा –हे कृष्ण ! त्वं कुत्र असि ?

कृष्णः –अहं द्वारस्य पृष्ठतः अस्मि । अग्रजः अपि अत्र अस्ति ।

यशोदा –युवां तत्रैव स्थः किम् ?

कृष्णः –आम् , आवाम् अत्रैव स्वः । नीला अपि अत्र अस्ति ।

यशोदा –यूयं चोराः स्थ । किम् अस्ति तव हस्ते ? नवनीतं खादसि किम् ?

कृष्णः –नैव अम्ब ! वयं क्रीडामः ।

यशोदा –असत्यं वदथ । नवनीतं चोरयथ खलु ?

कृष्णः –त्वमेव यच्छसि खलु, पुनः वयं किमर्थं चोरयामः ?

यशोदा – किन्तु गोपिका वदति, त्वं नवनीतं नयसि इति ।

कृष्णः – मिथ्या अम्ब ! अग्रजं पृच्छसि चेत् सत्यम् अवगच्छसि ।

यशोदा – युवां चोरौ स्थः एव । किमर्थम् असत्यं कथयसि ?

कृष्णः – नीले ! त्वं वदसि चेदेव अम्बा विश्वसिति ।

यशोदा – पर्याप्तम् । अहं विश्वसिमि । आगच्छथ ।

कृष्णः – अस्तु । आगच्छामः ।



www.thearyasamaj.org



5. अहम् आवां वयम् – एतेषु उचितस्य रूपस्य प्रयोगेण एतेषां प्रश्नानाम् उत्तराणि लिखत –

1. त्वं फलं प्राप्नोषि किम् ? .................................. ।
2. भवन्तः गीतां जानन्ति किम् ? .................................. ।
3. यूयं पाठं शृणुथ किम् ? .................................. ।
4. यूयं श्लोकान् चिनुथ किम् ? .................................. ।
5. भवती गीतासारं जानाति किम् ? .................................. ।
6. युवां गीतापुस्तकं गृह्णीथः किम् ? .................................. ।
7. त्वं कार्यं कर्तुं शक्नोषि किम् ? .................................. ।
8. युवां जीवनलक्ष्यं प्राप्नुथः किम् ? .................................. ।
9. भवन्तः गीतायाः कण्ठस्थीकरणं कुर्वन्ति किम् ? .................................. ।
10. भवन्तः पुष्पाणि चेतुं शक्नुवन्ति किम् ? .................................. ।

6. अधस्तनशब्दानां साहाय्येन यथोदाहरणं 108 वाक्यानि वदत –




............. (क्रीणाति)
............. (गृह्णाति)
............. (प्राप्नोति)
............. (चिनोति)
............. (जानाति)
............. (ददाति)

उदा – त्वं वस्त्रं क्रीणासि। युवां वस्त्रं क्रीणीथः। यूयं वस्त्रं क्रीणीथ।

7. गीतायाः चतुर्थे अध्याये एतत्संख्याकेषु श्लोकेषु स्थितानि क्रियापदानि परिशीलयत –

| | | | |
|---|---|---|---|
| 1. – 7 | 2. – 8 | 3. – 9 | 4. – 11 |
| 5. – 14 | 6. – 20 | 7. – 21 | 8. – 31 |
| 9. – 38 | 10. – 39 | 11. – 40 | 12. – 41 |

www.thearyasamaj.org



8. यथोदाहरणं वचनं परिवर्त्य रिक्तस्थानानि पूरयत –

| | |
|---|---|
| उदा – वटुः शास्त्रं शृणोति। | वटवः शास्त्रं शृण्वन्ति। |
| 1. सारथिः अश्वान् बध्नाति। | ................................... । |
| 2. कातरः योद्धुं न शक्नोति। | ................................... । |
| 3. मुनिः मनः निगृह्णाति। | ................................... । |
| 4. योगिजनः ब्रह्माग्नौ जुहोति। | ................................... । |
| 5. मानवः सिद्धिम् आप्नोति। | ................................... । |
| 6. नेता आह्वानं शृणोति। | ................................... । |
| 7. देवः वरं ददाति। | ................................... । |
| 8. गुरुः ध्यानं करोति। | ................................... । |
| 9. स्वधर्मकर्ता किल्बिषं न आप्नोति। | ................................... । |
| 10. योद्धा शस्त्रं चिनोति। | ................................... |

9. आवरणात् उचितं रूपं चित्वा रिक्तस्थानानि पूरयत –

| | | |
|---|---|---|
| 1. भवन्तौ विषयं | ..................... । | (जानाति / जानन्ति / जानीतः) |
| 2. ग्राहकौ वस्तु | ..................... । | (क्रीणीतः / क्रीणाति / क्रीणन्ति) |
| 3. सैनिकौ अरिं | ..................... । | (गृह्णन्ति / गृह्णाति / गृह्णीतः) |
| 4. भवन्तौ जपं | ..................... । | (करोति / कुरुतः / कुर्वन्ति) |
| 5. भगिन्यौ गीतां | ..................... । | (शृणोति / शृण्वन्ति / शृणुतः) |
| 6. भवत्यौ सर्वत्र गन्तुं | ..................... । | (शक्नुतः / शक्नोति / शक्नुवन्ति) |
| 7. भक्तौ पुष्पं | ..................... । | ( चिन्वन्ति / चिनुतः / चिनोति) |
| 8. धीरौ न | ..................... । | (रोदिति / रुदितः / रुदन्ति) |
| 9. ऋषी मोक्षं | ..................... । | (प्राप्नुवन्ति / प्राप्नोति / प्राप्नुतः) |
| 10. बालिके फलं | ..................... । | (ददाति / ददति / दत्तः) |

www.thearyasamaj.org



## 10. यथोदाहरणं रिक्तस्थानानि पूरयत–

| | | |
|---|---|---|
| उदा – ग्राहकः वस्तूनि क्रीणाति। | ग्राहकौ वस्तूनि क्रीणीतः। | ग्राहकाः वस्तूनि क्रीणन्ति। |
| 1. मुनिः अग्नौ जुहोति। | ....................... । | ....................... । |
| 2. भक्तः यज्ञं करोति। | ....................... । | ....................... । |
| 3. ....................... । | योधौ चापं चिनुतः। | ....................... । |
| 4. माता भोजनं ददाति। | ....................... । | ....................... । |
| 5. ....................... । | ....................... । | सेनापतयः पुरस्कारं प्राप्नुवन्ति। |
| 6. ....................... । | दातारौ दातुं शक्नुतः। | ....................... । |
| 7. कार्यकर्ता कार्यं जानाति। | ....................... । | ....................... । |
| 8. ....................... । | ....................... । | शिष्याः उपदेशं शृण्वन्ति। |
| 9. दरिद्रः दुःखेन रोदिति। | ....................... । | ....................... । |
| 10. योगिजनः इन्द्रियाणि निगृह्णाति। | ....................... । | ....................... । |

### क्रियारञ्जिनी

## 11. अत्र 20 क्रियापदानि दत्तानि सन्ति। तेषाम् अन्वेषणं कुरुत, लिखत च –

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| आ | न | य | ति | व | ♣ | वा | प्र |
| क | रो | ति | व | द | दा | ति | क्षा |
| र्ष | ♣ | ह | स | ति | ♣ | ♣ | ल |
| ति | च | ल | ति | ष्ठ | अ | ♣ | य |
| उ | प | वि | श | ति | व | ह | ति |
| त्ति | त | ♣ | क्रो | वि | त | र | ति |
| ष्ठ | ति | ♣ | ति | ♣ | र | क्ष | ति |
| ति | त्य | ज | ति | स्ना | ति | ♣ | ♣ |

यथा – 1. आरोहति 2. .................

3. ................. 4. .................

5. ................. 6. .................

7. ................. 8. .................

9. ................. 10. .................

11. ................. 12. .................

13. ................. 14. .................

15. ................. 16. .................

17. ................. 18. .................

19. ................. 20. .................

www.thearyasamaj.org



# 14 संक्षेपगीता

एतान् श्लोकान् पठत, अत्र प्रयुक्तानि क्रियापदानि परिशीलयत च –

अथादौ धृतराष्ट्रस्तु सञ्जयं परिपृच्छति।
कुरुक्षेत्रे समायाताः किमकुर्वत मत्प्रियाः ॥1॥

अवादीत्सञ्जयस्त्वेवं द्रोणं दुर्योधनस्तदा।
उपसङ्गच्छते ब्रूते निबोधयति संस्थितान् ॥2॥

ततो रथस्थितः कृष्णः पाञ्चजन्यं धमत्यहो।
पश्चात्सर्वेऽपि योद्धारः शङ्खान् स्वीयान् धमन्ति च ॥3॥

धनुरुद्यच्छते पार्थः सोऽपि कृष्णं ब्रवीति वै।
सेनयोरुभयोर्मध्ये स्थापयेति रथं मम ॥4॥

स्थापिते स्यन्दने तिष्ठन् असौ सर्वान् निरीक्षते।
दृष्ट्वा बन्धून् गुरूंश्चान्यान् भृशं सीदति खिद्यते ॥5॥

स्रंसते हस्ततश्चापो वेपथुर्जायते तनौ।
मनो भ्रमति तेनासौ रथे नैवावतिष्ठते ॥6॥

विसृजत्यात्मनश्चापं तत्रैवोपविशत्ययम्।
पुनश्चावेक्षते सर्वान् तेन खेदोऽभिवर्धते ॥7॥

पश्चात्प्रभाषते कृष्णं राज्यं भोगं सुखानि च।
न काङ्क्षे न च वा भुञ्जे नैव हन्मीति बान्धवान् ॥8॥

कृष्णः संशृणुते सर्वं पुनश्चोपदिशत्यमुम्।
ज्ञानं भक्तिं तथा योगं साङ्ख्यं कर्म तथाखिलम् ॥9॥

प्रजहात्यर्जुनः क्लैब्यं पुनश्चायं न शोचति।
प्रणश्यति हि सम्मोहः तेनासौ विन्दते स्मृतिम् ॥10॥

ब्रूते च माधवं पार्थः करिष्ये वचनं तव।
ततो युद्धाय सन्नाहं कुर्वन्नुत्तिष्ठति स्वयम् ॥11॥

योऽधीतेऽहर्निशं भक्त्या धर्म्यं संवादमुत्तमम्।
स पुण्यकर्मणां लोकान् अवाप्नोति न संशयः ॥12॥

(अत्र क्रियापदानां लट्लकाररूपाणि अधिकतया प्रयुक्तानि सन्ति।)

www.thearyasamaj.org

# 15 भ्रातृमेलनम्



आत्मनेपदिनां धातूनां परिचयः
लट्लकारः



एतां कथाम् उच्चैः पठत, अवगच्छत च –

पाण्डवाः वनवासम् आचरन्तः बदरिकाश्रमम् आगताः। द्रौपद्या सहिताः ते तत्र रमणीयेषु काननप्रदेशेषु विहरन्तः **रमन्ते**। द्रौपदी अपि विहरन्ती **मोदते**।

एकदा द्रौपदी वायुना आनीतम् एकं सुन्दरं पुष्पम् **ईक्षते**। तत् सौगन्धिकं कमलम् इति सा **जानीते**। सा तादृशानि अधिकानि पुष्पाणि **कामयते**। अतः सा पतिं भीमसेनं **प्रार्थयते** – "भवान् एतादृशानि अन्यानि बहूनि पुष्पाणि आनयतु" इति।

भीमसेनः गदापाणिः सन् **प्रतिष्ठते**। ताम् एव दिशं गत्वा सः गन्धमादनपर्वते सर्वत्र **मृगयते**। सर्वे प्राणिनः तं कुतूहलेन **निरीक्षन्ते**। अग्रे गतः भीमसेनः कदलीवनम् **आलोकते**। तत्र हनुमान् निद्रावशगः आसीत्। सः स्वर्गद्वारम् आवृत्य **शेते** स्म। भीमसेनः तस्य समीपं गत्वा सिंहनादं **कुरुते**। तदा हनुमान् लोचने ईषद् उन्मील्य **स्मयते**। ततः **भाषते** च – "किमर्थं सुखसुप्तं मां प्रबोधयसि ? त्वं कः ? किमर्थम् आगतः ? एषः देवलोकस्य मार्गः **वर्तते**। अत्र मनुष्याणां प्रवेशाय अनुमतिः न **विद्यते**" इति।

तदा भीमसेनः **ब्रूते** – "अहं कुन्तीपुत्रः भीमसेनः। एतेन मार्गेण गन्तुम् इच्छामि। त्वम् उत्तिष्ठ। मार्गं प्रयच्छ" इति।

हनुमान् वदति –"अहं व्याधिपीडितः अस्मि। अतः उत्थातुं मम शक्तिः न **विद्यते**। यदि त्वया अवश्यं गन्तव्यं तर्हि मां लङ्घयित्वा गच्छ" इति।

तदा भीमसेनः वदति – "परमात्मा देहं व्याप्य **अवतिष्ठते** इति अहं **जाने**। तव लङ्घनेन तस्य अवमाननं कर्तुं न **उत्सहे**। अन्यथा हनुमान् सागरम् इव त्वां लङ्घयित्वा गच्छेयम्" इति।

www.thearyasamaj.org



हनुमान् पृच्छति – "कः सः हनुमान् ? किमर्थं सः सागरं लङ्घितवान् ?" इति।

"हनुमान् मम भ्राता। रामायणे सः अतिविख्यातः। रामपत्न्याः सीतायाः अन्वेषणाय सः शतयोजन-विस्तृतं सागरं लङ्घितवान्। अहमपि बले पराक्रमे युद्धे च तेन तुल्यः **वर्ते**" इति साभिमानं वदति भीमसेनः। अन्ते "मार्गं प्रयच्छ" इति पुनरपि वदति।

हनुमान् वदति – "जरया मम उत्थातुं शक्तिः नास्ति। त्वमेव अनुकम्पया एतत् पुच्छम् अपसार्य गच्छ" इति।

भीमसेनः 'पुच्छे गृहीत्वा एतं वानरं यमसदनं प्रेषयामि' इति मनसा चिन्तयति। ततः सः अवज्ञया वामहस्तेन पुच्छं गृहीतवान्। किन्तु तत् पुच्छं किञ्चिदपि न **कम्पते**। अधुना भीमसेनः बाहुभ्यां पुच्छम् उत्क्षेप्तुं **प्रयतते**। तथापि पुच्छं न **कम्पते**। भीमसेनस्य शरीरं **स्विद्यते**। पुनःपुनः प्रयत्नेनापि सः विफलः **जायते**। सः नितरां **लज्जते**। अन्ते सः हनुमन्तं नमस्कृत्य **प्रार्थयते** – "कपिशार्दूल ! मां क्षमताम्। वानररूपधृक् भवान् सिद्धः, देवः गन्धर्वः वा कः इति वदतु। अहं शिष्यवत् भवन्तं पृच्छामि। कृपया वदतु" इति।

तदा हनुमान् स्वस्य परिचयम् उक्तवान्। भीमसेनः भक्त्या तं नमस्कृतवान्। हनुमान् प्रीत्या तम् आलिङ्गितवान्। ततः सः भीमसेनस्य प्रार्थनाम् अङ्गीकृत्य रामावतारे स्वस्य यादृशं शरीरम् आसीत् तादृशं विशालं शरीरं दर्शितवान्। अन्ते तम् आशीर्भिः अनुगृह्य अन्तर्हितः अभवत्।

## अभ्यासः

1. अस्मिन् पाठे स्थूलाक्षरैः मुद्रितानि पदानि अत्र लिखत –

| | | | | |
|---|---|---|---|---|
| रमन्ते | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |
| ............. | ............. | ............. | ............. | ............. |

*एतानि सर्वाणि आत्मनेपदिक्रियापदानि सन्ति।*

www.thearyasamaj.org



एतानि वाक्यानि सावधानतया उच्चैः पठत, परिशीलयत च –

1. अर्जुनः पृच्छति ।
2. मूर्खः शोचति ।
3. अग्निः ज्वलति ।
4. अहितः निन्दति ।
5. एषा अभिनन्दति ।

एतेषु वाक्येषु क्रियापदेषु परस्मैपदिधातूनां रूपाणि प्रयुक्तानि सन्ति ।

1. कृष्णः भाषते ।
2. पण्डितः मन्यते ।
3. सूर्यः प्रकाशते ।
4. श्रेयः विद्यते ।
5. सः वर्तते ।

एतेषु वाक्येषु क्रियापदेषु आत्मनेपदिधातूनां रूपाणि प्रयुक्तानि सन्ति ।

एतानि सर्वाणि रूपाणि लट्लकारस्य प्रथमपुरुषैकवचनरूपाणि ।

## अवधेयम्

क्रियापदस्य मूलं धातुः । यथा 'पठति' इत्यस्य क्रियापदस्य मूलं 'पठ्' इति धातुः ।
धातवः त्रिविधाः सन्ति – परस्मैपदिनः, आत्मनेपदिनः, उभयपदिनः च इति । पठ् , लिख् , क्रीड् , मिल् , गम् – इत्यादयः धातवः परस्मैपदिनः । वन्द् , एध् , लभ् , ईक्ष्, लज्ज् – इत्यादयः धातवः आत्मनेपदिनः । परस्मैपदिनां धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ति' इति श्रूयते ।

यथा – पठति, लिखति, शोचति ।

आत्मनेपदिनां धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ते' इति श्रूयते ।

यथा – वीक्षते, लज्जते, कम्पते ।

उभयपदिनां तु धातूनां लट्लकारस्य प्रथमपुरुषैकवचनरूपेषु अन्ते 'ति, ते' एतदुभयमपि श्रूयते ।
यथा – करोति / कुरुते, याचति / याचते, जानाति / जानीते ।

2. अधः कानिचित् क्रियापदरूपाणि सन्ति । एतेषु परस्मैपदिधातूनाम् आत्मनेपदिधातूनां च रूपाणि विचिनुत –

पश्यति, लज्जते, कामयते, तिष्ठति, वर्तते, विद्यते, अस्ति, पलायते, वदति, स्मरति, स्मयते, भाषते, पतति, द्योतते, कर्षति, स्निह्यति, स्नाति, स्पृशति, कम्पते, म्रियते, रटति, नयति, दिशति, जायते, तिष्ठति, ऊहते, गाहते, मोदते, गच्छति, ईक्षते

www.thearyasamaj.org



| परस्मैपदिरूपाणि | | | आत्मनेपदिरूपाणि | | |
|---|---|---|---|---|---|
| पश्यति | ........... | ............. | लज्जते | ........... | ............. |
| ........... | ........... | ............. | ........... | ........... | ............. |
| ........... | ........... | ............. | ........... | ........... | ............. |
| ........... | ........... | ............. | ........... | ........... | ............. |
| ........... | ........... | ............. | ........... | ........... | ............. |
| ........... | ........... | ............. | ........... | ........... | ............. |

'एध्'धातोः लट्लकारे रूपाणि एवं भवन्ति –

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | एधते | एधेते | एधन्ते |
| मध्यमपुरुषः | एधसे | एधेथे | एधध्वे |
| उत्तमपुरुषः | एधे | एधावहे | एधामहे |

'सह्'(षह्) धातोः रूपाणि एवं भवन्ति –

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | सहते | सहेते | सहन्ते |
| मध्यमपुरुषः | सहसे | सहेथे | सहध्वे |
| उत्तमपुरुषः | सहे | सहावहे | सहामहे |

उच्चैः पठत –

1. अभ्यासेन ज्ञानं वर्धते ।
2. कामात् क्रोधः जायते ।
3. उत्पन्नः जीवः म्रियते ।
4. हस्तात् गाण्डीवं स्रंसते ।
5. भक्तः ईश्वरं भजते ।
6. जीवः सुखं कामयते ।
7. सः अमृतत्वाय कल्पते ।
8. स्थितप्रज्ञः किं भाषते ?
9. श्रद्धावान् ज्ञानं लभते ।
10. ईश्वरः सर्वत्र वर्तते ।
11. अभिमन्युः चक्रव्यूहं वीक्षते ।
12. भीष्मः सर्वान् क्षमते ।
13. कुन्ती कष्टं सहते ।
14. सञ्जयः युद्धम् अवलोकते ।
15. कृष्णः अश्वान् सेवते ।
16. योधः युद्धार्थं त्वरते ।

www.thearyasamaj.org



3. एतेषु वाक्येषु परस्मैपदिक्रियापदानि प्रयुक्तानि सन्ति। तत्समानार्थकानि आत्मनेपदिक्रियापदानि कोष्ठके दत्तानि सन्ति। ततः उचितं क्रियापदं चित्वा रिक्तस्थाने लिखत –

उदा –

| | |
|---|---|
| 1. वयं भारतमातरं प्रणमामः। | वन्दामहे |
| 2. ईश्वरः भक्तान् कष्टात् रक्षति। | .............. |
| 3. यूयं किं चिन्तयथ ? | .............. |
| 4. तौ आकाशं पश्यतः। | .............. |
| 5. युवां सत्यं वदथः। | .............. |
| 6. बालिकाः चित्रं दृष्ट्वा तुष्यन्ति। | .............. |
| 7. अहं देवं प्रणमामि। | .............. |
| 8. वयं विश्वशान्तिम् इच्छामः। | .............. |
| 9. ते मार्गे सन्ति। | .............. |
| 10. त्वं कीर्तिं प्राप्नोषि। | .............. |

लभसे
वन्दे
वीक्षेते
कामयामहे
वर्तन्ते
मन्यध्वे
भाषेथे
मोदन्ते
त्रायते
वन्दामहे

4. प्रथमं वाक्यम् अवधानेन पठत। द्वितीयवाक्यस्य कर्तृपदं दृष्ट्वा वाक्यानि परिवर्तयत –

| | |
|---|---|
| उदा – सर्वे विजयं कामयन्ते। | अहं विजयं कामये। |
| 1. यूयं नितरां मोदध्वे। | तौ .................................. । |
| 2. दुर्योधनः आचार्यम् उपसङ्गच्छते। | त्वं .................................. । |
| 3. एताः संस्कृतेन भाषन्ते। | यूयं .................................. । |
| 4. बालाः स्पर्धन्ते। | भवन्तौ .............................. । |
| 5. के युद्धात् पलायन्ते ? | कौ .................................. ? |
| 6. वयं धर्मरक्षणम् अपेक्षामहे। | आवां .............................. । |
| 7. सः चमूं वीक्षते। | युवां .............................. । |
| 8. त्वं स्यन्दने विराजसे। | ते .................................. । |
| 9. क्षत्रियः युद्धं लभते। | भवन्तः .............................. । |
| 10. ते महीं भुञ्जते। | त्वं .................................. । |
| 11. कः विषयान् उपसेवते ? | तौ .................................. । |
| 12. सर्वे भगवतः मार्गम् अनुवर्तन्ते। | वयं .................................. । |

www.thearyasamaj.org



# 16 उत्तिष्ठ यशो लभस्व

लोट्लकारः

एतत् सम्भाषणम् उच्चैः पठत, अवगच्छत च –

पिता – वत्स ! अत्र आगच्छ ।

पुत्रः – किम् ?

पिता – गीतापुस्तकम् आनय ।

पुत्रः – अस्तु ।

पिता – अत्र उपविश । प्रथमं कृष्णं स्मर । प्रार्थनां कुरु । ध्यानश्लोकं पठ । उच्चैः वद ।

पुत्रः – कं श्लोकं पठानि ?

पिता – प्रथमं श्लोकं पठ ।

पुत्रः – भवान् कृपया एतस्य अर्थं विवृणोतु ।

पिता – विवृणोमि । श्रद्धया शृणु । अत्र पश्य ।

पुत्रः – कुत्र पश्यानि ?

पिता – पुस्तकस्य अष्टमं पृष्ठं वीक्षस्व ।

पुत्रः – अग्रे किं करवाणि ?

पिता – एतं श्लोकं पञ्चवारं पठ ।

पुत्रः – भवान् कृपया पाठयतु । अनन्तरम् अहं प्रयतै ।

पिता – तथैव कुरुष्व । आरभावहै !

पुत्रः – अस्तु ।

उच्चैः पठत, अवगच्छत च –

| | | |
|---|---|---|
| भवान् पश्यतु । | भवन्तौ पश्यताम् । | भवन्तः पश्यन्तु । |
| भवान् आगच्छतु । | भवन्तौ आगच्छताम् । | भवन्तः आगच्छन्तु । |
| भवान् स्वीकरोतु । | भवन्तौ स्वीकुरुताम् । | भवन्तः स्वीकुर्वन्तु । |
| भवती पठतु । | भवत्यौ पठताम् । | भवत्यः पठन्तु । |
| भवती उपविशतु । | भवत्यौ उपविशताम् । | भवत्यः उपविशन्तु । |
| त्वं लिख । | युवां लिखतम् । | यूयं लिखत । |
| त्वं वद । | युवां वदतम् । | यूयं वदत । |
| त्वं नय । | युवां नयतम् । | यूयं नयत । |

www.thearyasamaj.org



## अभ्यासः

1. यथोदाहरणं वाक्यानि लिखत –

| भवान् | भवती |
|---|---|
| सूचयति | गायति |
| प्रेषयति | चलति |
| त्यजति | मिलति |
| सञ्चरति | तिष्ठति |
| प्रदर्शयति | जानाति |
| दण्डयति | प्रक्षालयति |

उदा –1. भवान् सूचयतु। 2. भवती गायतु।

3. ..................... । 4. ..................... ।

5. ..................... । 6. ..................... ।

7. ..................... । 8. ..................... ।

9. ..................... । 10. ..................... ।

11. ..................... । 12. ..................... ।

13. ..................... । 14. ..................... ।

2. यथोचितेन पदेन योजयत –

| | |
|---|---|
| सन्मार्गं | जयतु |
| सहयोगं | पश्यतु |
| प्रकृतिं | स्मरतु |
| संस्कृतं | अनुसरतु |
| ध्येयं | ददातु |
| भारतं | लसतु |

| | |
|---|---|
| सन्मार्गम् | अनुसरतु। |
| ............ | ............ । |
| ............ | ............ । |
| ............ | ............ । |
| ............ | ............ । |
| ............ | ............ । |

3. कोष्ठके विद्यमानेन उचितक्रियापदेन रिक्तस्थानानि पूरयत –

शृणोतु, भवतु, सम्पादयतु, करोतु, निर्मातु, त्यजतु, प्राप्नोतु, साधयतु, सृजतु, प्रदर्शयतु

भवान् / भवती →

1. परिश्रमं.. ........... । 6. दुर्गुणं ............ ।

2. जागरूकः ........... । 7. लक्ष्यं ............ ।

3. प्रवचनं ........... । 8. पराक्रमं ............ ।

4. विजयं ........... । 9. चित्रं ............ ।

5. शक्तिं ........... । 10. नूतनं ............ ।

www.thearyasamaj.org



## अवधेयम्

| | एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|---|
| प्र.पु. | भवान् / सः | पठतु | भवन्तौ / तौ | पठताम् | भवन्तः / ते | पठन्तु |
| म.पु. | त्वं | पठ | युवां | पठतम् | यूयं | पठत |
| उ.पु. | अहं | पठानि | आवां | पठाव | वयं | पठाम |

4. यथोदाहरणं रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| उदा – | भवान् / सः | भवन्तौ / तौ | भवन्तः / ते |
| | क्रीडति / क्रीडतु | क्रीडतः / क्रीडताम् | क्रीडन्ति / क्रीडन्तु |
| | नमति / ......... । | नमतः / ......... । | नमन्ति / ......... । |
| | रक्षति / ......... । | रक्षतः / ......... । | रक्षन्ति / ......... । |
| | भ्रमति / ......... । | भ्रमतः / ......... । | भ्रमन्ति / ......... । |

| | | | |
|---|---|---|---|
| उदा – | त्वम् | युवम् | यूयम् |
| | स्मरसि / स्मर | स्मरथः / स्मरतम् | स्मरथ / स्मरत |
| | त्यजसि / ......... । | त्यजथः / ......... । | त्यजथ / ......... । |
| | स्पृशसि / ......... । | स्पृशथः / ......... । | स्पृशथ / ......... । |
| | कूजसि / ......... । | कूजथः / ......... । | कूजथ / ......... । |

| | | | |
|---|---|---|---|
| उदा – | अहम् | आवाम् | वयम् |
| | हसामि / हसानि | हसावः / हसाव | हसामः / हसाम |
| | पचामि / ......... । | पचावः / ......... । | पचामः / ......... । |
| | तरामि / ......... । | तरावः / ......... । | तरामः / ......... । |
| | भवामि / ......... । | भवावः / ......... । | भवामः / ......... । |

www.thearyasamaj.org



5. पूर्वतनकोष्ठकात् क्रियापदानि चित्वा 20 वाक्यानि रचयत–

| | |
|---|---|
| 1. त्वं वद। | 2. ................ । |
| 3. ................ । | 4. ................ । |
| 5. ................ । | 6. ................ । |
| 7. ................ । | 8. ................ । |
| 9. ................ । | 10. ................ । |
| 11. ................ । | 12. ................ । |
| 13. ................ । | 14. ................ । |
| 15. ................ । | 16. ................ । |
| 17. ................ । | 18. ................ । |
| 19. ................ । | 20. ................ । |

पठत, अवगच्छत च –

| | | |
|---|---|---|
| भवान् लोकताम्। | भवन्तौ लोकेताम्। | भवन्तः लोकन्ताम्। |
| भवान् मोदताम्। | भवन्तौ मोदेताम्। | भवन्तः मोदन्ताम्। |
| भवती कामयताम्। | भवत्यौ कामयेताम्। | भवत्यः कामयन्ताम्। |
| भवती यतताम्। | भवत्यौ यतेताम्। | भवत्यः यतन्ताम्। |
| त्वं वीक्षस्व। | युवां वीक्षेथाम्। | यूयं वीक्षध्वम्। |
| त्वं भाषस्व। | युवां भाषेथाम्। | यूयं भाषध्वम्। |
| त्वं क्रीणीष्व। | युवां क्रीणीथाम्। | यूयं क्रीणीध्वम्। |
| त्वं भुङ्क्ष्व। | युवां भुञ्जाथाम्। | यूयं भुङ्ध्वम्। |
| अहं करवै। | आवां करवावहै। | वयं करवामहै। |
| अहं सेवै। | आवां सेवावहै। | वयं सेवामहै। |

6. उदाहरणपदानि दृष्ट्वा रिक्तस्थानानि उचितपदैः पूरयत –

| | सः | ते | त्वम् | यूयम् | अहम् | वयम् |
|---|---|---|---|---|---|---|
| वन्दते | वन्दताम् | वन्दन्ताम् | वन्दस्व | वन्दध्वम् | वन्दै | वन्दामहै |
| सहते | ......... | ......... | ......... | ......... | ....... | ......... |
| सज्जते | ......... | ......... | ......... | ......... | ....... | ......... |

www.thearyasamaj.org



| | | | | | | |
|---|---|---|---|---|---|---|
| लभते | ......... | ......... | ......... | ......... | ....... | ......... |
| रमते | ......... | ......... | ......... | ......... | ....... | ......... |
| वेपते | ......... | ......... | ......... | ......... | ....... | ......... |
| लज्जते | ......... | ......... | ......... | ......... | ....... | ......... |
| ईक्षते | ......... | ......... | ......... | ......... | ....... | ......... |
| युद्ध्यते | ......... | ......... | ......... | ......... | ....... | ......... |
| चेष्टते | ......... | ......... | ......... | ......... | ....... | ......... |
| ऊहते | ......... | ......... | ......... | ......... | ....... | ......... |
| खिद्यते | ......... | ......... | ......... | ......... | ....... | ......... |

7. यथोदाहरणं वाक्यानि वदत –

> निरीक्षते, क्षमते, युध्यते, शेते, कुरुते, सहते, खिद्यते, युङ्क्ते,
> भुङ्क्ते, लभते, मोदते, भाषते, सेवते, ब्रूते, दत्ते

उदा – 1. भवान् निरीक्षताम्। त्वं निरीक्षस्व। अहं निरीक्षै।

8. कुरुक्षेत्रे सैनिकानां मुखात् मुखरितानि पदानि एतानि सन्ति। तत्पूर्वम् उचितं कर्तृपदं योजयत –

यथा – त्वं मारय।

1. .............. भञ्जयत।
2. .............. लुण्ठन्तु।
3. .............. ताडयानि।
4. .............. आस्फोटयाव।
5. .............. कुट्टयतम्।
6. .............. प्रस्फोटयत।
7. .............. प्रक्षिपतु।
8. .............. विमर्दयत।
9. .............. विदारयाम।
10. .............. विमुञ्चाव।
11. .............. मारय।
12. .............. छिन्धि।
13. .............. भिन्धि।
14. .............. घ्नन्तु।
15. .............. प्रताडयाम।
16. .............. सर्प।
17. .............. सम्मुखीकरवाम।
18. .............. प्रहर।
19. .............. खण्डयन्तु।
20. .............. दण्डय।

www.thearyasamaj.org



## अवधेयम्

| | एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|---|
| प्र.पु. | भवान्/सः | वन्दताम् | भवन्तौ/तौ | वन्देताम् | भवन्तः/ते | वन्दन्ताम् |
| म.पु. | त्वं | वन्दस्व | युवां | वन्देथाम् | यूयं | वन्दध्वम् |
| उ.पु. | अहं | वन्दै | आवां | वन्दावहै | वयं | वन्दामहै |

9. यथोदाहरणं रिक्तस्थानानि पूरयत –

| उदा – भवान् / सः | भवन्तौ / तौ | भवन्तः / ते |
|---|---|---|
| शोभते / शोभताम् | शोभेते / शोभेताम् | शोभन्ते / शोभन्ताम् |
| रमते/ ............. । | रमेते / ............. । | रमन्ते / ............. । |
| अयते / ............. । | अयेते / ............. । | अयन्ते / ............. । |
| स्मयते / ............. । | स्मयेते / ............. । | स्मयन्ते /............. । |

| उदा – त्वम् | युवाम् | यूयम् |
|---|---|---|
| द्योतसे / द्योतस्व | द्योतेथे / द्योतेथाम् | द्योतध्वे / द्योतध्वम् |
| सहसे / ............. । | सहेथे / ............. । | सहध्वे / ............. । |
| लज्जसे / ............. । | लज्जेथे / ............. । | लज्जध्वे /............. । |
| सज्जसे /............. । | सज्जेथे / ............. । | सज्जध्वे /............. । |

| उदा – अहम् | आवाम् | वयम् |
|---|---|---|
| वर्ते / वर्तै | वर्तावहे / वर्तावहै | वर्तामहे / वर्तामहै |
| विद्ये / ............. । | विद्यावहे/ ............. । | विद्यामहे / ............. । |
| खिद्ये/ ............. । | खिद्यावहे /............. । | खिद्यामहे / ............. । |
| स्विद्ये/............. । | स्विद्यावहे/ ............. । | स्विद्यामहे /............. । |

www.thearyasamaj.org



10. असमानार्थकपदं पृथक्कुरुत –

1. सहस्व, तितिक्षस्व, क्षमस्व – क्षमस्व
2. वदतु, ब्रूताम्, भाषताम्, मोदताम् – ..............................
3. भुङ्क्ष्व, भजस्व, खाद, भक्षय –..............................
4. लभस्व, आप्नुहि, विन्द, निन्द – ..............................
5. जानीहि, विद्धि, निबोध, जहि –..............................
6. इच्छानि, काङ्क्षानि, कामयै, वीक्षै – ..............................
7. वन्दताम्, नमतु, रमताम्, प्रणमतु – ..............................
8. क्रीड, लस, रमस्व, सहस्व –..............................
9. वीक्षै, लोकै, पश्यानि, रक्षानि, अवेक्षै – ..............................
10. मुञ्चतु, जहातु, हन्तु, त्यजतु – ..............................

11. कोष्ठकस्थानां वर्तमानकालक्रियारूपाणां लोट्रूपाणि उपयुज्य वाक्यानि वदत –

| | |
|---|---|
| सः / तौ / ते | पठति / शिक्षते<br>वदति / ब्रूते |
| त्वं / युवां / यूयं | करोति / कुरुते<br>चिन्तयति / मन्यते |
| अहं / आवां / वयं | भजति / भजते<br>क्रीडति / रमते |

यथा – सः पठतु। तौ पठताम्। ते पठन्तु।
सः शिक्षताम्। तौ शिक्षेताम्। ते शिक्षन्ताम्।

12. पाण्डवानां शिबिरम्। युद्धसन्नाहः प्रवर्तते। सेनापतिः धृष्टद्युम्नः सूचनाः ददाति। आवरणे स्थितस्य क्रियापदस्य उचितं रूपम् उपयुज्य सः कं किम् आदिशति इति लिखत –

उदा – सूर्योदयः जातः। यूयं सर्वे उत्तिष्ठत (उत्तिष्ठन्ति)

युद्धार्थं सज्जाः ............... (भवन्ति) सुकेश ! त्वं द्वारे ............... (तिष्ठसि)। यूयं खड्गान् तीक्ष्णान् ............... (कुरुथ)। भीम ! अद्य भवान् गजसैन्यं ............... (नयति)। भोः ! यूयं कवचानि ............... (धरथ)। नकुल ! अद्य त्वं व्यूहं ............... (रचयसि)। सर्वे व्यूहे सज्जाः ............... (तिष्ठन्ति)। सेनापतिः अग्रे ............... (तिष्ठति)। यूयं तस्य रक्षणं

www.thearyasamaj.org



............... (कुरुथ) ।

अश्वदलं तत्र ............... (गच्छति) । एते सैनिकाः गजम् ............... (आरोहन्ति) । भवन्तः कुन्तान् ............... (गृह्णन्ति) । शत्रून् ............... मर्दयन्ति ।

आक्रमणं ............... (कुर्वन्ति) । सर्वे दलपतिम् ............... (अनुसरन्ति), आज्ञां ............... (पालयन्ति) च । शत्रुपक्षे अस्त्राणि ............... (क्षिपन्ति) । सर्वे अरयः ............... (पतन्ति) । यूयं शत्रून् यमलोकं ............... (प्रापयथ) । वयं सायङ्कालात् पूर्वं विजयिनः ............... (भवामः) । धर्मरक्षणं ............... (कुर्मः) ।

13. गीतायां कृष्णेन आदर्शरूपेण उक्तानि कानिचित् वाक्यानि अत्र संगृहीतानि सन्ति । एतानि उच्चैः पठत । एतेषु लोट्लकाररूपाणि अधोरेखया अङ्कयत –

| | | | |
|---|---|---|---|
| 1. योगस्थः कुरु कर्माणि । | 2.48 | 2. निमित्तमात्रं भव सव्यसाचिन् । | 11.33 |
| 3. निस्त्रैगुण्यो भवार्जुन । | 2.45 | 4. बीजं मां सर्वभूतानां विद्धि । | 10.39 |
| 5. यथेच्छसि तथा कुरु । | 18.63 | 6. मद्याजी मां नमस्कुरु । | 9.34 |
| 7. बुद्धौ शरणमन्विच्छ । | 2.49 | 8. तस्मादुत्तिष्ठ कौन्तेय । | 2.37 |
| 9. शृणु मे परमं वचः । | 10.1 | 10. तमेव शरणं गच्छ । | 18.62 |
| 11. नियतं कुरु कर्म त्वम् । | 3.8 | 12. मुक्तसङ्गः समाचर । | 3.9 |
| 13. बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव । | 18.57 | 14. शाधि मां त्वां प्रपन्नम् । | 2.7 |
| 15. तस्मात् त्वम् उत्तिष्ठ यशो लभस्व । | 11.33 | 16. तस्मात् युध्यस्व भारत । | 2.18 |
| 17. यत् तपस्यसि तत् कुरुष्व मदर्पणम् | 9.27 | 18. लोकमिमं प्राप्य भजस्व माम् । | 9.33 |
| 19. जित्वा शत्रून् भुङ्क्ष्व राज्यम् । | 11.33 | 20. मय्येव मनः आधत्स्व । | 12.8 |
| 21. मन्मना भव । | 9.34 | 22. मयि बुद्धिं निवेशय । | 12.8 |

**महात्मानः गीताविषये एवं वदन्ति –**

"गीता तत्त्वोपदेशग्रन्थमात्रं न । इदं महत्त्वपूर्णं धर्मविषयकं किञ्चन काव्यम् । यः अत्र यथा यथा अधिकं गाहते तथा तथा पुष्कलः अर्थः तेन प्राप्यते । इदं महान्तं जनसमूहम् उद्दिश्य एव रचितम् । अत्र रुचिरा पुनरुक्तिः दृश्यते ।"

*– महात्मा गान्धिः*

www.thearyasamaj.org



# 17 पञ्चैतानि महाबाहो !

उच्चैः पठत, जानीत च –

संख्याः

| | | | | |
|---|---|---|---|---|
| 1. एकम् | 21. एकविंशतिः | 41. एकचत्वारिंशत् | 61. एकषष्टिः | 81. एकाशीतिः |
| 2. द्वे | 22. द्वाविंशतिः | 42. द्विचत्वारिंशत् | 62. द्विषष्टिः | 82. द्व्यशीतिः |
| 3. त्रीणि | 23. त्रयोविंशतिः | 43. त्रिचत्वारिंशत् | 63. त्रिषष्टिः | 83. त्र्यशीतिः |
| 4. चत्वारि | 24. चतुर्विंशतिः | 44. चतुश्चत्वारिंशत् | 64. चतुःषष्टिः | 84. चतुरशीतिः |
| 5. पञ्च | 25. पञ्चविंशतिः | 45. पञ्चचत्वारिंशत् | 65. पञ्चषष्टिः | 85. पञ्चाशीतिः |
| 6. षट् | 26. षड्विंशतिः | 46. षट्चत्वारिंशत् | 66. षट्षष्टिः | 86. षडशीतिः |
| 7. सप्त | 27. सप्तविंशतिः | 47. सप्तचत्वारिंशत् | 67. सप्तषष्टिः | 87. सप्ताशीतिः |
| 8. अष्ट | 28. अष्टाविंशतिः | 48. अष्टचत्वारिंशत् | 68. अष्टषष्टिः | 88. अष्टाशीतिः |
| 9. नव | 29. नवविंशतिः | 49. नवचत्वारिंशत् | 69. नवषष्टिः | 89. नवाशीतिः |
| 10. दश | 30. त्रिंशत् | 50. पञ्चाशत् | 70. सप्ततिः | 90. नवतिः |
| 11. एकादश | 31. एकत्रिंशत् | 51. एकपञ्चाशत् | 71. एकसप्ततिः | 91. एकनवतिः |
| 12. द्वादश | 32. द्वात्रिंशत् | 52. द्विपञ्चाशत् | 72. द्विसप्ततिः | 92. द्विनवतिः |
| 13. त्रयोदश | 33. त्रयस्त्रिंशत् | 53. त्रिपञ्चाशत् | 73. त्रिसप्ततिः | 93. त्रिनवतिः |
| 14. चतुर्दश | 34. चतुस्त्रिंशत् | 54. चतुष्पञ्चाशत् | 74. चतुस्सप्ततिः | 94. चतुर्नवतिः |
| 15. पञ्चदश | 35. पञ्चत्रिंशत् | 55. पञ्चपञ्चाशत् | 75. पञ्चसप्ततिः | 95. पञ्चनवतिः |
| 16. षोडश | 36. षट्त्रिंशत् | 56. षट्पञ्चाशत् | 76. षट्सप्ततिः | 96. षण्णवतिः |
| 17. सप्तदश | 37. सप्तत्रिंशत् | 57. सप्तपञ्चाशत् | 77. सप्तसप्ततिः | 97. सप्तनवतिः |
| 18. अष्टादश | 38. अष्टात्रिंशत् | 58. अष्टपञ्चाशत् | 78. अष्टसप्ततिः | 98. अष्टनवतिः |
| 19. नवदश | 39. नवत्रिंशत् | 59. नवपञ्चाशत् | 79. नवसप्ततिः | 99. नवनवतिः |
| 20. विंशतिः | 40. चत्वारिंशत् | 60. षष्टिः | 80. अशीतिः | 100. शतम् |

## अभ्यासः

1. आवरणे विद्यमानां संख्यां दृष्ट्वा 'कति सन्ति' इति लिखत –

यथा – (2) द्वौ हस्तौ।

1. (1) .................... धनुः ।
2. (16) .................... संस्काराः ।
3. (1) ....................सारथिः ।
4. (10) .................... इन्द्रियाणि ।
5. (2) .................... अयने ।
6. (4) .................... आश्रमाः ।

www.thearyasamaj.org

7. (5) .......... कर्मसिद्धिकारणानि ।
8. (80)................. योधाः ।
9. (8)................. वसवः ।
10. (42)................. अश्वाः ।
11. (6)................. ऋतवः ।
12. (54)................. इषवः ।
13. (18)............... अध्यायाः ।
14. (76) ................. गजाः ।
15. (3) ................. नेत्राणि ।
16. (3) ................. नायकाः ।
17. (27) ............ जन्मनक्षत्राणि ।
18. (2) ................. सेने ।
19. (32)................. दन्ताः ।
20. (96)................. स्यन्दनानि ।
21. (12) ............... आदित्याः ।
22. (4)................. युगानि ।
23. (2)................. पक्षौ ।
24. (18) ................. पुराणानि ।
25. (6)................. रसाः ।
26. (5) ................. प्राणाः ।
27. (14) ................. मनवः ।
28. (33)................. देवताः ।

## ज्ञानवर्धनी

### अक्षौहिण्याः परिमाणम्

एको रथो गजश्चैको नराः पञ्च पदातयः।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
(1 गजः, 1 रथः, 5 पदातयः नराः, 3 अश्वाः = 1 पत्तिः)
पत्तिं तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥
चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनी ।
अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ॥ *(म.भा. 1.2.2 = 19-22)*

| | | | | | |
|---|---|---|---|---|---|
| 3 पत्तयः | - 1 | सेनामुखम् | 3 वाहिन्यः | - | 1 पृतना |
| 3 सेनामुखानि | - 1 | गुल्मः | 3 पृतनाः | - | 1 चमूः |
| 3 गुल्माः | - 1 | गणः | 3 चम्वः | - | 1 अनीकिनी |
| 3 गणाः | - 1 | वाहिनी | 10 अनीकिन्यः | - | 1 अक्षौहिणी |

एकस्याम् अक्षौहिण्याम् - 21870 गजाः 21870 रथाः
65610 अश्वाः 109350 पदातयश्च भवन्ति ।

www.thearyasamaj.org



# 18 अभ्यासं करोतु

क्रियापदस्य विभज्य प्रयोगः

एतानि वाक्यानि सावधानतया पठत, अवगच्छत च –

कृष्णः अर्जुनम् उपदिशति। = कृष्णः अर्जुनस्य उपदेशं करोति।

प्रबन्धतज्ज्ञाः गीताव्याख्यानं शृण्वन्ति। = प्रबन्धतज्ज्ञाः गीताव्याख्यानस्य श्रवणं कुर्वन्ति।

एवमेव –

| | | | | |
|---|---|---|---|---|
| (रथम्) | स्थापयति | = | स्थापनं करोति। | (रथस्य) |
| (भेरीम्) | वादयति | = | वादनं करोति। | (भेर्याः) |
| (हृदयम्) | विदारयति | = | विदारणं करोति। | (हृदयस्य) |
| (इन्द्रियाणि) | प्रेरयन्ति | = | प्रेरणं कुर्वन्ति। | (इन्द्रियाणाम्) |
| (कुरुक्षेत्रम्) | प्रविशति | = | प्रवेशं करोति। | (कुरुक्षेत्रस्य) |
| (जयम्) | उद्घोषयति | = | उद्घोषणं करोति। | (जयस्य) |

1. कोष्ठकात् उचितं पदं चित्वा वाक्यं पूरयत –

प्रतिष्ठापनम्, सत्कारम्, आह्वानम्, उद्घाटनम्, अर्जनम्, निबन्धनम्

| | | | |
|---|---|---|---|
| (द्वारम्) | उद्घाटयति – | ........................ करोति। | (द्वारस्य) |
| (अतिथिम् | सत्करोति – | ........................ करोति। | (अतिथेः) |
| (अश्वान्) | निबध्नाति – | ........................ करोति। | (अश्वानाम्) |
| (ध्वजम्) | प्रतिष्ठापयति – | ........................ करोति। | (ध्वजस्य) |
| (कीर्तिम्) | अर्जयामि – | ........................ करोमि। | (कीर्तेः) |
| (शत्रुम्) | आह्वयसि – | ........................ करोषि। | (शत्रोः) |

**अवधेयम्**

| | | |
|---|---|---|
| सञ्जयः | धृतराष्ट्रं | बोधयति। |
| (कर्तृपदम् – प्रथमाविभक्तिः) | (कर्मपदम् – द्वितीयाविभक्तिः) | क्रियापदम् |
| ↓ | ↓ | ↓ |
| सञ्जयः | धृतराष्ट्रस्य | बोधनं करोति। |
| (कर्तृपदम् – प्रथमाविभक्तिः) | (कर्मपदम् – षष्ठीविभक्तिः) | क्रियापदं विभज्य लिखितम्) |

* विभज्य = क्रियापदस्य विभागं कृत्वा

यथा – आकर्षति = आकर्षणं करोति।

निवेदयति = निवेदनं करोति।

www.thearyasamaj.org



2. अधः लिखितानि वाक्यानि यथोदाहरणं परिवर्त्य लिखत –

यथा – 1. एषः (घटः) घटस्य पूरणं करोति।

2. घोषः (हृदयम्) ............................ विदारणं करोति।

3. कृष्णः (रथः) ............................ स्थापनं करोति।

4. वयम् (इन्द्रियाणि) ............................ प्रेरणं कुर्मः।

5. अर्जुनः (गीतामृतम्) ............................ पानं करोति।

6. भीमः (दुश्शासनः) ............................ मारणं करोति।

7. सहदेवः (शकुनिः) ............................ हननं करोति।

8. एषः (इन्द्रियाणि) ............................ संयमनं करोति।

9. कृष्णः गोपिकानां (वस्त्राणि) ............................ अपहरणं करोति।

10. योगी सर्वत्र (ईश्वरः) ............................ ईक्षणं करोति।

11. पुण्यकृत् (पापम्) ............................ तरणं करोति।

12. अहं (श्लोकः) ............................ अनुवादं करोमि।

3. क्रियापदानि विभज्य लिखत –

| क्रियापदानि | क्रियापदानां विभजनम् |
|---|---|
| 1. अलङ्करोति | अलङ्कारं करोति। |
| 2. परिचिन्तयति | ................................ । |
| 3. बोधयामि | ................................ । |
| 4. पिबति | ................................ । |
| 5. प्रक्षालयसि | ................................ । |
| 6. निर्गच्छति | ................................ । |
| 7. प्रविशथ | ................................ । |
| 8. परिभ्रमति | ................................ । |
| 9. अनुसरति | ................................ । |
| 10. स्मरति | ................................ । |
| 11. छिनत्ति | छेदनं करोति। |
| 12. अभिनन्दति | ................................ । |
| 13. आवृणोति | ................................ । |

www.thearyasamaj.org

14. स्तुवन्ति ................................ ।
15. शोषयति ................................ ।
16. सङ्गृह्णाति ................................ ।
17. गायसि गानं ............................ ।

## 4. यथोदाहरणं वाक्यानि रचयत –

उदा – नमनं करोषि। नमसि।
1. दहनं करोति। सः .................. ।
2. सङ्ग्रहणं कुर्मः। ..................... ।
3. अधिगमनं करोति। एषः ................ ।
4. जीवनं कुरुथ। ..................... ।
5. चिन्तनं कुरुतः। ..................... ।
6. अन्वेषणं कुर्वः। ..................... ।
7. परिहरणं कुर्वन्ति। ताः ................ ।
8. छेदनं करोति। सा .................. ।
9. भ्रमणं करोमि। ..................... ।
10. अर्जनं करोति। भवान् .............. ।

## 5. यथोदाहरणं वाक्यानि रचयत –

| | | |
|---|---|---|
| उदा – वाचनं करोमि। | (श्लोकः) | अहं श्लोकस्य वाचनं करोमि। |
| स्मरणं करोति। | (अहम्) | कः मम स्मरणं करोति ? |
| 1. लेखनं कुर्मः। | (इतिहासः) | ........................ । |
| 2. पूजनं कुर्वन्ति। | (देवताः) | ........................ । |
| 3. धारणं करोषि। | (वस्त्रम्) | ........................ । |
| 4. अर्जनं करोति। | (ज्ञानम्) | ........................ । |
| 5. आह्वानं कुर्वन्ति। | (सारथिः) | ........................ । |
| 6. स्थापनं करोति। | (रथः) | ........................ । |
| 7. विदारणं करोति। | (हृदयानि) | ........................ । |
| 8. उद्घाटनं करोषि। | (कार्यक्रमाः) | ........................ । |

www.thearyasamaj.org



# 19 स्वधर्मे निधनं श्रेयः

उच्चैः पठत, अवगच्छत च –

सप्तमीविभक्तिः



महाराजः गजे उपविशति।
खगाः आकाशे विहरन्ति।
आञ्जनेयः ध्वजे विलसति।
छात्राः विद्यालये पठन्ति।



बाणाः तूणीरे सन्ति।
योद्धारः रणक्षेत्रे युध्यन्ते।
श्रान्तः कुटीरे निद्राति।
बालः गृहे तिष्ठति।



किङ्किण्यौ पादयोः स्तः।
भटाः रथयोः सन्ति।
फलानि वृक्षयोः सन्ति।
कङ्कणानि हस्तयोः सन्ति।



शिशुः प्रेङ्खायाम् अस्ति।
चित्रं वेदिकायाम् अस्ति।
वर्णाः पिच्छिकायां सन्ति।
जनाः वाटिकायां विहरन्ति।



औषधं कूप्याम् अस्ति।
नौका नद्याम् अस्ति।
वस्तूनि प्रदर्शिन्यां सन्ति।
जलं वाप्याम् अस्ति।



पर्णानि लतयोः सन्ति।
यात्रिकाः नौकयोः सन्ति।
वस्त्राणि पेटिकयोः सन्ति।
पुस्तकानि निधानिकयोः सन्ति।

www.thearyasamaj.org





जलं द्रोण्योः अस्ति ।
मीनाः नद्योः सन्ति ।
तैलं दर्व्योः अस्ति ।
मशी पुनःपूरण्योः अस्ति ।



चक्राणि स्यन्दनयोः सन्ति ।
अश्रूणि नेत्रयोः सन्ति ।
अलङ्कारः द्वारयोः अस्ति ।
चित्राणि पुस्तकयोः सन्ति ।



जनाः मार्गेषु गच्छन्ति ।
खड्गाः कोषेषु सन्ति ।
वानराः वृक्षेषु क्रीडन्ति ।
विचाराः ग्रन्थेषु भवन्ति ।



सर्पाः शाखासु सञ्चरन्ति ।
वार्ताः पत्रिकासु सन्ति ।
सिंहाः गुहासु वसन्ति ।
छात्राः वाटिकासु विहरन्ति ।



अराः चक्रेषु सन्ति ।
माधुर्यं फलेषु भवति ।
मृगाः वनेषु भवन्ति।



अङ्गुलीयकानि अङ्गुलीषु सन्ति ।
आपणाः वीथीषु सन्ति ।
हंसाः वापीषु तरन्ति ।

www.thearyasamaj.org



## अभ्यासः

1. यथोदाहरणं पूरयत

**अकारान्तपुंलिङ्गशब्दाः**

| | एकव. | द्विव. | बहुव. |
|---|---|---|---|
| ग्रन्थः | ग्रन्थे | ग्रन्थयोः | ग्रन्थेषु |
| देहः | .......... | .......... | .......... |
| जनः | .......... | .......... | .......... |
| यज्ञः | .......... | .......... | .......... |
| कालः | .......... | .......... | .......... |

**इकारान्तपुंलिङ्गशब्दाः**

| | | | |
|---|---|---|---|
| अग्निः | अग्नौ | अग्न्योः | अग्निषु |
| मुनिः | .......... | .......... | .......... |
| राशिः | .......... | .......... | .......... |
| गिरिः | .......... | .......... | .......... |

**उकारान्तपुंलिङ्गशब्दाः**

| | | | |
|---|---|---|---|
| गुरुः | गुरौ | गुर्वोः | गुरुषु |
| असुः | .......... | .......... | .......... |
| इषुः | .......... | .......... | .......... |
| बाहुः | .......... | .......... | .......... |

**ऋकारान्तपुंलिङ्गशब्दाः**

| | | | |
|---|---|---|---|
| कर्ता | कर्तरि | कर्त्रोः | कर्तृषु |
| पिता | .......... | .......... | .......... |
| योद्धा | .......... | .......... | .......... |
| धाता | .......... | .......... | .......... |

**आकारान्तस्त्रीलिङ्गशब्दाः**

| | | | |
|---|---|---|---|
| सेना | सेनायाम् | सेनयोः | सेनासु |
| गीता | .......... | .......... | .......... |
| अम्बा | .......... | .......... | .......... |

www.thearyasamaj.org

### इकारान्तस्त्रीलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| सृतिः | सृत्याम् | सृत्योः | सृतिषु |
| गतिः | .......... | .......... | .......... |

### ईकारान्तस्त्रीलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| नदी | नद्याम् | नद्योः | नदीषु |
| आवर्तिनी | .......... | .......... | .......... |

### उकारान्तस्त्रीलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| रज्जुः | रज्ज्वाम् | रज्ज्वोः | रज्जुषु |
| धेनुः | .......... | .......... | .......... |

### ऊकारान्तस्त्रीलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| वधूः | वध्वाम् | वध्वोः | वधूषु |
| चमूः | .......... | .......... | .......... |

### ऋकारान्तस्त्रीलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| माता | ......... | .......... | .......... |

### अकारान्तनपुंसकलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| क्षेत्रम् | क्षेत्रे | क्षेत्रयोः | क्षेत्रेषु |
| अयनम् | .......... | .......... | .......... |
| स्यन्दनम् | .......... | .......... | .......... |
| शस्त्रम् | .......... | .......... | .......... |

### इकारान्तनपुंसकलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| वारि | वारिणि | वारिणोः | वारिषु |
| अक्षि | अक्षिणि | अक्ष्णोः | अक्षिषु |

### उकारान्तनपुंसकलिङ्गशब्दाः

| | | | |
|---|---|---|---|
| मधु | मधुनि | मधुनोः | मधुषु |
| जानु | .......... | .......... | .......... |
| श्मश्रु | .......... | .......... | .......... |
| अश्रु | .......... | .......... | .......... |

www.thearyasamaj.org



2. आवरणे विद्यमानस्य शब्दस्य सप्तमीविभक्तिरूपेण रिक्तस्थानानि पूरयत ।

1. ब्रह्मसरोवरः (कुरुक्षेत्रम्) ..................... अस्ति ।
2. नर्तकाः (मञ्चः) ..................... नृत्यन्ति ।
3. गङ्गोत्री (हिमगिरिः) ..................... अस्ति ।
4. नीतिकथाः (पुराणानि) ..................... सन्ति ।
5. हंसाः (तडागः) ..................... तरन्ति ।
6. अश्वाः (युद्धभूमिः) ..................... धावन्ति ।
7. सिंहाः (गुहाः) ..................... वसन्ति ।
8. वृक्षायुर्वेदः (अग्निपुराणम्) ..................... अस्ति ।
9. कृषकाः (केदाराः) ..................... बीजानि वपन्ति ।
10. फलानि (जलम्) ..................... निपतन्ति ।
11. शुकनासोपदेशः (कादम्बरी) ..................... अस्ति ।
12. पक्षिणः (नीडानि) ..................... निवसन्ति ।
13. सैनिकस्य (जानु) ..................... व्रणः अभवत् ।
14. विमानानि (खम्) ..................... सञ्चरन्ति ।
15. सन्यासी (देहः) ..................... अभिमानं न करोति ।
16. सद् इति शब्दः (सद्भावः) ..................... प्रयोगम् अर्हति ।
17. भक्तः (बुद्धिः) ..................... शरणम् अन्विच्छति ।
18. परमेश्वरः (पृथिवी) ..................... पुण्यः गन्धः ।
19. यतिः (संसिद्धिः) ..................... पुनः यतते ।
20. त्वं (शुचिः) ..................... देशे आसनं स्थापय ।
21. (कार्याकार्यव्यवस्थितिः) ..................... शास्त्रम् एव प्रमाणम् ।
22. तव बुद्धिः (समाधिः) ..................... अचला तिष्ठति ।
23. पण्डितः (ब्राह्मणः) (श्वपाकः) (गौः) ..................... च समदर्शी भवति ।
24. ईश्वरः सर्वभूतानां (हृद्देशः) ..................... तिष्ठति ।
25. (आपत्तयः) ..................... वीरः धैर्यं न जहाति ।
26. (चमूः) ..................... भयं नास्ति ।
27. (क्षितिः) ..................... जलम् उद्भवति ।
28. अर्जुनः (तेजोराशिः) ..................... विश्वरूपं पश्यति ।

www.thearyasamaj.org



3. कोष्ठकसाहाय्येन यथोदाहरणं वाक्यानि वदत –

| | | |
|---|---|---|
| अश्रु – नेत्रे | कन्दुकानि – स्यूतौ | कङ्कणानि – हस्तौ |
| इषवः – तूणीरे | कथाः – इतिहासौ | अश्वाः – अयने |
| योद्धारः – सेने | औषधम् – कूप्यौ | नूपुरे – पादौ |

उदा – अश्रु नेत्रयोः अस्ति।

4. यथोदाहरणं वाक्यानि रचयत –




गिरयः – सर्पः गिरिषु सञ्चरति।

कन्दराः – ................................ ।

गुल्माः – ................................ ।

गुहाः – ................................ ।

तरवः – ................................ ।

लताः – ................................ ।

बिलानि – ................................ ।

वल्मीकानि – ................................ ।

शाखाः – ................................ ।

सप्तमीविभक्तिः विशेषप्रयोगाः

विषयरूपः आधारः

5. यथोदाहरणं वाक्यानि वदत –




उदा – मम गीतायाम् अभिरुचिः अस्ति।

www.thearyasamaj.org

6. स्वस्य वर्धनाय कुत्र कुत्र आसक्तिः भवतु, कुत्र कुत्र मास्तु इति निर्णयत –

| | |
|---|---|
| धर्मः | मोहः |
| लोभः | सत्सङ्गः |
| त्यागः | पुण्यम् |
| कीर्तिः | पापम् |
| साधना | भोगः |
| पठनम् | शान्तिः |

यथा – १. धर्मे आसक्तिः भवतु।

२. ........................................।

३. ........................................।

४. ........................................।

५. ........................................।

६. ........................................।

७. ........................................।

८. ........................................।

९. ........................................।

१०. ........................................।

११. ........................................।

१२. ........................................।

एतानि सप्तमीविभक्तिरूपाणि सावधानतया पठत –

| | | | | |
|---|---|---|---|---|
| तत् | – पुंलिङ्गे नपुंसकलिङ्गे च | – तस्मिन् | तयोः | तेषु |
| | स्त्रीलिङ्गे | तस्याम् | तयोः | तासु |
| एतत् | – पुंलिङ्गे नपुंसकलिङ्गे च | – एतस्मिन् | एतयोः | एतेषु |
| | स्त्रीलिङ्गे | एतस्याम् | एतयोः | एतासु |
| किम् | – पुंलिङ्गे नपुंसकलिङ्गे च | – कस्मिन् | कयोः | केषु |
| | स्त्रीलिङ्गे | कस्याम् | कयोः | कासु |
| भवत् | – पुंलिङ्गे नपुंसकलिङ्गे च | – भवति | भवतोः | भवत्सु |
| | स्त्रीलिङ्गे | भवत्याम् | भवत्योः | भवतीषु |
| सर्व | – पुंलिङ्गे नपुंसकलिङ्गे च | – सर्वस्मिन् | सर्वयोः | सर्वेषु |
| सर्वा | – स्त्रीलिङ्गे | सर्वस्याम् | सर्वयोः | सर्वासु |
| अस्मद् | – त्रिषु लिङ्गेषु | – मयि | आवयोः | अस्मासु |
| युष्मद् | – त्रिषु लिङ्गेषु | – त्वयि | युवयोः | युष्मासु |

www.thearyasamaj.org



7. यथोदाहरणं वाक्यानि रचयत –

उदा – बालः एतस्मिन् विनयं प्रदर्शयति।

| | | | |
|---|---|---|---|
| बालाः | एषः | विनयम् | |
| | सः | आदरम् | |
| | भवान् | प्रीतिम् | |
| | त्वम् | वात्सल्यम् | |
| | कः | प्रेम | |
| | भवती | स्नेहम् | प्रदर्शयति |
| | सा | नम्रताम् | |
| | अहम् | श्रद्धाम् | |
| | ते | शङ्काम् | करोति |
| | भवन्तः | मैत्रीम् | |
| | एते | सौजन्यम् | |
| | ताः | गौरवम् | प्रकटयति |
| | भवत्यः | आदरम् | |
| | एताः | भक्तिम् | |
| | यूयम् | कृपाम् | |
| | वयम् | विश्वासम् | |

............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............
............ ............ ............

अङ्गे ग्रहणम्, ताडनम्

8. कोष्ठके विद्यमानस्य शब्दस्य सप्तमीविभक्तिरूपेण यथोदाहरणं रिक्तस्थानं पूरयत –

उदा – शत्रुः तं (कण्ठः) कण्ठे गृह्णाति।

1. सः भवन्तं (वक्षःस्थलम्) ............... प्रहरति।
2. दुश्शासनः द्रौपदीं (केशाः) ............... गृह्णाति।
3. भीमः कीचकं (मस्तकम्) ...............ताडयति।
4. भवान् मां (पादौ) ...............किमर्थं प्रहरति ?
5. योधः शत्रुं (उदरम्) ............... ताडयति।
6. आरक्षकः चोरं (कण्ठः) ............... गृह्णाति।

www.thearyasamaj.org



**अवधेयम्**

– यस्मिन् अङ्गे ग्रहणम्, ताडनम्, प्रहरणम् इत्यादिकं भवति, तस्य अङ्गस्य सप्तमीविभक्तिः भवति।

9. कः कस्मिन् निपुणः/कुशलः इति यथोदाहरणं लिखत –

निपुणकुशलादीनां प्रयोगः

1. कर्णः धनुर्विद्यायां निपुणः।
2. ........................................।
3. ........................................।
4. ........................................।
5. ........................................।
6. ........................................।
7. ........................................।
8. ........................................।

| | |
|---|---|
| कर्णः | द्यूतक्रीडा |
| दुर्योधनः | अश्वशिक्षा |
| नलः | शिल्पकला |
| विदुरः | धनुर्विद्या |
| शकुनिः | गदायुद्धम् |
| बृहन्नला | वीणावादनम् |
| नकुलः | पाककला |
| मयः | नीतिशास्त्रम् |

**अवधेयम्**

यदा जनेषु निपुणता, कुशलता, सामर्थ्यम् – इत्यादिकं प्रकटयामः, तदा यस्मिन् सः गुणः अस्ति तस्य सप्तमीविभक्तिः भवति।

एतं श्लोकम् उच्चैः पठत –

कस्तूरीतिलकं ललाटफलके वक्षःस्थले कौस्तुभम्
नासाग्रे नवमौक्तिकं करतले वेणुं करे कङ्कणम्।
सर्वाङ्गे हरिचन्दनं च कलयन् कण्ठे च मुक्तावलिम्
गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः॥

श्रीकृष्णः कस्मिन् अङ्गे किं धरति इति वदत –

यथा – श्रीकृष्णः ललाटफलके कस्तूरीतिलकं धरति।

www.thearyasamaj.org

# 20 कृष्णः कदा उत्तिष्ठति ?

पश्यत, उच्चैः पठत अवगच्छत च –

कदा





सूर्यः कदा उदेति ?
सूर्यः प्रातः उदेति ।

सूर्यः कदा अस्तम् एति ?
सूर्यः सायम् अस्तम् एति ।

एतत् सम्भाषणम् उच्चैः पठत –



बालः – अम्ब ! कृष्णः कदा उत्तिष्ठति ?
माता – वत्स, कृष्णः उषःकाले उत्तिष्ठति ।
बालः – सः कदा स्नाति ?
माता – प्रातः एव स्नाति ।
बालः – अम्ब, कृष्णः कदा धेनूः चारयति ?
माता – वत्स, प्रातराशानन्तरं धेनूः चारयति ।
बालः – सः कदा भुङ्क्ते ?
माता – सः धेनुचारणानन्तरं भुङ्क्ते ।
बालः – कृष्णः कदा विश्राम्यति ?
माता – सः अपराह्णे वने एव विश्राम्यति ।
बालः – अम्ब ! सः कदा गृहम् आगच्छति ?
माता – सायम् आगच्छति ।
बालः – अम्ब ! अहं कृष्णस्य गृहं गच्छामि ।
माता – अद्य मास्तु, श्वः गच्छ ।
बालः – अम्ब ! कदा श्वः भविष्यति ?
माता – इदानीं निद्रां कुरु । ततः जागृहि । जागरणानन्तरं श्वः भविष्यति ।
बालः – इदानीमेव जागर्मि, इदानीमेव श्वः भवतु ।
माता – वत्स ! इदानीम् इदानीमेव । अद्य अद्य एव । ह्यः ह्यः एव । श्वः श्वः एव ।
बालः – तर्हि इदानीं शीघ्रं निद्रां करोमि ।

www.thearyasamaj.org



## अभ्यासः

1. 'कदा' इति प्रयोगद्वारा यथोदाहरणं प्रश्ननिर्माणं कुरुत -

उदा - दीपावली कार्त्तिक-अमावास्यायां भवति।
दीपावली कदा भवति ?

1. सङ्क्रान्तिः सूर्यस्य मकरराशिप्रवेशदिने भवति।
............................................................ ?
2. विजयदशमी महानवम्याः अनन्तरदिने आश्वयुजशुक्लदशम्यां भवति।
............................................................ ?
3. गुरुपूजा आषाढपूर्णिमायां भवति।
............................................................ ?
4. युगादिः चैत्रशुक्लप्रतिपदायां भवति।
............................................................ ?
5. गणेशोत्सवः भाद्रपदशुक्लचतुर्थ्यां भवति।
............................................................ ?
6. शिवरात्रिमहोत्सवः माघकृष्णचतुर्दश्यां भवति।
............................................................ ?
7. श्रीकृष्णजयन्ती श्रावणकृष्णाष्टम्यां भवति।
............................................................ ?
9. श्रीरामजन्म चैत्रशुक्लनवम्यां भवति।
............................................................ ?
8. महाभारतयुद्धसमाप्तिः अमावास्यायां भवति।
............................................................ ?
9. कृष्णस्य गीतोपदेशः (गीताजयन्ती) मार्गशीर्षशुक्लैकादश्यां भवति।
............................................................ ?
10. मनुष्याणां क्रीडासक्तिः बाल्ये भवति।
............................................................ ?
12. नराणां चिन्ता वृद्धत्वदशायां भवति।
............................................................ ?
13. तृष्णायाः शान्तिः कदापि न भवति।
............................................................ ?

www.thearyasamaj.org



# 21 श्वः कस्य जयः ?

उच्चैः पठत, जानीत च –

अद्य / श्वः / परश्वः / प्रपरश्वः
ह्यः / परह्यः / प्रपरह्यः

| | | | | | |
|---|---|---|---|---|---|
| अद्य | सोमवासरः। | सोमवासरः | ह्यः | रविवासरः। | रविवासरः |
| श्वः | मङ्गलवासरः। | मङ्गलवासरः | परह्यः | शनिवासरः। | शनिवासरः |
| परश्वः | बुधवासरः। | बुधवासरः | प्रपरह्यः | शुक्रवासरः। | शुक्रवासरः |
| प्रपरश्वः | गुरुवासरः। | गुरुवासरः | | | |

एतं प्रसङ्गम् उच्चैः पठत –

(कुरुक्षेत्रे युद्धं प्रवर्तमानम् एव अस्ति। कौरवाणां पाण्डवानां च पक्षे महारथाः रथिकाः योधाः अनेके मृताः। सहस्रशः सैनिकाः भग्नावयवाः जाताः। कर्णः अपि हतः। युद्धस्य षोडशः दिवसः। चिन्ताकुलः युधिष्ठिरः एवं विषीदति।)



''अहो मम दौर्भाग्यम्! अद्य युद्धस्य षोडशं दिनम्। ह्यः आचार्यद्रोणस्य दिवङ्गतिः। परह्यः जयद्रथस्य प्राणहानिः। प्रपरह्यः प्रियपुत्रस्य अभिमन्योः स्वर्गगमनम्। तत्पूर्वं भीष्मादीनां पतनम्। श्वः कस्य जयः कस्य पराजयः ? न जानामि। परश्वः कस्य जीवनं कस्य मरणं न जानीमः। प्रपरश्वः तदनन्तरं कस्य कस्य किं किम् इति न ज्ञातं भवति। सर्वस्य अस्य कारणं मम राज्याभिलाषः। अहम् एव सर्वविधस्य क्लेशस्य हेतुः। अहं कथं जीवानि ? हा हा हा'' (इति रोदिति......)

## अभ्यासः

1. कोष्ठकात् शब्दान् चित्वा रिक्तस्थानानि पूरयत –

प्रपरह्यः ↘ परह्यः ↓ ह्यः ↙ → आसीत्

अद्य ↓ → अस्ति

श्वः ↘ परश्वः ↓ प्रपरश्वः ↙ → भविष्यति

www.thearyasamaj.org



1. अद्य मङ्गलवासरः अस्ति।
2. ह्यः .............................. ।
3. .............................. ।
4. .............................. ।
5. .............................. ।
6. .............................. ।
7. .............................. ।

2. उपरि दत्तानाम् अभ्यासवाक्यानाम् आधारेण प्रश्नवाक्यानि रचयत –

यथा – मङ्गलवासरः कदा अस्ति ?

1. .............................. ।
2. .............................. ।
3. .............................. ।
4. .............................. ।
5. .............................. ।
6. .............................. ।

उच्चैः पठत –

इदानीम्

1. पूर्वम् अहं बालः आसम्, इदानीं युवकः अस्मि।
2. इदानीं कः समयः ? इदानीम् एकवादनम् अस्ति।
3. सैनिकाः प्रभाते शिबिरे आसन्, इदानीं युद्धक्षेत्रे सन्ति।
4. सुरेशः पूर्वं केरले आसीत्, इदानीं काश्मीरे अस्ति।
5. सरला प्रातः कार्यालयं गतवती, इदानीं नाट्यगृहं गच्छति।
6. पूर्वं हास्तिनपुरं धृतराष्ट्रः पालितवान्, इदानीं युधिष्ठिरः पालयति। पश्चात् परीक्षित् पालयिष्यति।

3. कोष्ठकस्य साहाय्येन अष्टवाक्यानि रचयत –

| | | |
|---|---|---|
| कृष्णः / कुन्ती | | निद्रामग्नः नास्मि। |
| | | तं स्मरसि। |
| सेना / योद्धारः | | जयं वदत। |
| | इदानीम् | पूजां करोति। |
| अहम् / वयम् | | खिन्नाः सन्ति। |
| | | भवतः सहायकाः स्मः। |
| त्वम् / यूयम् | | पाञ्चजन्यं धमति। |
| | | धीराः भवन्तु। |
| | | सज्जा अस्ति। |

www.thearyasamaj.org

1. ................................ ।

2. ................................ ।

3. ................................ ।

4. ................................ ।

5. ................................ ।

6. ................................ ।

7. ................................ ।

8. ................................ ।

4. यथोदाहरणं वाक्यानि रचयत –

उदा – पूर्वं दुर्योधनः – हास्तिनपुरम् – कुरुक्षेत्रम्।
पूर्वं दुर्योधनः हास्तिनपुरे आसीत्। इदानीं कुरुक्षेत्रे अस्ति।

1. अभिमन्युः – बालः – युवकः। ................................ ।
2. युद्धारम्भे अर्जुनः – खिन्नः – सन्तुष्टः। ................................ ।
3. हृषीकेशः – उत्तरप्रदेशः – उत्तराखण्डः। ................................ ।
4. इतः पूर्वं – द्वापरयुगम् – कलियुगम्। ................................ ।
5. भीष्मः पूर्वं – युद्धक्षेत्रम् – शरशय्या। ................................ ।
6. पाण्डवाः – वनम् – इन्द्रप्रस्थः। ................................ ।
7. कर्णः – सामान्यः – अङ्गराजः। ................................ ।
8. युयुत्सुः – कौरवपक्षीयः – पाण्डवपक्षीयः ................................ ।

5. 'इदानीम्' इति अव्ययस्य प्रयोगं कृत्वा वाक्यानि रचयत –

................................................................ ।

................................................................ ।

................................................................ ।

................................................................ ।

................................................................ ।

................................................................ ।

................................................................ ।

www.thearyasamaj.org



# 22 किमकुर्वत सञ्जय !

उच्चैः पठत, जानीत च –

भूतकालः अस्‌धातुः



एषः अर्जुनः अस्ति।

अज्ञातवासे एषः बृहन्नला आसीत्।





एषा द्रौपदी अस्ति।

अज्ञातवासे एषा सैरन्ध्री आसीत्।



1. युधिष्ठिरः – अज्ञातवासे एषः कङ्कः आसीत्।
2. भीमः – अज्ञातवासे एषः वल्लवः आसीत्।
3. नकुलः – अज्ञातवासे एषः ग्रन्थिकः आसीत्।
4. सहदेवः – अज्ञातवासे एषः तन्तिपालः आसीत्।

## अस्‌धातोः रूपाणि

| | वर्तमानकाले | | | भूतकाले | | |
|---|---|---|---|---|---|---|
| | एकव. | द्विव. | बहुव. | एकव. | द्विव. | बहुव. |
| प्र.पु. | अस्ति | स्तः | सन्ति | आसीत् | आस्ताम् | आसन् |
| म.पु. | असि | स्थः | स्थ | आसीः | आस्तम् | आस्त |
| उ.पु. | अस्मि | स्वः | स्मः | आसम् | आस्व | आस्म |

www.thearyasamaj.org



## अभ्यासः

1. यथोदाहरणं रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | सः वाक्पटुः आसीत्। | तौ वाक्पटू आस्ताम्। | ते वाक्पटवः आसन्। |
| म. पु. | त्वं ...............। | युवां ...............। | यूयं ...............। |
| उ. पु. | अहं ...............। | आवां ...............। | वयं ...............। |

पठत, अवगच्छत च –

| | वर्तमानकाले | भूतकाले |
|---|---|---|
| 1. | युधिष्ठिरः नगरं गच्छति। | युधिष्ठिरः नगरं गतवान्। |
| | दुर्योधनः अपि नगरं गच्छति। | दुर्योधनः अपि नगरं गतवान्। |
| | तौ सर्वान् नगरजनान् पश्यतः। | तौ सर्वान् नगरजनान् दृष्टवन्तौ। |
| | तौ सर्वैः मिलतः। | तौ सर्वैः मिलितवन्तौ। |
| | युधिष्ठिरः एकमपि दुर्जनं न प्राप्नोति। | युधिष्ठिरः एकमपि दुर्जनं न प्राप्तवान्। |
| | दुर्योधनः एकमपि सज्जनं न प्राप्नोति। | दुर्योधनः एकमपि सज्जनं न प्राप्तवान्। |
| | यथा दृष्टिः अस्ति तथा दर्शनम्। | यथा दृष्टिः आसीत् तथा दर्शनम्। |
| 2. | सैरन्ध्री सेविका अस्ति। | सैरन्ध्री सेविका आसीत्। |
| | सा राज्ञीं सेवते। | सा राज्ञीं सेवितवती। |
| | सा केशप्रसाधनं करोति। | सा केशप्रसाधनं कृतवती। |
| | सा प्रतिफलं न इच्छति। | सा प्रतिफलं न इष्टवती। |
| | सा नम्रतया तिष्ठति। | सा नम्रतया स्थितवती। |
| 3. | त्वं देशभक्तिगीतं गायसि। | त्वं देशभक्तिगीतं गीतवती। |
| | युवां सर्वदा सत्यं वदथः। | युवां सर्वदा सत्यम् उक्तवन्तौ। |
| | यूयं भजध्वे। | यूयं भक्तवन्तः। |
| | अहं भुञ्जे। | अहं भुक्तवान्। |

www.thearyasamaj.org



2. यथोदाहरणं रिक्तस्थानानि पूरयत –

क्तवतुप्रत्ययान्तं रूपं पुंलिङ्गे

| लट्लकाररूपम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पठति | पठितवान् | पठितवन्तौ | पठितवन्तः |
| इच्छति | इष्टवान् | इष्टवन्तौ | इष्टवन्तः |
| करोति | कृतवान् | ........... | ........... |
| गायति | ........... | ........... | गीतवन्तः |
| धरति | धृतवान् | धृतवन्तौ | ........... |
| भजति | ........... | ........... | भक्तवन्तः |
| क्रीडति | क्रीडितवान् | क्रीडितवन्तौ | ........... |
| नयति | नीतवान् | नीतवन्तौ | ........... |
| गर्जति | गर्जितवान् | ........... | गर्जितवन्तः |
| भ्रमति | ........... | ........... | ........... |
| शृणोति | ........... | ........... | ........... |
| तपति | ........... | ........... | तप्तवन्तः |
| बोधयति | ........... | ........... | बोधितवन्तः |
| लिखति | लिखितवान् | ........... | लिखितवन्तः |
| हसति | ........... | हसितवन्तौ | ........... |
| नमति | नतवान् | ........... | ........... |
| ददाति | ........... | दत्तवन्तौ | ........... |
| पृच्छति | ........... | ........... | पृष्टवन्तः |
| ब्रूते | ........... | उक्तवन्तौ | ........... |
| ईक्षते | ........... | ........... | ईक्षितवन्तः |
| लभते | लब्धवान् | ........... | ........... |
| आस्ते | आसितवान् | ........... | ........... |
| युध्यते | युद्धवान् | ........... | ........... |

www.thearyasamaj.org



3. यथोदाहरणं रिक्तस्थानानि पूरयत-

क्तवतुप्रत्ययान्तं रूपं स्त्रीलिङ्गे

| लट्लकाररूपम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| पिबति | पीतवती | पीतवत्यौ | पीतवत्यः |
| करोति | कृतवती | कृतवत्यौ | कृतवत्यः |
| वदति | उदितवती | ........... | ........... |
| पश्यति | ........... | दृष्टवत्यौ | ........... |
| गच्छति | गतवती | ........... | ........... |
| क्षिपति | ........... | ........... | क्षिप्तवत्यः |
| जपति | जपितवती | ........... | ........... |
| नयति | ........... | नीतवत्यौ | ........... |
| तिष्ठति | स्थितवती | ........... | ........... |
| कूजति | कूजितवती | ........... | ........... |
| पृच्छति | ........... | ........... | पृष्टवत्यः |
| कथयति | कथितवती | कथितवत्यौ | ........... |
| शृणोति | श्रुतवती | ........... | ........... |
| हसति | हसितवती | ........... | ........... |
| चलति | ........... | ........... | चलितवत्यः |
| क्रीडति | क्रीडितवती | ........... | ........... |
| गायति | ........... | ........... | गीतवत्यः |
| तपति | ........... | ........... | तप्तवत्यः |
| शेते | शयितवती | ........... | ........... |
| जानीते | ........... | ज्ञातवत्यौ | ........... |
| यतते | ........... | ........... | यत्तवत्यः |
| लभते | लब्धवती | ........... | ........... |

www.thearyasamaj.org



4. ह्यः भवान् / भवती 'किं किं कृतवान् / कृतवती' इति पञ्च वाक्यानि लिखत –

1. अहं ह्यः एकं संस्कृतगीतं लिखितवान्।
2. ............................................ ।
3. ............................................ ।
4. ............................................ ।
5. ............................................ ।

5. रिक्तस्थानानि क्तवतुप्रत्ययान्तरूपैः पूरयत –

| | | |
|---|---|---|
| 1. अहम् आश्रमं <u>गतवान्</u>। | | (गम्) |
| 2. त्वं तत्र कदा | ................ ? | (गम्) |
| 3. वयम् एकस्य वृद्धस्य जीवनकथां | ................ । | (श्रु) |
| 4. सः पूर्वं योगशास्त्रं | ................ । | (पठ्) |
| 5. तत्र निपुणतां | ................ । | (प्राप्) |
| 6. किन्तु जीवने तद् न | ................ । | (आ+नी) |
| 7. तेन दुःखं | ................ । | (प्राप्) |
| 8. कुत्रापि ज्ञानं न | ................ । | (दा) |
| 9. अनन्तरं वृद्धाश्रमम् | ................ । | (आ+गम्) |
| 10. किं त्वम् एतां घटनां | ................ ? | (श्रु) |
| 11. यूयं तत्र | ................ । | (स्था) |
| 12. आवाम् एतस्मिन् विषये चिन्तनं | ................ । | (कृ) |
| 13. वयं जीवने योगशास्त्रम् | ................ । | (आ+चर्) |
| 14. कुरुक्षेत्रे कौरवपाण्डवाः | ................ । | (युध्) |
| 15. अर्जुनः सैन्यम् | ................ । | (ईक्ष्) |

www.thearyasamaj.org



उच्चैः पठत, जानीत च –

| वर्तमानकालः (लट्) | भूतकालः (लङ्) |
|---|---|
| सुरेशः भक्तियोगं पठति। | सुरेशः भक्तियोगम् अपठत्। |
| श्यामः गीताप्रदर्शिनीं पश्यति। | श्यामः गीताप्रदर्शिनीम् अपश्यत्। |
| ताः मथुरां गच्छन्ति। | ताः मथुराम् अगच्छन्। |
| क्षत्रियः युद्धं लभते। | क्षत्रियः युद्धम् अलभत। |
| सर्वे कर्मणः फलं भुञ्जते। | सर्वे कर्मणः फलम् अभुञ्जत। |
| अहं कृष्णं भजे। | अहं कृष्णम् अभजे। |
| अर्जुनः प्रज्ञावादान् भाषते। | अर्जुनः प्रज्ञावादान् अभाषत। |
| सात्त्विकाः देवान् यजन्ते। | सात्त्विकाः देवान् अयजन्त। |

उच्चैः पठत, लिखत च –

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| चल् | प्र. पु. | अचलत् | अचलताम् | अचलन् |
| | म.पु. | अचलः | अचलतम् | अचलत |
| | उ.पु. | अचलम् | अचलाव | अचलाम |
| दृश् | प्र.पु. | अपश्यत् | अपश्यताम् | अपश्यन् |
| | म.पु. | अपश्यः | अपश्यतम् | अपश्यत |
| | उ.पु. | अपश्यम् | अपश्याव | अपश्याम |
| स्था | प्र.पु. | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| | म.पु. | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| | उ.पु. | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |
| इष् | प्र.पु. | ऐच्छत् | ऐच्छताम् | ऐच्छन् |
| | म.पु. | ऐच्छः | ऐच्छतम् | ऐच्छत |
| | उ.पु. | ऐच्छम् | ऐच्छाव | ऐच्छाम |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| भाष | प्र.पु. | अभाषत | अभाषेताम् | अभाषन्त |
| | म.पु. | अभाषथाः | अभाषेथाम् | अभाषध्वम् |
| | उ.पु. | अभाषे | अभाषावहि | अभाषामहि |
| ब्रू | प्र.पु. | अब्रूत | अब्रुवाताम् | अब्रुवत |
| | म.पु. | अब्रूथाः | अब्रुवाथाम् | अब्रूध्वम् |
| | उ.पु. | अब्रुवि | अब्रूवहि | अब्रूमहि |

## अभ्यासः

6. वाक्यानि वदत, अभ्यासं च कुरुत –

प्रथमपुरुषः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सः / सा / भवान् / भवती | तौ / ते / भवन्तौ / भवत्यौ | ते / ताः / भवन्तः / भवत्यः |
| अपठत् / अचलत्<br>अलभत / असेवत | अपठताम् / अचलताम्<br>अलभेताम् / असेवेताम् | अपठन् / अचलन्<br>अलभन्त / असेवन्त |

मध्यमपुरुषः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| त्वम् | युवाम् | यूयम् |
| अपठः / अचलः<br>अलभथाः / असेवथाः | अपठतम् / अचलतम्<br>अलभेथाम् / असेवेथाम् | अपठत / अचलत<br>अलभध्वम् / असेवध्वम् |

www.thearyasamaj.org



उत्तमपुरुषः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अहम् | आवाम् | वयम् |
| अपठम् / अचलम् | अपठाव / अचलाव | अपठाम / अचलाम |
| अलभे / असेवे | अलभावहि / असेवावहि | अलभामहि / असेवामहि |

7. यथोदाहरणं धातूनां रूपाणि लिखत –

| धातुः | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| पठ् | (प्र.पु) | अपठत् | अपठताम् | अपठन् |
| शुच् | (प्र.पु.) | अशोचत् | अशोचताम् | अशोचन् |
| नम् | (म.पु) | अनमः | .............. | .............. |
| वद् | (उ.पु) | .............. | अवदाव | .............. |
| चर् | (म.पु) | .............. | .............. | अचरत |
| स्था | (प्र.पु) | .............. | अतिष्ठताम् | .............. |
| हृ | (म.पु) | अहरः | .............. | .............. |
| ज्ञा | (उ.पु) | अजानाम् | .............. | .............. |
| आ + गम् | (प्र.पु) | .............. | .............. | आगच्छन् |
| पत् | (म.पु) | .............. | अपततम् | .............. |
| दृश् | (उ.पु) | अपश्यम् | .............. | .............. |
| भ्रम् | (प्र.पु) | .............. | .............. | अभ्रमन् |
| स्मृ | (म.पु) | .......... | अस्मरतम् | .............. |
| गै | (उ.पु) | अगायम् | .............. | .............. |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| प्रच्छ | (प्र.पु) | .............. | .............. | अपृच्छन् |
| श्रु | (म.पु) | .............. | अशृणुतम् | .............. |
| कथ् | (प्र.पु) | अकथयत् | .............. | .............. |
| रमु | (म.पु) | .............. | अरमेथाम् | .............. |
| ईक्ष | (उ.पु) | ऐक्षे | .............. | .............. |
| सेव् | (प्र.पु) | .............. | .............. | असेवन्त |

स्म

एतत् सम्भाषणम् उच्चैः पठत, अवगच्छत च –

पितामही – वत्स ! अहं ह्यः एकां कथाम् अश्रावयम् । स्मरसि किम् ?

बालकः – आम् । स्मरामि ।

पितामही – तर्हि वद, कः कः किं किं करोति स्म ?

बालकः – सञ्जयः श्रावयति स्म । धृतराष्ट्रः शृणोति स्म । अर्जुनः दुःखम् अनुभवति स्म । कृष्णः बोधयति स्म ।

पितामही – सम्यक् । कृष्णः किं करोति स्म ?

बालकः – कृष्णः पाण्डवानां मार्गदर्शनं करोति स्म । सर्वेषु उत्साहं पूरयति स्म । अश्वानां परिचरणं करोति स्म । सर्वान् युद्धनीतिं बोधयति स्म । रथं चालयति स्म । अर्जुनस्य रक्षणं कुरुते स्म ।

8. उपरितनं सम्भाषणं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

1. कः श्रावयति स्म ? ........................................ ।
2. कः दुःखम् अनुभवति स्म ? ........................................ ।
3. कृष्णः सर्वेषु किं पूरयति स्म ? ........................................ ।
4. कः रथं चालयति स्म ? ........................................ ।
5. कृष्णः कस्य रक्षणं कुरुते स्म ? ........................................ ।
6. कः कथां शृणोति स्म ? ........................................ ।

www.thearyasamaj.org



9. यथोदाहरणं पुरतः विद्यमानं धातुं पठित्वा वाक्यानि रचयत–

1. अर्जुनः धनुर्विद्यां जानाति स्म। (ज्ञा)
2. भीमः बहु ........................................। (खाद्)
3. दुर्योधनः ईर्ष्यां ....................................। (कृ)
4. कृष्णः लीलां .........................................। (दर्श्)
5. भीष्मः कौरवाणां पक्षतः ...............................। (युध्)
6. शकुनिः सर्वदा कूटं ...................................। (रच्)
7. कौरवाः पाण्डवान् न ...................................। (इच्छ्)
8. युधिष्ठिरः सत्यं .......................................। (ब्रू)
9. अर्जुनः ..................................................। (भाष्)
10. सैनिकाः ...............................................। (लोक्)

10. यथोदाहरणं रिक्तस्थानानि पूरयत –

| | | |
|---|---|---|
| 1. बालकः पठति स्म। | बालकौ पठतः स्म। | बालकाः पठन्ति स्म। |
| 2. शिशुः खेलति स्म। | ..................। | ..................। |
| 3. मुनिः जपति स्म। | ..................। | ..................। |
| 4. वधूः समाचारं पठति स्म। | ..................। | ..................। |
| 5. अहं ध्यायामि स्म। | ..................। | ..................। |
| 6. भवान् अटति स्म। | ..................। | ..................। |
| 7. एषः पाठं स्मरति स्म। | ..................। | ..................। |
| 8. भवती विषयं चिन्तयति स्म। | ..................। | ..................। |
| 9. सः सुखं लभते स्म। | तौ सुखं लभेते स्म। | ते सुखं लभन्ते स्म। |
| 10. सा मोदते स्म। | ..................। | ..................। |
| 11. अहं याचे स्म। | ..................। | ..................। |

www.thearyasamaj.org



# 23 क्रोधपिशाचः

एतां कथां पठत –



एकदा श्रीकृष्णः, बलरामः, सात्यकिः च वनविहारार्थं गतवन्तः आसन्। वने ते मार्गभ्रष्टाः जाताः। निबिडं वनं प्रविष्टवन्तः। रात्रिः सञ्जाता। तैः रात्रिं यापयितुम् एकस्य वृक्षस्य अधः उपवेष्टव्यम् आपतितम्। रात्रौ रक्षणार्थम् एकैकः अपि पर्यायरूपेण एकं प्रहरं यावत् जागरितः भवेत्, तदा अन्याभ्यां द्वाभ्यां निद्रां कर्तुं शक्यते' इति ते निश्चितवन्तः।

प्रथमः पर्यायः सात्यकेः आसीत्। सः प्रहरी सन् स्थितः। यदा अन्यौ द्वौ निद्रां कृतवन्तौ तदा वृक्षतः एकः पिशाचः अवतीर्णवान्। सः सात्यकिं मल्लयुद्धार्थम् आहूतवान्। बहूनि कटुवचनानि उक्तवान् च। सात्यकिः तस्य कटुवचनानां कृते तादृशानि एव उत्तराणि दत्तवान्। यदा पिशाचः सात्यकेः शरीरे मुष्टिप्रहारं

www.thearyasamaj.org



कृतवान् तदा सात्यकिः तदुपरि पादप्रहारं कृतवान्। पूर्णं प्रहरं यावत् तयोः मल्लयुद्धं प्राचलत्। तेन सात्यकेः शरीरे बहवः क्षताः सञ्जाताः। सः नितरां श्रान्तः। किन्तु तस्मिन् समये सहयोगिनोः उत्थापनस्य अपेक्षया निद्राकरणम् एव उचितम् इति विचिन्त्य सः निद्रां कृतवान्।

द्वितीयः पर्यायः बलरामस्य आसीत्। तम् अपि पिशाचः मल्लयुद्धार्थम् आहूतवान्। कटुवचनैः निन्दितवान् च। मल्लयुद्धे महावीरेण बलरामेण अपि सा एव गतिः प्राप्ता। श्रान्तः सः अपि प्रहरान्ते निद्रां कृतवान्।

तृतीये पर्याये श्रीकृष्णः सुरक्षानिमित्तम् आगतवान्। तम् अपि पिशाचः मल्लयुद्धार्थम् आहूतवान्। कृष्णः हसन् एव युद्धं कर्तुम् आरब्धवान्। उक्तवान् च "भवान् बहुविनोदप्रियः इव भासते। मम निद्राम् आलस्यं च दूरीकर्तुमेव भवान् मित्रम् इव विनोदं कुर्वन्नस्ति" इति। तदा पिशाचस्य बलं न्यूनं जातम्। तस्य शरीरम् अपि सङ्कुचत् गतम्। अन्ते सः 'झिल्लिका' इव लघुशरीरः जातः। तदा श्रीकृष्णः तम् स्वस्य उत्तरीयस्य अञ्चले बद्धवान्।

प्रातः यदा ते प्रस्थिताः तदा सात्यकिः बलरामः च पिशाचेन सह रात्रौ सञ्जातस्य मल्लयुद्धस्य वर्णनं कृतवन्तौ। तेन सञ्जातान् क्षतान् अपि दर्शितवन्तौ। श्रीकृष्णः हसन् पिशाचम् उत्तरीयस्य अञ्चलतः निष्कास्य करतले स्थापितवान्, उक्तवान् च – "एषः अस्ति क्रोधपिशाचः। एतस्य प्रकृतिः एषा अस्ति प्रत्युत्तरदानेन एषः वर्धते, उग्रतां च प्राप्नोति। किन्तु यदि उपेक्षां कुर्मः तर्हि सः स्वयमेव दुर्बलः भवति, लघुरूपं प्राप्नोति" इति।

क्रोधपिशाचस्य स्वरूपं तदा ज्ञातवन्तौ सात्यकिबलरामौ।

## अभ्यासः

1. एतेषां प्रश्नानाम् उत्तरं लिखत –

1. प्रथमपर्याये कः रक्षणं कृतवान् ? .......................................... ।
2. कः मल्लयुद्धार्थम् आहूतवान् ? .......................................... ।
3. पिशाचः किम् उक्तवान् ? .......................................... ।
4. बलरामः प्रहरान्ते किं कृतवान् ? .......................................... ।
5. कस्मिन् पर्याये श्रीकृष्णः सुरक्षानिमित्तम् आगतवान् ?.......................................।
6. कृष्णः पिशाचं कुत्र बद्धवान् ? .......................................... ।
7. मल्लयुद्धस्य वर्णनं कौ कृतवन्तौ ? .......................................... ।

www.thearyasamaj.org



## 2. एतेषाम् उत्तराणां प्रश्ननिर्माणं कुरुत –

1. त्रयः निबिडं वनं प्रविष्टवन्तः। .................................... ।
2. सात्यकिः प्रथमः प्रहरी सन् स्थितः। .................................... ।
3. पिशाचः मल्लयुद्धार्थम् आहूतवान्। .................................... ।
4. कृष्णः हसन् युद्धम् आरब्धवान् । .................................... ।
5. कृष्णः पिशाचम् उत्तरीयस्य अञ्चले बद्धवान्। .................................... ।
6. कृष्णः पिशाचम् अञ्चलतः निष्कासितवान्। .................................... ।

## 3. असमानार्थकं शब्दं विचिनुत –

1. श्रीकृष्णः – अच्युतः, गुडाकेशः, वार्ष्णेयः, हृषीकेशः ............... ।
2. मार्गः – अयनम्, प्रगतिः, वर्त्म, सृतिः ............... ।
3. युद्धम् – आनकः, आहवः, सङ्ग्रामः, युध् ............... ।
4. शरीरम् – तनुः, कलेवरम् , देहः, ततम् ............... ।
5. मित्रम् – सखा, शुचिः, सुहृद्, सहायः ............... ।
6. सैन्यम् – सेना, अनीकम् , चमूः, हृषीकम् ............... ।

## 4. शुद्धवाक्यानां पुरतः( ✓) चिह्नं लिखत –

1. एकदा श्रीकृष्णः, अर्जुनः, सात्यकिः च वनविहारार्थं गतवन्तः। (......)
2. रात्रौ रक्षणार्थं त्रयः उपविष्टवन्तः। (......)
3. प्रथमः पर्यायः कृष्णस्य आसीत्। (......)
4. पिशाचः मल्लयुद्धार्थम् आहूतवान्। (......)
5. कृष्णः पिशाचं वृक्षे बद्धवान्। (......)
6. क्रोधपिशाचस्य प्रकृतिः एषा उपेक्षया क्षीणा भवति। (......)

www.thearyasamaj.org

# 24 संशयात्मा विनश्यति

पश्यत उच्चैः पठत च –

उपसर्गाः



भीष्मः गच्छति।



कुन्ती आगच्छति।
आ + गच्छति।



कृष्णः धावति। कालयवनः अनुधावति।
अनु + धावति

1. भीष्मः गङ्गां दृष्ट्वा आगच्छति।
2. एकलव्यः द्रोणाचार्यं प्रणमति।
3. कृष्णस्य भक्ताः न प्रणश्यन्ति।
4. अर्जुनस्य मुखं परिशुष्यति।
5. कामात् क्रोधः अभिजायते।
6. आत्मा प्रसादम् अधिगच्छति।
7. संशयात्मा विनश्यति।
8. भगवान् वर्षं निगृह्णाति उत्सृजति च।
9. मनुष्यः कार्याणि कुर्वन् सिद्धिम् अवाप्स्यति।
10. कर्मयोगी विशिष्यते।
11. योगिनः यज्ञं पर्युपासते।
12. स्वभावः तु प्रवर्तते।
13. जगत् विपरिवर्तते।
14. कार्याणि आत्मवन्तं न निबध्नन्ति।
15. विवस्वान् योगं मनवे प्राह।
16. विमूढाः जीवात्मानं न अनुपश्यन्ति।
17. पण्डिताः सांख्ययोगौ पृथक् न प्रवदन्ति।
18. विभुः कस्यचित् पापं न आदत्ते।

www.thearyasamaj.org



उच्चैः पठत, जानीत च –

| उपसर्गः | धातुः | क्रियापदम् | उपसर्गसहितम् |
|---|---|---|---|
| आ | गम् | गच्छति | आगच्छति |
| आ | नी | नयति | आनयति |
| उत् | स्था | तिष्ठति | उत्तिष्ठति |
| अनु | सृ | सरति | अनुसरति |
| अनु | वद् | वदति | अनुवदति |
| अनु | धा | धावति | अनुधावति |
| अनु | कृ | करोति | अनुकरोति |
| वि | लिख् | लिखति | विलिखति |
| वि | हृ | हरति | विहरति |
| वि | स्मृ | स्मरति | विस्मरति |
| नि | क्षिप् | क्षिपति | निक्षिपति |
| प्र | हृ | हरति | प्रहरति |
| प्र | क्षाल् | क्षालयति | प्रक्षालयति |
| परि | पाल् | पालयति | परिपालयति |
| परि | प्रच्छ् | पृच्छति | परिपृच्छति |
| अव | गम् | गच्छति | अवगच्छति |
| अव | नम् | नमति | अवनमति |
| अधि | वस् | वसति | अधिवसति |
| उप | कृ | करोति | उपकरोति |
| सम् | ग्रह् | गृह्णाति | सङ्गृह्णाति |
| सम् | हृ | हरति | संहरति |
| निस् | सृ | सरति | निस्सरति |
| परा | भू | भवति | पराभवति |
| अप | कृ | करोति | अपकरोति |
| अभि | ज्ञा | जानाति | अभिजानाति |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| अनु | शुच् | शोचति | अनुशोचति |
| प्र | हा | जहाति | प्रजहाति |
| प्र | ब्रू | आह | प्राह * 1 |
| उत् | सृ | सृजति | उत्सृजति |
| अव | लोक् | लोकते | अवलोकते |
| नि | युज् | युङ्क्ते | नियुङ्क्ते |
| अधि | इण् | ....... | अधीते * 2 |
| अनु | वृत् | वर्तते | अनुवर्तते |
| उप | जनी | जायते | उपजायते |
| वि | ईक्ष् | ईक्षते | वीक्षते |
| प्र | भाष | भाषते | प्रभाषते |
| अनु | सज्ज | सज्जते | अनुषज्जते |

**अवधेयम्**

* 1 ब्रूधातुः उभयपदी। ब्रवीति, ब्रूते इति रूपद्वयम्। तस्य वर्तमानकाले 'आह' इत्यपि रूपान्तरमस्ति।

* 2 इण्धातुः 'अधि' उपसर्गेण सहितः एव प्रयुज्यते।

1. उपसर्गं क्रियापदं च योजयित्वा लिखत –

| उपसर्गः | क्रियापदम् | उपसर्गसहितम् |
|---|---|---|
| वि | लिखति | विलिखति |
| प्र | पठति | .................. |
| अनु | गच्छति | .................. |
| सम् | हरति | .................. |
| प्र | नमति | प्रणमति |
| सम् | तुष्यति | .................. |
| परि | त्यजति | .................. |
| आ | नयति | .................. |
| परि | हरति | .................. |

www.thearyasamaj.org



| | | |
|---|---|---|
| प्र | भवति | प्रभवति |
| अनु | वदति | ………………… |
| वि | तरति | ………………… |
| अव | गच्छति | ………………… |
| नि | क्षिपति | निक्षिपति |
| उप | करोति | ………………… |
| उत् | पतति | ………………… |
| निस् | सरति | ………………… |
| अधि | वसति | अधिवसति |
| अनु | सरति | ………………… |
| अव | नमति | अवनमति |
| सम् | गृह्णाति | ………………… |
| वि | नश्यति | ………………… |
| प्र | आप्नोति | ………………… |
| सम् | तरति | ………………… |
| प्र | याति | ………………… |
| सम् | जायते | ………………… |
| प्र | आरभते | ………………… |
| आ | दत्ते | ………………… |
| उप | रमते | ………………… |
| उप | पद्यते | ………………… |
| वि + नि | वर्तते | ………………… |
| परा | अयते | पलायते |

## अवधेयम्

1. क) उपसर्गाः द्वाविंशतिः सन्ति। ते च –

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप।

www.thearyasamaj.org



ख) अलम्, बहिस्, अन्तर् – इत्यादयः उपसर्गतुल्याः एव भवन्ति।

यथा – अलम् + करोति – अलङ्करोति
बहिस् + करोति – बहिष्करोति
अन्तर् + भवति – अन्तर्भवति
अन्तर् + वसति – अन्तर्वसति

ग) स्वी, उष्णी, सज्जी – इत्यादयः अपि उपसर्गतुल्याः सन्ति।

यथा – स्वी + करोति – स्वीकरोति
उष्णी + करोति – उष्णीकरोति
सज्जी + करोति – सज्जीकरोति

घ) उपसर्गनियमाः

अ) उपसर्गः धातोः पूर्वं भवति।

यथा – आ + गच्छति – आगच्छति

आ) उपसर्गेण कदाचित् धातोः अर्थः परिवर्तते।

यथा – स्मरति – विस्मरति, गच्छति – आगच्छति, पद्यते – प्रपद्यते

इ) कदाचित् उपसर्गः धातोः अर्थस्य पोषणं करोति।

यथा – शोभते – सुशोभते, लिखति – विलिखति
आरभते – प्रारभते, चरति – सञ्चरति, जायते – सञ्जायते

ई) कदाचित् धातोः पूर्वं द्वित्राः उपसर्गाः भवन्ति।

यथा – प्रति + आ + गच्छति – प्रत्यागच्छति
सम् + अधि + गच्छति – समधिगच्छति
निर् + आ + करोति – निराकरोति
सम् + उत् + आ + हरति – समुदाहरति
वि + अव + स्थापयति – व्यवस्थापयति
वि + परि + वर्तते – विपरिवर्तते
प्र + नि + पतति – प्रणिपतति
परि + उप + आस्ते – पर्युपास्ते
सम् + प्र + ईक्षते – सम्प्रेक्षते
वि + अति + तरति – व्यतितरति

www.thearyasamaj.org



उ) उपसर्गकारणतः कदाचित् परस्मैपदिधातुः आत्मनेपदिरूपम्, आत्मनेपदिधातुः परस्मैपदिरूपं च प्राप्नोति।

यथा – अ) वि + जयति (परस्मैपदी) – विजयते (आत्मनेपदी)
प्र + तिष्ठति (परस्मैपदी) – प्रतिष्ठते (आत्मनेपदी)
वि + क्रीणाति (परस्मैपदी) – विक्रीणीते (आत्मनेपदी)
अव + तिष्ठति (परस्मैपदी) – अवतिष्ठते (आत्मनेपदी)
आ) वि + रमते (आत्मनेपदी) – विरमति (परस्मैपदी)

2. यथोदाहरणम् उपसर्गसहितवाक्यानि रचयत –

| | | |
|---|---|---|
| यथा – छात्रः गृहम् आगच्छति। | | (आ + गम्) |
| 1. भक्तः देवं | ..............................। | (प्र + नम्) |
| 2. भगवान् युगे युगे | ..............................। | (सम् + भू) |
| 3. सैनिकाः शत्रून् | ..............................। | (सम् + हृ) |
| 4. माता पुत्रान् | ..............................। | (परि + पाल्) |
| 5. छात्राः गुरून् | ..............................। | (परि + प्रच्छ्) |
| 6. कविः काव्यं | ..............................। | (वि + लिख्) |
| 7. दुर्योधनः द्रौपदीम् | ..............................। | (उप + हस्) |
| 8. कर्णः धनुर्विद्यां | ..............................। | (वि +स्मृ ) |
| 9. साधुः धर्मम् | ..............................। | (अनु + सृ) |
| 10. कृष्णः सर्वान् | ..............................। | (उप + कृ) |
| 11. गङ्गा हिमलयात् | ..............................। | (नि + सृ) |
| 12. सैनिकाः आयुधानि | ..............................। | (सम् + ग्रह्) |
| 13. युधिष्ठिरः गुरोः पादौ | ..............................। | (प्र + क्षाल्) |
| 14. सत्त्वात् ज्ञानं | ..............................। | (सम् + जा) |
| 15. अर्जुनः कृष्णं | ..............................। | (प्र + भाष्) |
| 16. योगारूढः कर्मसु न | ..............................। | (अनु + सज्ज्) |
| 17. मूढाः देवं न | ..............................। | (प्र + पद्) |

www.thearyasamaj.org



उच्चैः पठत, जानीत च –

| उपसर्गसहितक्रियाः | लङ्रूपाणि | क्तवतुप्रत्ययान्तरूपाणि पुंलिङ्गे |
|---|---|---|
| आगच्छति | आ + अगच्छत् – आगच्छत् | आ + गतवान् – आगतवान् |
| आनयति | आ + अनयत् – आनयत् | आ + नीतवान् – आनीतवान् |
| प्रतिवदति | प्रति + अवदत् – प्रत्यवदत् | प्रति + उदितवान् – प्रत्युदितवान् |
| निराकरोति | निर् + आ +अकरोत् – निराकरोत् | निर् + आ+ कृतवान् – निराकृतवान् |
| अनुकरोति | अनु + अकरोत् – अन्वकरोत् | अनु + कृतवान् – अनुकृतवान् |
| प्रविशति | प्र + अविशत् – प्राविशत् | प्र + विष्टवान् – प्रविष्टवान् |
| विलिखति | वि + अलिखत् – व्यलिखत् | वि + लिखितवान् – विलिखितवान् |
| परिहरति | परि + अहरत् – पर्यहरत् | परि + हृतवान् – परिहृतवान् |
| अवगच्छति | अव + अगच्छत् – अवागच्छत् | अव + गतवान् – अवगतवान् |
| नियुङ्क्ते | नि + अयुङ्क्त – न्ययुङ्क्त | नि + युक्तवान् – नियुक्तवान् |
| अवलोकते | अव + अलोकत – अवालोकत | अव + लोकितवान् – अवलोकितवान् |
| आदत्ते | आ + अदत्त – आदत्त | आ + दत्तवान् – आदत्तवान् |
| उपजायते | उप + अजायत – उपाजायत | उप + जातवान् – उपजातवान् |
| प्रपद्यते | प्र + अपद्यत – प्रापद्यत | प्र + पन्नवान् – प्रपन्नवान् |
| निवर्तते | नि + अवर्तत – न्यवर्तत | नि + वृत्तवान् – निवृत्तवान् |

3. उदाहरणं दृष्ट्वा रिक्तस्थानं पूरयत –

| क्रियापदानि | लङ्रूपाणि | क्तवतुरूपाणि |
|---|---|---|
| आहरति | आ + अहरत् – आहरत् | आ + हृतवान् – आहृतवान् |
| आगच्छति | .......... –.......... | .................... –.................. |
| उत्तिष्ठति | उत् + अतिष्ठत् – उदतिष्ठत् | उत् + स्थितवान् – उत्थितवान् |
| अनुगच्छति | अनु + अगच्छत् – अन्वगच्छत् | .......... –.......... |
| अनुसरति | .......... –.......... | .................... –.................. |
| प्रहरति | प्र + अहरत् – प्राहरत् | प्र + हृतवान् – प्रहृतवान् |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| प्रक्षालयति | ........... – ........... | ..................... | – ................. |
| विहरति | ........... – ........... | ..................... | – ................. |
| परित्यजति | ........... – ........... | – पर्यत्यजत् | – ........... |
| निक्षिपति | ........... – ........... | – न्यक्षिपत् | – ........... |

4. उपसर्गयुक्तैः लङ्लकाररूपैः वाक्यानि पूरयत –

| | | |
|---|---|---|
| 1. पाण्डवाः अज्ञातवासात् आगच्छन् । | | (आ + गम्) |
| 2. सेना सेनापतिम् | .................। | (अनु + सृ) |
| 3. द्रोणाचार्यः शस्त्रं | .................। | (नि + क्षिप्) |
| 4. व्यासः महाभारतं | .................। | (वि + लिख्) |
| 5. अभिमन्युः व्यूहात् बहिरागमनं | .................। | (वि + स्मृ) |
| 6. देवः भक्तान् . | .................। | (परि + पाल्) |
| 7. आपः समुद्रं | .................। | (प्र + विश्) |
| 8. ईश्वरः भक्तानां समस्यां | .................। | (परि + हृ) |
| 9. भक्तः देवाय पुष्पं | .................। | (प्र + यच्छ) |
| 10. ज्ञानी वृजिनं | .................। | (सम् + तॄ) |
| 11. कृष्णात् सर्वं | .................। | (प्र + वृत्) |
| 12. अर्जुनः गाण्डीवं | .................। | (वि + सृज्) |
| 13. श्रद्धावान् शान्तिम् | .................। | (अधि + गम्) |
| 14. बुधः कृष्णं | .................। | (प्र + पद्) |
| 15. भक्ताः देवं | .................। | (प्र + नि + पत्) |
| 16. कुरुक्षेत्रे धर्मयुद्धं | .................। | (प्र + वृत्) |

5. उपसर्गयुक्तैः क्तवतुप्रत्ययान्तरूपैः (पुंलिङ्गे) वाक्यानि रचयत –

| | | |
|---|---|---|
| 1. भीमः दुर्योधनं गदया | ................... । | (प्र + हृ) |
| 2. कृष्णः गीताम् | ................... । | (उप + दिश्) |
| 3. अर्जुनः रथोपस्थे | ................... । | (उप + विश्) |
| 4. मूढाः देवं मानवम् | ................... । | (अव + ज्ञा) |
| 5. भगवान् योगं | ................... । | (प्र + ब्रू) |
| 6. शिष्यः गुरुं | ................... । | (प्र + नि + पत्) |
| 7. मुनिः सायुज्यं | ................... । | (सम् + अव + आप्) |
| 8. गुणाः देहिनं देहे | ................... । | (नि + बन्ध) |

www.thearyasamaj.org



# 25 योगक्षेमं वहाम्यहम्

द्वितीयाविभक्तिः

|  |  |  |
|---|---|---|
| कृष्णः अस्ति। | पाञ्चजन्यः अस्ति। | कृष्णः पाञ्चजन्यं धमति। |
| भीष्मः | सेना | भीष्मः सेनां नयति। |
| कृष्णः | वंशी | कृष्णः वंशीं वादयति। |

1. सारथिः रथं चालयति।
2. सज्जनः गुणं पश्यति।
3. योगी इन्द्रियनिग्रहं करोति।
4. क्रोधः सम्मोहं जनयति।
5. एकलव्यः गुरोः मूर्तिम् अर्चति।
6. बुद्धिमान् क्रोधं त्यजति।
7. गोपिकाः अक्रूरं पृच्छन्ति।
8. कृष्णः भक्तिम् इच्छति।
9. भक्तः देवं नमति।
10. बालकः गीतां पठति।

एतानि रूपाणि उच्चैः पठत –

| प्रथमाविभक्तिः | द्वितीयाविभक्तिः | | |
|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् |
| बालकः | बालकम् | बालकौ | बालकान् |
| बालिका | बालिकाम् | बालिके | बालिकाः |
| लेखनी | लेखनीम् | लेखन्यौ | लेखनीः |

## अभ्यासः

1. कोष्ठकाधारेण द्वितीयाविभक्तिं प्रयुज्य वाक्यानि पूरयत –

| | | |
|---|---|---|
| छात्रः | पाठः / पाठौ / पाठाः | पठति |
| सम्पादकौ | पत्रिका / पत्रिके / पत्रिकाः | प्रेषयतः |
| वयम् | घटी / घट्यौ / घट्यः | क्रीणीमः |
| नायिका | पुष्पम् / पुष्पे / पुष्पाणि | जिघ्रति |

www.thearyasamaj.org



| | | |
|---|---|---|
| छात्रः पाठं पठति । | छात्रः पाठौ .......... । | छात्रः पाठान् .......... । |
| सम्पादकौ ...... प्रेषयतः । | .................... । | सम्पादकौ ........... । |
| वयं .......... क्रीणीमः । | .................... । | .................... । |
| .................... । | .................... । | .................... । |

2. यथोदाहरणं रिक्तस्थानं पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सौचिकः | सौचिकम् | सौचिकौ | सौचिकान् |
| विषयः | विषयम् | विषयौ | विषयान् |
| दण्डदीपः | ............. | ............. | ............. |
| मुनिः | मुनिम् | मुनी | मुनीन् |
| सेनापतिः | ............. | ............. | ............. |
| हरिः | ............. | ............. | ............. |
| अतिथिः | ............. | ............. | ............. |
| वेणुः | वेणुम् | वेणू | वेणून् |
| शत्रुः | ............. | ............. | ............. |
| पशुः | ............. | ............. | ............. |
| असुः | ............. | ............. | ............. |
| वायुः | ............. | ............. | ............. |
| ज्ञाता | ज्ञातारम् | ज्ञातारौ | ज्ञातॄन् |
| कर्ता | ............. | ............. | ............. |
| स्रष्टा | ............. | ............. | ............. |
| हर्ता | ............. | ............. | ............. |
| शाटिका | शाटिकाम् | शाटिके | शाटिकाः |
| परिचारिका | ............. | ............. | ............. |
| विद्या | ............. | ............. | ............. |
| नीतिः | नीतिम् | नीती | नीतीः |
| सृतिः | ............. | ............. | ............. |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| मुष्टिः | .............. | .............. | .............. |
| सिद्धिः | .............. | .............. | .............. |
| पद्धतिः | .............. | .............. | .............. |
| गतिः | .............. | .............. | .............. |
| ब्राह्मी | ब्राह्मीम् | ब्राह्म्यौ | ब्राह्मीः |
| नारी | .............. | .............. | .............. |
| वाणी | .............. | .............. | .............. |
| पुष्पम् | पुष्पम् | पुष्पे | पुष्पाणि |
| वृजिनम् | .............. | .............. | .............. |
| वारि | वारि | वारिणी | वारीणि |

3. उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयत –

1. व्यासः (कथा) कथां लिखति।
2. एताः (गुरुः) .......... प्रणमन्ति।
3. आचार्यः (शिष्यः) .......... परिष्करोति।
4. पिता (मन्दमतिः).......... बोधयति।
5. मित्रं (सद्गुणः).......... वदति।
6. जनाः (ऋषयः) .......... पूजयन्ति।
7. बालकाः (माता) .......... पृच्छन्ति।
8. सेनापतिः(व्यूहाः) .......... रचयति।
9. शूराः(जयः) .......... प्राप्नुवन्ति।
10. कौरवाः (लाक्षागृहं) .......... निर्मान्ति।

4. कोष्ठकं दृष्ट्वा वाक्यानि लिखत –

1. त्वं कथां लिखसि।
2. युवां ..................... ।
3. .......................... ।
4. अहं ...................... ।
5. .......................... ।
6. .......................... ।

| | | |
|---|---|---|
| त्वम् | युवाम् | यूयम् |
| ↓ | ↓ | ↓ |
| (कथा) | (कविते) | (समाचाराः) |
| ↓ | ↓ | ↓ |
| लिखसि | लिखथः | लिखथ |
| लिखामि | लिखावः | लिखामः |
| ↑ | ↑ | ↑ |
| (गीते) | (पत्राणि) | (कादम्बरी) |
| ↑ | ↑ | ↑ |
| अहम् | आवाम् | वयम् |

www.thearyasamaj.org



5. कोष्ठके विद्यमानानां शब्दानां द्वितीयाविभक्तिरूपैः रिक्तस्थानानि पूरयत –

| | | | | |
|---|---|---|---|---|
| 1. भक्ताः | 2. अश्वौ | 3. सिद्धिः | 4. युद्धवार्ता | 5. भगवद्गीता |
| 6. पुष्पितवाणी | 7. प्रज्ञावादाः | 8. गुरवः | 9. प्रवृत्तिः | 10. शास्त्रविधिः |
| 11. विजयः | 12. इन्द्रियाणि | 13. प्रज्ञा | 14. शङ्खौ | 15. सेना |
| 16. देवाः | 17. विषयाः | 18. पृथिवी | 19. कुरवः | 20. हरिः |
| 21. पितरः | 22. चमूः | | | |

1. देवः भक्तान् पालयति ।
2. सारथिः .................... निबध्नाति ।
3. मुनयः .................... विन्दन्ति ।
4. धृतराष्ट्रः .................... शृणोति ।
5. वयं .................... पठामः ।
6. वेदवादरताः .................... प्रवदन्ति ।
7. अर्जुनः .................... भाषते ।
8. कः .................... हन्ति ?
9. आसुरजनाः .................... न जानन्ति ।
10. ज्ञानी .................... न उत्सृजति ।
11. सर्वे .................... काङ्क्षन्ति ।
12. स्थितप्रज्ञः .................... संहरति ।
13. कृष्णः अर्जुनस्य .................... मोहयति ।
14. माधवः पाण्डवश्च .................... प्रदध्मतुः ।
15. सेनापतिः .................... वीक्षते ।
16. सात्त्विकाः .................... यजन्ते ।
17. अज्ञाः .................... उपसेवन्ते ।
18. शङ्खघोषः .................... व्यनुनादयति ।
19. त्वं .................... पश्य ।
20. वयं .................... उपास्महे ।
21. पितृव्रताः .................... यान्ति ।
22. दुर्योधनः ............दर्शयति ।

www.thearyasamaj.org



उच्चैः पठत, जानीत च –

सर्वनामशब्दानां द्वितीयाविभक्तिप्रयोगः

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| सः | सा | एषः | एषा | अहम् | भवान् | भवती | त्वम् |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| तम् | ताम् | एतम् | एताम् | माम् | भवन्तम् | भवतीम् | त्वाम् |
| तौ | ते | एतौ | एते | आवां | भवन्तौ | भवत्यौ | युवाम् |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| तौ | ते | एतौ | एते | आवां | भवन्तौ | भवत्यौ | युवाम् |
| ते | ताः | एते | एताः | वयम् | भवन्तः | भवत्यः | यूयम् |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| तान् | ताः | एतान् | एताः | अस्मान् | भवतः | भवतीः | युष्मान् |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| तत् | एतत् | कः | का | किम् | सर्वः | सर्वा | सर्वम् |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| तत् | एतत् | कम् | काम् | किम् | सर्वम् | सर्वाम् | सर्वम् |
| ते | एते | कौ | के | के | सर्वौ | सर्वे | सर्वे |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| ते | एते | कौ | के | के | सर्वौ | सर्वे | सर्वे |
| तानि | एतानि | के | काः | कानि | सर्वे | सर्वाः | सर्वाणि |
| ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ | ↓ |
| तानि | एतानि | कान् | काः | कानि | सर्वान् | सर्वाः | सर्वाणि |

एतानि वाक्यानि उच्चैः पठत –

1. पितामहः तम् आह्वयति ।
2. धर्मराजः तं वदति ।
3. हिडिम्बा कं मारयति ?
9. धर्मः अस्मान् रक्षति ।
10. अहं तानि जन्मानि जानामि ।
11. आवां युवां सम्यक् जानीवः ।

www.thearyasamaj.org



4. सः मां वदति।
5. एषा एतौ जानाति।
6. कृपया आवां कथयतु।
7. कृष्णः युष्मान् रक्षतु।
8. गृध्रः तान् शवान् खादति।
12. मानवः तां सिद्धिं विन्दति।
13. सेना एतान् अनुसरति।
14. सर्वे एतां पश्यन्तु।
15. अयतिः कां गतिं गच्छति ?
16. कः मम विभूतिं जानाति ?

6. यथोदाहरणं रिक्तस्थानानि पूरयत –

| प्रथमा | द्वितीया | प्रथमा | द्वितीया | प्रथमा | द्वितीया |
|---|---|---|---|---|---|
| सः | तम् | अहम् | ........ | त्वम् | ........ |
| सा | ........ | भवत्यः | ........ | एषा | ........ |
| कौ | ........ | युवाम् | ........ | यूयम् | ........ |
| तानि | ........ | ते (स्त्री) | ........ | ते (पुं) | ........ |

7. कोष्ठकस्थां सङ्ख्यां दृष्ट्वा वाक्येषु द्वितीयाविभक्तिं योजयत –

| | | | | | |
|---|---|---|---|---|---|
| प्रथमाविभक्तिः | (1) भवान् | (8) वयम् | (11) एते (स्त्री) | (3) तानि | (6) का |
| | (4) सर्वाणि | (14) युवाम् | (2) भवती | (15) यूयम् | (10) सर्वा |
| | (13) एताः | (5) भवन्तौ | (9) सर्वः | (7) के (पु) | (12) एतौ |

1. युवकः भवन्तं प्रेषयति।
2. माता .......... आह्वयति।
3. बालकाः .......... पुस्तकानि क्रीणन्ति।
4. कपयः .......... फलानि खादन्ति।
5. अहं .......... न विस्मरामि।
6. एषः .......... अवदत् ?
7. कवयः .......... ग्रन्थान् इच्छन्ति ?
8. देवः .......... रक्षति।
9. सः .......... गुडं खादिष्यति।
10. भवान् .......... व्यवस्थां करोतु।
11. कुक्कुरः .......... रोटिके अखादत्।
12. जनकः .......... पालयति।
13. यूयम् .......... सम्यक् जानीथ।
14. वयं .......... पश्यामः।
15. अधिवक्ता .......... पृच्छति।

www.thearyasamaj.org



एतानि वाक्यानि पठत –

1. भक्तः देवं ध्यायति।
2. सः शान्तिम् अवाप्नोति।
3. सः सांख्यं योगं च एकं पश्यति।
4. श्रद्धावान् ज्ञानं प्राप्नोति।
5. किरीटी कृष्णम् आह।
6. भक्तः सङ्गं त्यजति।
7. सः पद्मनाभम् अर्चति।
8. सात्त्विकः स्वर्गं गच्छति।
9. तामसः नरकं गच्छति।
10. कविः चन्द्रं पश्यति।

8. रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरुत –

1. दुष्यन्तः शकुन्तलां विस्मरति। प्रश्नः – .................... ?
2. वयं बन्धून् स्मरामः। प्रश्नः – .................... ?
3. कपयः फलानि खादन्ति। प्रश्नः – .................... ?
4. महिला शाटिके क्रीणाति। प्रश्नः – .................... ?
5. भवान् भोजनं परिवेषयति। प्रश्नः – .................... ?
6. शिक्षकः तं बोधयति। प्रश्नः – .................... ?
7. तौ इक्षुं खादतः। प्रश्नः – .................... ?
8. भवत्यः कथाः चिन्तयन्ति। प्रश्नः – .................... ?

**अवधेयम्**

उपरितनवाक्येषु कर्मणः वचनानुगुणं प्रश्नाः दत्ताः सन्ति।
किन्तु सामान्यव्यवहारे एवं प्रयोगाः दृश्यन्ते।
यथा – किं खादति ? किं रचयति ? किं निर्माति ? किं ददाति ?
किं प्राप्नोति ? कुत्र गच्छति ?

एतं श्लोकम् उच्चैः पठत –

रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम्।
शयने यः स्मरेन्नित्यं दुःस्वप्नस्तस्य नश्यति॥

(यः शयनसमये रामं, कार्त्तिकेयं, हनूमन्तं, गरुडं, भीमं च स्मरति, तस्य दुःस्वप्नाः न भवन्ति।)

www.thearyasamaj.org



पश्यत, पठत च –

**उभयतः, परितः, विना – इत्यादीनां योगे द्वितीया**







यागाश्वम् उभयतः लवकुशौ स्तः। अभिमन्युं परितः महारथाः सन्ति। भीमः किरीटं विना तिष्ठति।

एतानि वाक्यानि पठत –

1. मार्गम् उभयतः वृक्षाः सन्ति।
2. उत्पीठिकाम् उभयतः आसन्दाः सन्ति।
3. शर्करां परितः पिपीलिकाः आगच्छन्ति।
4. दीपं परितः प्रकाशः अस्ति।
5. आचार्यं परितः शिष्याः सन्ति।
6. जलं विना जीवनं न सम्भवति।
7. सैनिकान् विना देशरक्षणं न भवति।
8. महाराजम् उभयतः सैनिकाः चलन्ति।
9. भवन्तं परितः के सन्ति ?
10. मां विना भगिनी विद्यालयं न गच्छति।

9. एतानि वाक्यानि यथोदाहरणं पूरयत –

1. ऋषिम् उभयतः शिष्याः सन्ति। (ऋषिः)
2. ........................ परितः सस्यानि सन्ति। (तडागः)
3. ........................ विना प्रकाशः न भवति। (सूर्यः)
4. ........................ विना आत्मविकासः न भवति। (स्वाध्यायः)
5. ........................ परितः बालाः सन्ति। (त्वम्)
6. ........................ उभयतः वृक्षाः सन्ति। (कुल्या)
7. ........................ परितः वृतिः अस्ति। (उदपानः)
8. ........................ उभयतः श्रोतारः उपविशन्ति। (कविः)
9. ........................ परितः शत्रवः सन्ति। (योधः)
10. ........................ उभयतः नेत्रे स्तः। (नासिका)
11. ........................ विना मित्रं न क्रीडति। (एषः)

www.thearyasamaj.org



12. ........................ परितः मनः भ्रमति (विषयः)
13. ........................ विना सज्जनषट्पदाः न हृष्यन्ति। (भारतपङ्कजम्)

10. कोष्ठके दत्तानां शब्दानाम् आधारेण वाक्यानि रचयत –

| | | |
|---|---|---|
| महाराजः | | सचिवाः |
| नदी | | सस्यानि |
| माता | उभयतः | बालाः |
| जिह्वा | | दन्ताः |
| सृतिः | | भवनानि |
| मन्दिरं | | भक्ताः |
| पुष्पाणि | परितः | भ्रमराः |
| धेनुः | | वत्सः |
| यज्ञकुण्डः | | ऋषयः |
| गुडः | | पिपीलिकाः |
| जलं | | झषाः |
| अभ्यासः | | मनोनिग्रहणम् |
| श्रद्धा | विना | ज्ञानम् |
| सङ्गः | | कर्म |
| त्यागः | | जीवनम् |
| वायुः | | प्राणिनः |

महाराजम् उभयतः सचिवाः सन्ति।
1. ............................ ।
2. ............................ ।
3. ............................ ।
4. ............................ ।
5. ............................ ।
6. ............................ ।
7. ............................ ।
8. ............................ ।
9. ............................ ।
10. ......विना झषाः न जीवन्ति।
11. .............. कर्तुं न शक्यते।
13. .............. न भवति।
14. .............. कुर्मः।
15. .............. न शोभते।
16. ........ जीवितुं न शक्नुवन्ति।

11. उभयतः, परितः अनयोः एकतरस्य उपयोगेन यथोदाहरणं वाक्यानि लिखत –

उदा – देवः – भक्ताः — देवं परितः भक्ताः सन्ति।

1. भीष्मः – कुरुपाण्डवाः .................................. ।
2. तूणीरम् – इषू .................................. ।
3. सूर्यः – प्रकाशवलयः .................................. ।
4. गदा – खड्गाः .................................. ।
5. कृष्णः – गोपिकाः .................................. ।
6. यागाश्वः – योधौ .................................. ।

www.thearyasamaj.org

# 26 गीतोपदेशप्रसङ्गः



एतं प्रसङ्गं सावधानं पठत –



महाभारतयुद्धं निश्चितम् आसीत्। युद्धं कर्तुम् इच्छन्तः कौरवाः पाण्डवाश्च कुरुक्षेत्रयुद्धभूमौ समवेताः अभवन्। आचार्यः भीष्मः कौरवाणां सेनापतिः आसीत्। द्रुपदपुत्रः धृष्टद्युम्नः पाण्डवानां सेनापतिः आसीत्। असङ्ख्याः क्षत्रियाः तत्र सम्मिलिताः आसन्। भीष्मः सिंहनादं कृत्वा शङ्खनादं कृतवान्। ततः सैनिकाः शङ्खान्, भेरीः, पणवान्, आनकान्, गोमुखान् च वादितवन्तः। पाण्डवाः अपि शङ्खनादं कृतवन्तः। अर्जुनः स्वस्य रथस्य सारथिं श्रीकृष्णम् उक्तवान् – "अच्युत! सेनयोः मध्ये मम रथं स्थापय। अत्र युद्धार्थम् उपस्थितान् सर्वान् अहं द्रष्टुम् इच्छामि" इति।

श्रीकृष्णः सेनयोः मध्ये रथं स्थापयित्वा उक्तवान् – "पार्थ! अत्र समवेतान् सर्वान् कुरून् पश्य" इति।

अर्जुनः तत्र पितॄन्, पितामहान्, आचार्यान्, मातुलान्, भ्रातॄन्, पुत्रान्, पौत्रान्, सखीन्, श्वशुरान्, सुहृदश्च दृष्टवान्। उपस्थितान् तान् सर्वान् बन्धून् दृष्ट्वा अर्जुनः परमं विषादं प्राप्तवान्। सः "कृष्ण! एते सर्वे मम बान्धवाः। एतान् अहं मारयितुं न इच्छामि। अहं युद्धं न करोमि" इति उक्त्वा बाणं धनुः च विसृज्य रथे उपविष्टवान्।

तदा श्रीकृष्णः तस्य अज्ञाननिवारणार्थं गीतोपदेशं कृतवान्। सः उक्तवान् – "अर्जुन! त्वम् अचिन्तनीयान् विषयान् मा चिन्तय। पण्डिताः गतासून् अगतासून् च न अनुशोचन्ति। त्वमपि शोकं मा कुरु। एतान् सर्वान् अहमेव पूर्वं मारितवान् अस्मि। त्वं निमित्तमात्रं भव। कर्मकरणे तव अधिकारः, न तु फले। अतः त्वं फलविषये मा चिन्तय। कर्म कुरु" इति।

ततः श्रीकृष्णः अर्जुनाय विश्वरूपं दर्शितवान्। अर्जुनः दिव्यं चक्षुः प्राप्य श्रीकृष्णस्य देहे सर्वान् देवान् भूतविशेषसमूहान् ऋषीन् ब्रह्माणम् ईश्वरं च दृष्टवान्।

विश्वरूपदर्शनेन अर्जुनस्य मोहः नष्टः। सः ज्ञानं प्राप्तवान्। "भगवन्! मम सन्देहः नष्टः। अहं तव वचनं करिष्यामि" इति उक्तवान्। युद्धं कर्तुं सः सन्नद्धः अभवत्।

www.thearyasamaj.org



## अभ्यासः

1. एतेषां प्रश्नानाम् उत्तरं लिखत –

1. के युद्धभूमौ समवेताः ?

   .................................................................................. ।

2. पाण्डवानां सेनापतिः कः आसीत् ?

   .................................................................................. ।

3. युद्धे कति क्षत्रियाः उपस्थिताः आसन् ?

   .................................................................................. ।

4. धृष्टद्युम्नः कस्य पुत्रः ?

   .................................................................................. ।

5. कः शङ्खनादं कृतवान् ?

   .................................................................................. ।

6. कृष्णः अर्जुनं किम् उक्तवान् ?

   .................................................................................. ।

7. सर्वान् कः पूर्वमेव मारितवान् ?

   .................................................................................. ।

8. कृष्णः किमर्थं गीतोपदेशं कृतवान् ?

   .................................................................................. ।

9. सैनिकाः कान् वादितवन्तः ?

   .................................................................................. ।

10. अर्जुनस्य मोहः कथं नष्टः ?

    .................................................................................. ।

11. श्रीकृष्णः अर्जुनाय किं दर्शितवान् ?

    .................................................................................. ।

12. अर्जुनः किमर्थं कौरवान् मारयितुं न इच्छति ?

    .................................................................................. ।

13. अर्जुनः कान् दृष्टवान् ?

    .................................................................................. ।

14. अर्जुनः कृष्णं रथं सेनयोः मध्ये स्थापयितुं किमर्थम् उक्तवान् ?

    .................................................................................. ।

www.thearyasamaj.org



2. एतेषां शब्दानां विभक्तिं वचनं च लिखत –

यथा – पाण्डवानाम् – षष्ठीविभक्तिः बहुवचनम्।

1. सेनयोः – ............................... ।
2. युद्धभूमौ – ............................... ।
3. विषयान् – ............................... ।
4. विश्वरूपदर्शनेन – ............................... ।
5. कौरवाणाम् – ............................... ।
6. अर्जुनाय – ............................... ।
7. भगवान् – ............................... ।
8. रथे – ............................... ।
9. पितॄन् – ............................... ।
10. भेरीः – ............................... ।

3. एतान् शब्दान् पठित्वा एतेषु भूतकालार्थकानां शब्दानां पुरतः (✓) चिह्नं कुरुत –

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| उक्तवान् | ✓ | आसन् | | कृतवन्तः | | कुरु | | दृष्टम् | |
| स्थापय | | आसीत् | | चिन्तय | | प्राप्तवान् | | कृत्वा | |
| इच्छामि | | कृतवान् | | दर्शितवान् | | उपविष्टवान् | | स्थापयित्वा | |
| पश्य | | करोमि | | अनुशोचति | | अस्मि | | विसृज्य | |
| वादितवन्तः | | अभवत् | | मारितवान् | | भव | | उक्त्वा | |

4. पाठं पठित्वा एतान् विभक्त्यन्तान् शब्दान् चित्वा लिखत –

द्वितीयान्ताः – शङ्खान् .......... .......... .......... ..........
.......... .......... .......... .......... ..........

षष्ठ्यन्ताः – कौरवाणाम् .......... .......... .......... ..........
.......... .......... .......... .......... ..........

सप्तम्यन्ताः – कुरुक्षेत्रे .......... .......... .......... ..........
.......... .......... .......... .......... ..........

www.thearyasamaj.org



# 27 करिष्ये वचनं तव

लृट्लकारः

एतान् गीताश्लोकान् उच्चैः पठत – (2.33 – 39)

अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥33॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥34॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥35॥

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥36॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥37॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥38॥

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥39॥

एतानि वाक्यानि उच्चैः पठत, अवगच्छत च –

1. अद्य सोमवासरः अस्ति । श्वः मङ्गलवासरः भविष्यति ।
2. श्वः अहं संस्कृतं पठितुं संस्कृतशिबिरं गमिष्यामि ।
3. अग्रिमे मासे अहं संस्कृतस्य परीक्षां लेखिष्यामि ।
4. अग्रिमे वर्षे अहं संस्कृतभारत्याः विस्तारकः भविष्यामि ।
5. अद्य अहं मौखिकम् अभ्यासं करोमि । श्वः लेखनस्य अभ्यासं करिष्यामि ।
6. त्वम् अद्य सायङ्काले किं करिष्यसि ?
7. ते अत्र कदा आगमिष्यन्ति, पठिष्यन्ति च ?

www.thearyasamaj.org



उच्चैः पठत, जानीत च

| | | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| परस्मैपदी चल् | प्र.पु. | चलिष्यति | चलिष्यतः | चलिष्यन्ति |
| | म.पु. | चलिष्यसि | चलिष्यथः | चलिष्यथ |
| | उ.पु | चलिष्यामि | चलिष्यावः | चलिष्यामः |
| परस्मैपदी गम् | प्र.पु. | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| | म.पु. | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| | उ.पु | गमिष्यामि | गमिष्यावः | गमिष्यामः |
| मैपदी दृश् | प्र.पु. | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| | म.पु. | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| | उ.पु | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |
| परस्मैपदी कृ | प्र.पु. | करिष्यति | करिष्यतः | करिष्यन्ति |
| | म.पु. | करिष्यसि | करिष्यथः | करिष्यथ |
| | उ.पु | करिष्यामि | करिष्यावः | करिष्यामः |
| आत्मनेपदी कृ | प्र.पु. | करिष्यते | करिष्येते | करिष्यन्ते |
| | म.पु. | करिष्यसे | करिष्येथे | करिष्यध्वे |
| | उ.पु | करिष्ये | करिष्यावहे | करिष्यामहे |
| आत्मनेपदी वृत् | प्र.पु. | वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते |
| | म.पु. | वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे |
| | उ.पु | वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे |
| आत्मनेपदी ईक्ष् | प्र.पु. | ईक्षिष्यते | ईक्षिष्येते | ईक्षिष्यन्ते |
| | म.पु. | ईक्षिष्यसे | ईक्षिष्येथे | ईक्षिष्यध्वे |
| | उ.पु | ईक्षिष्ये | ईक्षिष्यावहे | ईक्षिष्यामहे |

www.thearyasamaj.org



## कानिचन विशेषक्रियापदानि

| | | |
|---|---|---|
| दा – दास्यति / दास्यते | प्रच्छ – प्रक्ष्यति | इष् – एषिष्यति |
| ज्ञा – ज्ञास्यति / ज्ञास्यते | शक् – शक्ष्यति | क्री – क्रेष्यति / क्रेष्यते |
| श्रु – श्रोष्यति | उत् + स्था – उत्थास्यति | नी – नेष्यति / नेष्यते |
| लिख् – लेखिष्यति | ग्रह् – ग्रहीष्यति / ग्रहीष्यते | नम् – नंस्यति |
| मिल् – मेलिष्यति | उप–विश–उपवेक्ष्यति | नृत् – नर्तिष्यति |
| मन् – मंस्यते | युज् – योक्ष्यते | हु – होष्यति |
| रम् – रंस्यते | युध् – योत्स्यते | भुज् – भोक्ष्यते |

यथोदाहरणं भविष्यत्कालरूपाणि लिखत –

| | | | |
|---|---|---|---|
| पठ् (प्र.पु) | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| चल् (प्र.पु) | ............... | ............... | चलिष्यन्ति |
| गम् (म.पु) | ............... | ............... | गमिष्यथ |
| क्रीड् (उ.पु) | क्रीडिष्यामि | ............... | ............... |
| खाद् (प्र.पु) | ............... | खादिष्यतः | ............... |
| धाव् (म.पु) | ............... | ............... | धाविष्यथ |
| नम् (उ.पु) | नंस्यामि | ............... | ............... |
| धृ (प्र.पु) | ............... | धरिष्यतः | ............... |
| हृ (म.पु) | ............... | ............... | हरिष्यथ |
| मुद् (प्र.पु) | मोदिष्यते | ............... | ............... |
| स्मृ (उ.पु) | स्मरिष्यामि | ............... | ............... |
| वद् (प्र.पु) | ............... | वदिष्यतः | ............... |
| प्रच्छ (म.पु) | ............... | ............... | प्रक्ष्यथ |
| हु (उ.पु) | होष्यामि | ............... | ............... |
| दृश् (उ.पु) | ............... | ............... | द्रक्ष्यामः |
| नी (प्र.पु) | नेष्यति | ............... | ............... |
| मिल् (म.पु) | ............... | मेलिष्यथः | ............... |
| पा (उ.पु) | ............... | ............... | पास्यामः |
| रम् (म.पु) | ............... | रंस्येथे | ............... |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| क्षाल् (प्र.पु) | ............... | क्षालयिष्यतः | ............... |
| रुद् (म.पु) | रोदिष्यसि | ............... | ............... |
| वद् (उ.पु) | ............... | ............... | वदिष्यामः |
| युध् (प्र.पु) | योत्स्यते | ............... | ............... |
| भू (प्र.पु) | ............... | ............... | भविष्यन्ति |
| कृ (उ.पु) | करिष्यामि | ............... | ............... |
| कृ (उ.पु) | ......... | करिष्यावहे | ............... |
| स्था (उ.पु) | ............... | स्थास्यावः | ............... |
| स्थाप् (प्र.पु) | स्थापयिष्यति | ............... | ............... |
| नृत् (म.पु) | ............... | ............... | नर्तिष्यथ |
| तॄ (उ.पु) | ............... | तरिष्यावः | ............... |
| लभ् (उ.पु) | लप्स्ये | ............... | ............... |

1. एतेषु वाक्येषु लट्लकाररूपाणां स्थाने लृट्लकाररूपाणि प्रयुज्य वाक्यानि पुनः लिखत –

| लट् | लृट् |
|---|---|
| उदा – सा गीताप्रवचनं शृणोति। | सा गीताप्रवचनं श्रोष्यति। |
| 1. कृष्णः कदा अवतरति ? | .................................. । |
| 2. तौ गीताचार्यं नमतः। | .................................. । |
| 3. यूयं भक्तियोगं पठथ। | .................................. । |
| 4. योगिनः तत्त्वं पश्यन्ति। | .................................. । |
| 5. वयम् अतः परं न भवामः। | .................................. । |
| 6. यूयं स्वनिमित्तमेव पाकं कुरुत। | .................................. । |
| 7. शस्त्राणि आत्मानं न छिन्दन्ति। | .................................. । |
| 8. आवां गीतां शृणुवः। | .................................. । |
| 9. त्वं पापं न अनुभवसि। | .................................. । |
| 10. कृष्णार्जुनौ सम्भाषणं कुर्वाते। | .................................. । |
| 11. वयं कुरुक्षेत्रं गच्छामः। | .................................. । |
| 12. आवां सैन्यविन्यासं पश्यावः। | .................................. । |
| 13. कौरवाः पृथक् पृथक् शङ्खान् धमन्ति। | .................................. । |

www.thearyasamaj.org



14. युवां ध्यानेन हृदये ईश्वरं पश्यथः। ........................................ ।
15. यूयं निमित्तमात्रं भवथ। ........................................ ।
16. लोके दैवम् आसुरम् इति द्वौ विभागौ स्तः। ........................................ ।
17. योगिनः कथं कार्यं कुर्वन्ति ? ........................................ ।
18. नराः अनिच्छन्तः पापं चरन्ति। ........................................ ।
19. भवन्तः अनुद्वेगकरं वाक्यं वदन्ति। ........................................ ।
20. यूयं कर्मयोगाभ्यासं कुरुथ। ........................................ ।

2. यथोदाहरणं प्रश्नस्य उत्तरं लिखत –

"भवान् / भवती श्वः.........."

1. किं खादिष्यति ? अहं श्वः पूरिकां खादिष्यामि।
2. प्रातः कदा उत्थास्यति ? ........................................ ।
3. कुत्र गमिष्यति ? ........................................ ।
4. मध्याह्ने कुत्र गमिष्यति ? ........................................ ।
5. सायङ्काले किं करिष्यति ? ........................................ ।
6. गृहं कदा आगमिष्यति ? ........................................ ।
7. भोजनं कदा स्वीकरिष्यति ? ........................................ ।
8. अल्पाहारे किं पास्यति ? ........................................ ।
9. किं सायङ्काले किञ्चित् क्रेष्यति ? ........................................ ।
10. किं सङ्गीतं श्रोष्यति ? ........................................ ।

3. गीतायाः अधस्तनश्लोकेषु लृट्रूपाणि अधोरेखया अङ्कयत –

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि॥ 18.58॥
यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति॥ 18.59॥
स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥ 18.60॥
इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥ 16.13॥

www.thearyasamaj.org



तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥ 18.62
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ 16.15॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम्॥ 18.64॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ 18.65॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ 18.66॥
यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ 8.23॥
य इमं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥ 18.68॥
इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ 9.1॥

4. यथोदाहरणं वदत, लिखत च –

1. यदि अद्य सोमवासरः – श्वः कः वासरः भविष्यति ?
   उत्तरम् – यदि अद्य सोमवासरः तर्हि श्वः मङ्गलवासरः भविष्यति।
2. यदि भवान् / भवती / अद्य गणितं पठति तर्हि संस्कृतं कदा पठिष्यति ?
   उत्तरम् – ...................................................... ।
3. यदि तव भ्राता अद्य न आगतः तर्हि कदा आगमिष्यति ?
   उत्तरम् – ...................................................... ।
4. यदि त्वम् अधुना न क्रीडसि तर्हि कदा क्रीडिष्यसि ?
   उत्तरम् – ...................................................... ।
5. यदि भवन्तः / भवत्यः अत्र न पश्यन्ति तर्हि कुत्र द्रक्ष्यन्ति ?
   उत्तरम् – ...................................................... ।

www.thearyasamaj.org

# 28 तदा किं किं भविष्यति ?

सावधानतया एतां कथां पठत –

(सीतायाः अन्वेषणार्थम् आञ्जनेयः समुद्रलङ्घनं कृत्वा लङ्काम् आगतवान्। तत्र सर्वेषु भवनेषु सीतायाः अन्वेषणं कृतवान्। परन्तु सीतां न दृष्टवान्। तदा निराशतया सः एवं चिन्तयति।)

'यदि अहं सीताम् अदृष्ट्वा एव किष्किन्धां गमिष्यामि तर्हि कः पुरुषार्थः साधितः भविष्यति ? सुग्रीवः तदा मां किं वा वदिष्यति ? अन्ये वानराः अपि किं वा वदिष्यन्ति ? अहम् अपि 'सीता न लब्धा' इति रामं कथं वा वदिष्यामि ? यदि अहं तथा वदिष्यामि तर्हि रामः प्राणान् त्यक्ष्यति। तदा लक्ष्मणः अपि मरिष्यति। तां वार्तां श्रुत्वा भरतः शत्रुघ्नः च प्राणान् त्यक्ष्यतः। ततः पुत्रशोकेन कौसल्या, सुमित्रा, कैकेयी चापि मरिष्यन्ति। रामस्य मरणं ज्ञात्वा सुग्रीवः प्राणान् न धरिष्यति। ततः तस्य पत्नी रुमा, वालिपत्नी तारा च प्राणान् न धरिष्यतः। तत्पश्चात् कुमारः अङ्गदः मरणं प्राप्स्यति। तदा तस्य प्रियाः वानराः दुःखेन मुष्टिभिः मस्तकान् ताडयिष्यन्ति। प्राणत्यागं च करिष्यन्ति। केऽपि वानराः ततः क्रीडासुखं न अनुभविष्यन्ति। ते शिलाग्रेभ्यः अधः पतिष्यन्ति, विषं वा पास्यन्ति, उपवासव्रतं वा आचरिष्यन्ति। एवं सम्पूर्णः रघुवंशः वानरवंशश्च विनङ्क्ष्यतः।



अतः अहं सीताम् अदृष्ट्वा इतः किष्किन्धां न गमिष्यामि। यतः अहं सुग्रीवं द्रष्टुं न शक्ष्यामि। अहम् अत्रैव वानप्रस्थव्रतं ग्रहीष्यामि। ततः चितां प्रवेक्ष्यामि। अथवा जलं प्रवेक्ष्यामि। तदा मम शरीरं मृगाः काकाः वा भक्षयिष्यन्ति। अथवा अहं तापसः भविष्यामि। अत्रैव जीविष्यामि। नैव प्रतिगमिष्यामि।'

(एवं बहुविधं चिन्तनं कृत्वा अन्ते आञ्जनेयः 'अहम् अशोकवने अन्वेषणं न कृतवान्। तत्रापि करोमि' इति निश्चयं कृत्वा अशोकवनं गच्छति। तत्र सीतां च पश्यति।)

www.thearyasamaj.org



1. एतेषां प्रश्नानाम् उत्तरं लिखत –

1. पुत्रशोकेन काः मरिष्यन्ति ? .................................... ।
2. वानराः दुःखेन किं करिष्यन्ति ? .................................... ।
3. आञ्जनेयः किमर्थं लङ्कां गतवान् ? .................................... ।
4. रामस्य वंशः कः ? .................................... ।
5. अन्ते आञ्जनेयः किं करोति ? .................................... ।

2. अधो रेखाङ्कितं शब्दम् अधिकृत्य एतेषाम् उत्तरवाक्यानां प्रश्ननिर्माणं कुरुत –

1. आञ्जनेयः अशोकवने सीतां पश्यति ।

   ....................................................................... ।

2. वार्तां श्रुत्वा भरतः शत्रुघ्नः च प्राणान् त्यक्ष्यतः ।

   ....................................................................... ।

3. वानराः मुष्टिभिः मस्तकान् ताडयिष्यन्ति ।

   ....................................................................... ।

4. वानराः ततः क्रीडासुखं न अनुभविष्यन्ति ।

   ....................................................................... ।

5. आञ्जनेयः सर्वेषु भवनेषु सीतायाः अन्वेषणं कृतवान् ।

   ....................................................................... ।

3. एतेषां वाक्यानां भविष्यत्कालक्रियापदानां स्थाने वर्तमानकालरूपाणि लिखत –

1. यदि अहं सीताम् अदृष्ट्वा एव किष्किन्धां गमिष्यामि तर्हि कः पुरुषार्थः साधितः भविष्यति ?

   ....................................................................... ।

2. सुग्रीवः तदा मां किं वा वदिष्यति ?

   ....................................................................... ।

3. यदि अहं तथा वदिष्यामि तर्हि रामः प्राणान् त्यक्ष्यति ।

   ....................................................................... ।

4. तत्पश्चात् कुमारः अङ्गदः मरणं प्राप्स्यति ।

   ....................................................................... ।

www.thearyasamaj.org



5. केऽपि वानराः ततः क्रीडासुखं न अनुभविष्यन्ति।

.................................................................... ।

6. तदा वानराः दुःखेन मुष्टिभिः मस्तकान् ताडयिष्यन्ति, प्राणत्यागं च करिष्यन्ति।

.................................................................... ।

7. वानराः शिलाग्रेभ्यः अधः पतिष्यन्ति, विषं वा पास्यन्ति, उपवासव्रतं वा आचरिष्यन्ति।

.................................................................... ।

8. अहं सुग्रीवं द्रष्टुं न शक्ष्यामि, अत्रैव वानप्रस्थव्रतं ग्रहीष्यामि।

.................................................................... ।

9. ततः चितां प्रवेक्ष्यामि, अत्रैव जीविष्यामि, नैव प्रतिगमिष्यामि।

.................................................................... ।

4. एतेषु वर्तमानकाल – भूतकाल – भविष्यत्कालक्रियापदरूपाणि पृथक् लिखत –

| | | | | | |
|---|---|---|---|---|---|
| आगतवान् | विनङ्क्ष्यतः | दृष्टवान् | करोमि | वदिष्यामि | चिन्तयामि |
| गमिष्यामि | पश्यामि | कृतवान् | जीविष्यामि | मरिष्यामि | गच्छामि |
| वक्ष्यामि | शक्ष्यामि | ग्रहीष्यति | भवति | | |

वर्तमानकालरूपाणि – .................................................... ।

भूतकालरूपाणि – .................................................... ।

भविष्यत्कालरूपाणि – .................................................... ।

5. पाठे विद्यमानानि वाक्यानि परिशील्य अत्र रिक्तस्थानानि पूरयत –

1. आञ्जनेयः ...................... कृत्वा लङ्काम् आगतवान्।
2. यदि अहं तथा वदिष्यामि तर्हि रामः ................. त्यक्ष्यति।
3. तां ..............श्रुत्वा भरतः शत्रुघ्नः च प्राणान् त्यक्ष्यतः।
4. तत्पश्चात् ............. अङ्गदः मरणं प्राप्स्यति।
5. ते ............. अधः पतिष्यन्ति, ............. वा पास्यन्ति।

www.thearyasamaj.org



# 29 गाण्डीवं स्रंसते हस्तात्

पठत अवगच्छत च –

पञ्चमीविभक्तिः



अर्जुनः रथात् अवतरति।



कृष्णः मथुरायाः आगच्छति।



गोपिकाः नद्याः जलम् आनयन्ति।



पाण्डवाः राजभवनात् गच्छन्ति।

**पञ्चमीविभक्तिः**

| | | | | |
|---|---|---|---|---|
| लोभः | → | लोभात् | लोभाभ्याम् | लोभेभ्यः |
| आननम् | → | आननात् | आननाभ्याम् | आननेभ्यः |
| जिह्वा | → | जिह्वायाः | जिह्वाभ्याम् | जिह्वाभ्यः |
| नदी | → | नद्याः | नदीभ्याम् | नदीभ्यः |

उच्चैः पठत, जानीत च –

1. हिमगिरेः गङ्गा प्रवहति।
2. अम्बा पाणिभ्यां कङ्कणानि निष्कासयति।
3. गिरिभ्यः नद्यः प्रवहन्ति।
4. इक्षोः शर्करां निर्मान्ति।
5. रामः बाहुभ्याम् आभरणानि अपसारितवान्।
6. शिष्याः गुरुभ्यः पठन्ति।
7. भरतः भ्रातुः पादुके स्वीकृतवान्।
8. सुपुत्रः मातापितृभ्याम् आशीर्वादं प्राप्नोति।
9. गायकः श्रोतृभ्यां प्रशंसां प्राप्तवान्।
10. दध्नः नवनीतं भवति।

www.thearyasamaj.org

11. माता मधुनः पिपिलिकां निवारयति।
12. देवः दुर्गत्याः अस्मान् रक्षति।
13. काकस्य चञ्च्वाः अपूपं पतति।
14. जनाः धेनुभ्यः क्षीरं प्राप्नुवन्ति।
15. सः मातुः अनुग्रहं प्राप्नोति।
16. सर्वे मातृभ्यः आशीर्वादं प्राप्नुवन्ति।

एतानि रूपाणि उच्चैः पठत –

पञ्चमीविभक्तिः

| | | | |
|---|---|---|---|
| वृक्षः | वृक्षात् | वृक्षाभ्याम् | वृक्षेभ्यः |
| कृष्णः | कृष्णात् | कृष्णाभ्याम् | कृष्णेभ्यः |
| गुणः | गुणात् | गुणाभ्याम् | गुणेभ्यः |
| कविः | कवेः | कविभ्याम् | कविभ्यः |
| अग्निः | अग्नेः | अग्निभ्याम् | अग्निभ्यः |
| गुरुः | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| कर्ता | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| शाखा | शाखायाः | शाखाभ्याम् | शाखाभ्यः |
| मतिः | मत्याः / मतेः | मतिभ्याम् | मतिभ्यः |
| नदी | नद्याः | नदीभ्याम् | नदीभ्यः |
| दैवी | दैव्याः | दैवीभ्याम् | दैवीभ्यः |
| धेनुः | धेन्वाः / धेनोः | धेनुभ्याम् | धेनुभ्यः |
| वधूः | वध्वाः | वधूभ्याम् | वधूभ्यः |
| माता | मातुः | मातृभ्याम् | मातृभ्यः |
| स्यन्दनम् | स्यन्दनात् | स्यन्दनाभ्याम् | स्यन्दनेभ्यः |
| वारि | वारिणः | वारिभ्याम् | वारिभ्यः |
| मधु | मधुनः | मधुभ्याम् | मधुभ्यः |

1. पञ्चमीविभक्तिरूपाणि लिखत –

| | | | | | |
|---|---|---|---|---|---|
| देशात् | ........ | ........ | यतेः | ........ | ........ |
| यज्ञात् | ........ | ........ | मृत्योः | ........ | ........ |
| ........ | मुनिभ्याम् | ........ | ........ | ........ | अतिथिभ्यः |

www.thearyasamaj.org

| | | | | | |
|---|---|---|---|---|---|
| ........ | ........ | विद्यालयेभ्यः | वस्तुनः | ........ | ........ |
| स्थालिकायाः | ........ | ........ | ........ | ........ | नेतृभ्यः |
| ........ | वीथीभ्याम् | ........ | ........ | मातृभ्याम् | ........ |
| दैव्याः | ........ | ........ | सूक्तेः | ........ | ........ |
| ........ | बीजाभ्याम् | ........ | बुद्धेः | ........ | ........ |
| राज्यात् | ........ | ........ | ........ | संस्कृतिभ्याम् | ........ |

2. महाभारतयुद्धार्थं कस्मात् राज्यात् कः आगतवान् इति जानीत यथोदाहरणं वाक्यानि च वदत –

उदा – विराटराजः – मत्स्यदेशः = विराटराजः मत्स्यदेशात् आगतवान्।

| | | |
|---|---|---|
| सात्यकिः – द्वारका | भगदत्तः – प्राग्ज्योतिषम् | द्रुपदः – पाञ्चालदेशः |
| कर्णः – अङ्गदेशः | बृहद्रथः – कोसलम् | श्रुतायुधः – कलिङ्गः |
| जयत्सेनः – मगधः | शल्यः – मद्रदेशः | सुदक्षिणः – काम्बोजदेशः |
| नीलः – माहिष्मती | भीष्मः – हास्तिनपुरम् | धृष्टकेतुः – चेदिदेशः |
| विन्दः – अवन्ती | पाण्डवाः – इन्द्रप्रस्थम् | शकुनिः – गान्धारम् |
| बृहत्क्षत्रः – केकयम् | जयद्रथः – सिन्धुदेशः | |

3. एतासु का कुतः आगता इति वदत –

| | | |
|---|---|---|
| गान्धारी – गान्धारम् | अम्बा – काशी | कुन्ती – काम्बोजम् |
| उलूपी – नागक्षेत्रम् | द्रौपदी – पाञ्चालः | माद्री – मद्रदेशः |
| रुक्मिणी – कुण्डिननगरम् | | |

4. अत्र विनाशमार्गः दर्शितः अस्ति। गीताश्लोकौ परिशील्य (2-62, 63) यथोदाहरणं वाक्यानि लिखत –

उदा – विषयध्यानात् सङ्गः जायते।



www.thearyasamaj.org

1. .......................................................................... ।

2. .......................................................................... ।

3. .......................................................................... ।

4. .......................................................................... ।

5. .......................................................................... ।

6. .......................................................................... ।

5. आवरणे स्थितस्य पदस्य उचितरूपेण रिक्तं स्थानं पूरयत

1. गाण्डीवं ........................ (हस्तः) स्रंसते।
2. गङ्गा ........................ (स्वर्गः) अवतीर्णा।
3. सैनिकः इषुं ........................ (तूणीरः) स्वीकरोति।
4. पद्मनाभस्य ........................ (मुखपद्मम्) गीता विनिस्सृता।
5. युक्तियुक्तवचः ........ (बालः) ........ (शुकः) अपि गृह्णातु।
6. अभिमन्युः ........................ (चक्रव्यूहः) बहिः आगन्तुं न शक्तः।
7. दुर्योधनः ........................ (वैशम्पायनसरोवरः) बहिः आगच्छति।
8. कर्णः इन्द्राय ........................ (कर्णौ) कुण्डलं दत्तवान्।
9. राज्याभिषेकार्थं ........................ (नद्यः) जलम् आनयति।
10. राजसूययागार्थं ........................ (देशाः) अर्जुनः धनानि, रत्नानि च आनयति।
11. कृष्णः ........................ (द्वारका) इन्द्रप्रस्थम् आगतवान्।
12. वनवाससमये पाण्डवाः ..................... (द्वैतवनम्) समन्तपञ्चकं गतवन्तः।
13. कर्णः ........................ (इन्द्रः) शक्त्यायुधं स्वीकृतवान्।
14. भीष्मः ........................ (काशी) कन्याः आनीतवान्।
15. अर्जुनः ........................ (अग्निः) गाण्डीवं स्वीकृतवान्।

www.thearyasamaj.org



6. कः कस्मात् किं प्राप्तवान् इति अधः लिखितमस्ति। एतस्य आधारेण यथोदाहरणं वाक्यानि वदत –

उदा – अर्जुनः शिवात् पाशुपतास्त्रं प्राप्तवान्।

| | | | |
|---|---|---|---|
| अर्जुनः | शिवः | पाशुपतास्त्रम् | प्राप्तवान् |
| अर्जुनः | अग्निः | गाण्डीवम् | |
| कर्णः | इन्द्रः | शक्त्यायुधम् | |
| कृष्णः | पञ्चजनः | पाञ्चजन्यम् | |
| भीष्मः | शन्तनुः | इच्छामरणम् | |
| इन्द्रः | कर्णः | कवचकुण्डलानि | |
| कर्णः | परशुरामः | ब्रह्मास्त्रविद्याम् | |
| अर्जुनः | देवाः | दिव्यास्त्राणि | |
| युधिष्ठिरः | यक्षः | सहोदराणां पुनर्जीवनम् | |
| भीमः | बलरामः | गदायुद्धविद्याम् | |

**पञ्चमीविभक्तिः (उपपदम्)**

एतत् सम्भाषणम् उच्चैः पठत –

रमेशः – सुरेश ! अद्य भवान् प्रातः कुत्र गतवान् ? अष्टवादनात् आरभ्य अहं भवतः गृहे एव आसम्।

सुरेशः – ह्यः मम मातुलः आगतवान्। सः माम् इतः जन्तुशालां नीतवान्।

रमेशः – जन्तुशालायां सिंहं दृष्टवान् वा ?

सुरेशः – आं भोः ! परन्तु सिंहः पञ्जरात् बहिः एव भ्रमति। वयं याने उपविश्य तं दृष्टवन्तः। तत्र एकः आरक्षकः एकं मृगं सिंहात् रक्षितवान्। मम तु सिंहात् भीतिः।

रमेशः – कदा ततः गृहम् आगतवान् ?

सुरेशः – नववादनात् द्विवादनपर्यन्तम् अहं जन्तुशालायाम् एव आसम्। द्विवादने जन्तुशालायाः बहिः आगतवान्। चतुर्वादने गृहं प्राप्तवान्। पञ्चवादनात् परम् अहं मम गृहे एव आसम्।

**अवधेयम्**

आरभ्य – बहिः – रक्षति – परम्– भयम्– इत्येतेषां प्रयोगे पञ्चमीविभक्तिः भवति।

www.thearyasamaj.org



## अभ्यासः

7. आवरणे दत्तानां शब्दानां पञ्चमीविभक्तिरूपैः यथोदाहरणं रिक्तस्थानानि पूरयत –

उदा – नगरात् बहिः नदी प्रवहति। (नगरम्)

1. .................................. बहिः बालाः क्रीडन्ति। (प्रकोष्ठः)
2. ...................................... बहिः वृक्षाः सन्ति। (गृहम्)
3. .................................... बहिः मार्गाः सन्ति। (वाटिका)
4. ........................आरभ्य मन्दिरम् उद्घाटितं भवति। (पञ्चवादनम्)
5. .................... आरभ्य एव कृष्णः बहुः चटुलः आसीत्। (बाल्यकालः)
6. ................... आरभ्य ज्येष्ठमासपर्यन्तम् उत्तरायणं भवति। (पौषमासः)
7. सः प्रतिदिनं ........... आरभ्य रात्रिपर्यन्तं गीताभ्यासं करोति। (सायङ्कालः)
8. देवः सज्जनान् ................................. रक्षति। (दुष्टाः)
9. आरक्षकाः देशं ................................ रक्षन्ति। (चोराः)
10. सैनिकाः ................................. राष्ट्रं रक्षन्ति। (शत्रवः)
11. हे देव ! मां .................................. रक्ष। (सङ्कटानि)
12. ................................ परं वैशाखमासः भवति। (चैत्रम्)
13. ............................... परं रविवासरः भविष्यति। (शनिवासरः)
14. .............................. परं फलं प्राप्नुवन्ति जनाः। (परिश्रमः)
15. ............................... परं भवान् किं करिष्यति ? (संस्कृतपाठनम्)
16. मूषकस्य ................................ भीतिः भवति। (बिडालः)
17. भीरुः तु ................................ अपि बिभेति। (अल्पम्)
18. ..................अपि मा भीः इति विवेकानन्दः गर्जितवान्। (कः)

पूर्वम् – परम्

8. मञ्जूषायां विद्यमानानां शब्दानाम् साहाय्येन पूर्वं / परम् उपयुज्य यथोदाहरणं वाक्यानि वदत –

| |
|---|
| अर्जुनविषादयोगः – साङ्ख्ययोगः – कर्मयोगः – ज्ञानकर्मसंन्यासयोगः – कर्मसंन्यासयोगः – आत्मसंयमयोगः – ज्ञानविज्ञानयोगः – अक्षरब्रह्मयोगः – राजविद्याराजगुह्ययोगः |

उदा – साङ्ख्ययोगः कर्मयोगात् पूर्वः। साङ्ख्ययोगः अर्जुनविषादयोगात् परः॥

www.thearyasamaj.org



उच्चैः पठत –

**पञ्चमीविभक्तिः**

| | | | |
|---|---|---|---|
| तद्–शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | तस्मात् | ताभ्याम् | तेभ्यः |
| तद्–शब्दः स्त्रीलिङ्गे | तस्याः | ताभ्याम् | ताभ्यः |
| एतद्–शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | एतस्मात् | एताभ्याम् | एतेभ्यः |
| एतद्–शब्दः स्त्रीलिङ्गे | एतस्याः | एताभ्याम् | एताभ्यः |
| किम्–शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | कस्मात् | काभ्याम् | केभ्यः |
| किम्–शब्दः स्त्रीलिङ्गे | कस्याः | काभ्याम् | काभ्यः |
| सर्व–शब्दः पुंलिङ्गे नपुंसकलिङ्गे च | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्व–शब्दः स्त्रीलिङ्गे | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |

एतान् श्लोकान् उच्चैः पठत –

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥

(विद्या नराय विनयगुणं ददाति, तेन सः नरः अर्हतां प्राप्नोति। ततः धनं प्राप्नोति, धनेन धर्मकार्याणि कृत्वा सः पुण्यं प्राप्नोति।)

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥3.14॥

(सर्वे अपि जीवाः अन्नस्य कारणेन एव जन्म प्राप्य जीवनं कर्तुं शक्नुवन्ति। अन्नं तु वृष्टिकारणेन भवति। यज्ञः, दानं सत्कार्याणि एव वृष्टेः उत्पादने कारणानि)

भगवद्गीता किञ्चिदधीता
गङ्गाजललवकणिका पीता।
सकृदपि येन मुरारिसमर्चा
क्रियते तस्य यमेन न चर्चा॥

*– आदिशङ्कराचार्यः*

www.thearyasamaj.org



# 30 नगरदर्शनं कदा ?

| |
|---|
| तः – पर्यन्तम् |

एतां विनोदकणिकां पठत –

कश्चन ग्रामीणः नगरदर्शनार्थं महानगरं गतवान् । यदा बुभुक्षा जाता, तदा सः एकं भोजनालयं गत्वा पृष्टवान् – ''अत्र भोजनस्य अल्पाहारस्य च समयः कः ?'' इति ।

तदा भोजनालयस्वामी उक्तवान् – ''प्रातः सप्तवादनतः एकादशवादनपर्यन्तम् अल्पाहारः । मध्याह्ने द्वादशवादनतः त्रिवादनपर्यन्तं भोजनम्, सायं पञ्चवादनतः रात्रौ दशवादनपर्यन्तं रात्रिभोजनम्'' इति ।

एतस्य श्रवणानन्तरं सः ग्रामीणः पृष्टवान् – '' महाशय ! यदि एतावान् कालः अल्पाहारार्थं, मध्याह्ने भोजनार्थं, रात्रिभोजनार्थं च भवति तर्हि मम नगरदर्शनं कदा भविष्यति ?'' इति ।

## अभ्यासः

1. किञ्चन गीताशिबिरं प्रवर्तते । तस्य समयसारिणी अत्र अस्ति । तद् दृष्ट्वा कदा किं प्रवर्तते इति लिखत –

| | |
|---|---|
| 6.00 – 7.00 – योगासनम् | 9.00 – 10.00 – गीतापारायणम् |
| 11.00 – 12.00 – गीताप्रवचनम् | 3.00 – 4.00 – सम्भाषणवर्गः |
| 5.00 – 6.00 – गीताध्ययनम् | 7.00 – 8.00 – गीतोपन्यासः |

उदा – 1. वर्गे 6.00 तः 7 पर्यन्तं योगासनं प्रचलति ।

2. .................................................................. गीतापारायणं प्रचलति ।
3. ..................................................................गीताप्रवचनं प्रचलति ।
4. ..................................................................सम्भाषणवर्गः प्रचलति ।
5. .................................................................. गीताध्ययनं प्रचलति ।

2. तः पर्यन्तम् इति योजयित्वा लिखत –

उदा – द्वितीयाध्यायस्य 55तमश्लोकतः 61तमश्लोकपर्यन्तं स्थितप्रज्ञलक्षणमस्ति ।

2. .......................................... भक्तलक्षणमस्ति । (12.13 – 19 )
3. .......................................... दैवीसम्पत् उक्तास्ति । (16.1–3)
4. .......................................... ईश्वरस्य विभूतयः उक्ताः । (10.20–41)
5. .......................................... विश्वरूपदर्शनम् । (11.10–13)

**अवधेयम्**

'तः–पर्यन्तम्' इत्यस्य एतादृशाः प्रयोगाः अपि भवन्ति –

हिमालयतः कन्याकुमारीपर्यन्तं भारतम् अस्ति ।

आरम्भतः अन्तपर्यन्तं भगवद्गीतां पठतु ।

www.thearyasamaj.org



# 31 कति वारं पठानि ?

वारम् / अद्य आरभ्य

एतत् सम्भाषणम् उच्चैः पठत –

छात्राः – आचार्य, प्रणामाः ।

आचार्यः – प्रणामाः, सर्वे समागताः वा ?

छात्राः – आम् ।

आचार्यः – साधु । ह्यः पाठितान् गीताश्लोकान् सर्वे कण्ठस्थीकृतवन्तः किम् ?

योगेशः – क्षम्यतां श्रीमन् ! अहं न कृतवान् । किन्तु एकवारं पठितवान् ।

सञ्जयः – अहं पञ्चवारं पठितवान् ।

श्रद्धा – श्रीमन् अहं पञ्चवारं पठितवती ।

आचार्यः – समीचीनम् । योगेश ! त्वमपि वारं वारं पठ । एकवारं पठनेन अर्थबोधः न भवति । यदा वयं त्रिवारं, चतुर्वारं वा पठामः तदा सम्यक् अवगन्तुं शक्नुमः । अस्तु, इदानीं सर्वेऽपि द्विवारं श्लोकान् उच्चारयन्तु । तदनन्तरं नूतनान् श्लोकान् पठामः ।

छात्राः – श्रीमन् ! अद्य आरभ्य वयं वारं वारं पठामः ।

आचार्यः – अद्य आरभ्य अहं श्लोकम् एकवारं वदामि ।
भवन्तः तमेव श्लोकं द्विवारं वदन्तु ।

छात्राः – तथैव भवतु श्रीमन् !

1. कोष्ठके दत्तानां शब्दानाम् उपयोगेन यथोदाहरणं वाक्यानि रचयत –

उदा – दीपावली वर्षे एकवारं भवति ।

1. गुरुः छात्रान् ........................................ पाठयति ।
2. भवान् ........................................ पठिष्यति ।
3. वर्षे ............................ वयं नवरात्रोत्सवम् आचरामः ।
4. शिशुः दिने ........................................ दुग्धं पिबति ।
5. अहम् ........................................ सत्यं वदामि ।

एकवारम्
बहुवारम्
कदा
वारं वारम्
अद्य आरभ्य

www.thearyasamaj.org



# 32 शनैः शनैः उपरमेत्

उच्चैः पठत, अवगच्छत च –

| शीघ्रम् / मन्दम् / उच्चैः / शनैः / सम्यक् |
|---|



अश्वः शीघ्रं गच्छति।



गजः मन्दं गच्छति।



सिंहः उच्चैः गर्जति।



चटकः शनैः शब्दं करोति।

गायिका सम्यक् गायति। बालिका सम्यक् पठति। एतत् भोजनम् उत्तमम् अस्ति।

## अभ्यासः

1. शीघ्रम्, मन्दम्, सम्यक्, उच्चैः, शनैः – एतेषु उचितेन शब्देन रिक्तस्थानानि पूरयत –

1. भीमः .................... भोजनं करोति।
2. श्रीकृष्णः.................... रथं चालयति।
3. क्षेपणी ........................... गच्छति।
4. सैनिकानां पत्न्यः ..................... विलपनं कुर्वन्ति।
5. कूर्मः ........................... गच्छति।
6. न शृणोमि किञ्चित् ..................... वदतु।
7. एतत् पुस्तकं बहु .................... अस्ति।
8. भीमः ........................ पाकं करोति स्म।
9. वृद्धः .................. वदति।
10. बुद्धिमान् .................. अवगच्छति।

**अवधेयम्**

एतादृशवाक्यानां प्रश्नकरणे 'कथम्' इत्यस्य अव्ययस्य प्रयोगः भवति।
यथा – भीमः कथं भोजनं करोति ?

www.thearyasamaj.org

# 33 त्यक्त्वोत्तिष्ठ परन्तप !



'क्त्वा' प्रत्ययान्तानि

उच्चैः पठत, अवगच्छत च –

कर्णः – दुर्योधन ! अहं कर्णः ।

दुर्योधनः – कर्ण ! वद । किमर्थं खिन्नः ?

कर्णः – जनाः मां दृष्ट्वा अयं सूतपुत्रः इति परिहसन्ति ।

दुर्योधनः – चिन्तां त्यक्त्वा मया सह वस ।
राज्यं दत्त्वा त्वां महाराजं करोमि ।

कर्णः – भवान् आश्रयं कल्पयित्वा माम् उद्धृतवान् अस्ति ।
अहं किं कृत्वा एतस्मात् ऋणात् मुक्तः भवामि ?

दुर्योधनः – त्वं मम मित्रम् एव । अत्र स्थित्वा प्रतिकारं कुरु ।

कर्णः – एतं प्रसङ्गं स्मृत्वा भवतः सहकारं करोमि ।

एतानि रूपाणि उच्चैः पठत –

| क्रियापदानि | क्त्वान्तानि | क्रियापदानि | क्त्वान्तानि |
|---|---|---|---|
| पठति | पठित्वा | पश्यति | दृष्ट्वा |
| भ्रमति | भ्रमित्वा | दहति | दग्ध्वा |
| क्रीडति | क्रीडित्वा | पृच्छति | पृष्ट्वा |
| धावति | धावित्वा | कर्षति | कृष्ट्वा |
| चलति | चलित्वा | हरति | हृत्वा |
| वदति | उदित्वा | पचति | पक्त्वा |
| त्यजति | त्यक्त्वा | ध्यायति | ध्यात्वा |
| विन्दति | विदित्वा | ददाति | दत्त्वा |
| लभते | लब्ध्वा | शृणोति | श्रुत्वा |
| भवति | भूत्वा | जहाति | हित्वा |
| वर्तते | वर्तित्वा | ईक्षते | ईक्षित्वा |
| वर्धते | वर्धित्वा | रमते | रमित्वा |
| शेते | शयित्वा | भुङ्क्ते | भुक्त्वा |
| स्रंसते | स्रंसित्वा | मोदते | मोदित्वा |
| म्रियते | मृत्वा | ब्रूते | उक्त्वा |
| जायते | जनित्वा | चेष्टते | चेष्टित्वा |

www.thearyasamaj.org



## अभ्यासः

1. यथोदाहरणं रिक्तस्थानानि पूरयत –

1. गच्छति गत्वा
2. तिष्ठति ...............
3. पश्यति ...............
4. रचयति ...............
5. नयति ...............
6. गायति ...............
7. नमति ...............
8. ददाति ...............
9. स्मरति ...............
10. धावति ...............
11. कर्तयति ...............
12. चालयति ...............
13. खादति ...............
14. चोरयति ...............
15. त्यजति ...............
16. पूरयति ...............
17. वर्णयति ...............
18. कथयति ...............
19. चलति ...............
20. भक्षयति ...............

2. एतानि वाक्यानि पठत, क्त्वान्तरूपाणि अवलोकयत च –

1. शत्रून् जित्वा समृद्धं राज्यं भुङ्क्ष्व।
2. शास्त्रविधानोक्तं ज्ञात्वा कर्म कुर्वन्तु।
3. पाण्डवसेनां दृष्ट्वा दुर्योधनः ब्रवीति।
4. गुरून् हत्वा भोगान् कथं भुञ्जीय ?
5. एवम् उक्त्वा अर्जुनः उपाविशत्।
6. तद् धाम गत्वा न निवर्तते।
7. जीवः इन्द्रियाणि गृहीत्वा नवं शरीरं याति।
8. भोगान् भुक्त्वा जीवः पुनः मर्त्यलोकं विशति।
9. तत्त्वं विदित्वा त्वं न शोचितुमर्हसि।
10. ज्ञानासिना संशयं छित्त्वा योगम् आचर।

www.thearyasamaj.org



3. यथोदाहरणं वाक्यद्वयस्य योजनं क्त्वान्तरूपाणि उपयुज्य कुरुत –

यथा – 1. कृष्णः सेनयोः उभयोः मध्ये रथं स्थापयति। सर्वान् पश्यति।

सेनयोः उभयोः मध्ये रथं स्थापयित्वा सर्वान् पश्यति।

2. अर्जुनः 'अहं योद्धुं न शक्नोमि' इति वदति। उपविशति।

3. युद्धे शत्रून् जय। समृद्धं राज्यं भुङ्क्ष्व।

4. अर्जुनः विश्वरूपं पश्यति। भीतः भवति।

5. कृष्णः अर्जुनाय 'दिव्यं चक्षुः' ददाति। विश्वरूपं दर्शयति।

6. धृतराष्ट्रः सञ्जयं पृच्छति। युद्धविवरणं जानाति।

7. सः ईश्वरं जानाति। शान्तिं प्राप्नोति।

8. अर्जुनः कृष्णस्य वाक्यं शृणोति। युद्धाय उत्तिष्ठति।

9. योगिनः कर्मफलानि त्यजन्ति। आत्मशुद्धये कर्म कुर्वन्ति।

10. सञ्जयः कृष्णार्जुनसंवादं स्मरति। हर्षम् अनुभवति।

11. अर्जुनः स्मृतिं लभते। स्वधर्माचरणं करोति।

12. जीवः कर्मफलं भुङ्क्ते। पुनर्जन्म प्राप्नोति।

13. योगिनः मनः आत्मनि योजयन्ति। ध्यानं कुर्वन्ति।

14. कर्मबन्धिनः म्रियन्ते। पुनः जायन्ते।

15. नरः ईश्वरे कर्मणां न्यासं कुरुते। शान्तिं प्राप्नोति।

16. ईश्वरः भक्तं त्रायते। धर्मरक्षणं कुरुते।

17. भक्तः अद्वेष्टा भवति। ईश्वरं भजति।

18. ईश्वरः दुष्कृतां नाशं करोति। साधूनां रक्षणं करोति।

19. मानवाः स्वकर्मणा देवम् अर्चन्ति। सिद्धिं विन्दन्ति।

20. योगी अहङ्कारं त्यजति। शान्तः भवति।

**अवधेयम्**

'क्त्वा' प्रत्ययस्य त्वाप्रत्ययः इत्यपि व्यवहारः अस्ति।

www.thearyasamaj.org



# 34 अखण्डविश्वासः

एतां कथाम् उच्चैः पठत –



महाभारतयुद्धम् आसीत्। भीष्मः कौरवाणां सेनापतिः भूत्वा अष्टदिवसान् यावत् भयङ्करं युद्धं कृतवान्। पाण्डवाः तस्य पुरतः युद्धं कर्तुम् असमर्थाः चिन्तामग्नाः आसन्। तथापि भीष्मः पाण्डवेषु एकमपि न मारितवान् इति मत्वा दुर्योधनः खिन्नः आसीत्।

अतः सः भीष्मं दृष्ट्वा अवदत् – "भोः पितामह ! मदपेक्षया पाण्डवाः एव भवतः प्रियाः। अतः भवान् युद्धेऽपि तैः सह क्रीडति। न कमपि मारयति" इति।

एतत् श्रुत्वा भीष्मः दुःखितः जातः। झटिति सः प्रतिज्ञां कृतवान् यत् "श्वः युद्धं कृत्वा अहम् अर्जुनं मारयिष्यामि। अथवा तेन पराजितः वा भविष्यामि" इति।

भीष्मस्य प्रतिज्ञा सर्वैः ज्ञाता। तां श्रुत्वा पाण्डवपक्षे सर्वेऽपि वीराः चिन्तिताः अभवन्। श्रीकृष्णः अपि चिन्तावशात् रात्रौ निद्रां न प्राप्तवान्। 'भीष्मप्रतिज्ञां ज्ञात्वा अर्जुनः तु नितरां चिन्तितः स्यात्' इति चिन्तयित्वा सः तस्य सान्त्वनं कर्तुम् अर्जुनस्य सेनाशिबिरं गतवान्।

परन्तु श्रीकृष्णस्य महत् आश्चर्यं सञ्जातम्। यतः यदा सः गत्वा दृष्टवान् तदा तत्र अर्जुनः गाढनिद्रायां मग्नः आसीत्। सः अर्जुनम् उत्थाप्य पृष्टवान् – "भोः पार्थ ! किं भवान् भीष्मस्य प्रतिज्ञां न श्रुतवान् ?" इति।

"श्रुतवान् ..." – इति उक्तवान् अर्जुनः।

"तर्हि तां श्रुत्वापि कथं भवान् चिन्तितः नास्ति ... ? मृत्युभयात् उद्विग्नः अपि नास्ति .. ? – इति श्रीकृष्णः पृष्टवान्।

अर्जुनः किञ्चित् हसित्वा शान्तस्वरेण उक्तवान् – "भगवन् ! अहं सम्यक् जानामि यत् यः मम

www.thearyasamaj.org



योगक्षेमस्य चिन्तां करोति सः जागरणं कुर्वन् अस्ति इति। एवं सति अहं किमर्थं चिन्तां कृत्वा दुःखितः भवामि .. ? स्वस्य भक्तस्य भीष्मप्रतिज्ञायाः रक्षणभारः भगवतः भवतः एव। मम का चिन्ता तत्र। अतः एव अहं निश्चिन्ततया निद्रां कृतवान् अस्मि'' इति।

सत्यं खलु ! अर्जुनस्य एतादृशं दृढं विश्वासं मत्वा एव श्रीकृष्णः पार्थसारथिः अभवत् !

## अभ्यासः

1. एतस्मिन् पाठे प्रयुक्तानि क्त्वाप्रत्ययान्तानि रूपाणि चित्वा लिखत–

उदा – भूत्वा ..............................................................

..............................................................

..............................................................

..............................................................

2. यथोदाहरणं वाक्यद्वयं कृत्वा लिखत –

उदा – भीष्मः सेनापतिः भूत्वा युद्धं करोति।
भीष्मः सेनापतिः भवति। युद्धं करोति।

1. सः भीष्मं दृष्ट्वा अवदत्।

........................ ................................ ।

2. भीष्मः एतत् श्रुत्वा दुःखितः भवति।

........................ ................................ ।

3. श्वः युद्धं कृत्वा अर्जुनं मारयिष्यामि।

........................ ................................ ।

4. श्रीकृष्णः भीष्मप्रतिज्ञां ज्ञात्वा उपायं चिन्तयति।

........................ ................................ ।

5. श्रीकृष्णः शिबिरं गत्वा अर्जुनं दृष्टवान्।

........................ ................................ ।

6. अर्जुनः हसित्वा शान्तस्वरेण वदति।

........................ ................................ ।

7. अहं किमर्थं चिन्तां कृत्वा दुःखितः भवामि ?

........................ ................................ ।

www.thearyasamaj.org



# 35. अवलोक्य विश्वरूपम्

ल्यपूप्रत्ययान्तानि

एतद् सम्भाषणम् उच्चैः पठत, जानीत -

धृतराष्ट्रः - सञ्जय ! भगवतः विश्वरूपम् अवलोक्यअर्जुनः किम् अकरोत् ?

सञ्जयः - राजन् ! अत्यद्भुतं तत् स्वरूपं वीक्ष्य पार्थः अवेपत । अञ्जलिं निबध्य भीतभीतः सः कृष्णं प्रणम्य सगद्गदम् अवदत् ।

धृतराष्ट्रः - सञ्जय ! भगवन्तं संस्तुत्य पार्थः किम् अवदत् ?

सञ्जयः - महाराज ! अदृष्टपूर्वं रूपम् अवेक्ष्य भीतः सः कृष्णं चतुर्भुजं रूपं दर्शयितुं प्रार्थितवान् । हे राजन् ! हरेः तत् अद्भुतं रूपं संस्मृत्य संस्मृत्य हृष्यामि । यत्र योगेश्वरः कृष्णः तथा धनुर्धरः पार्थः च भवति तत्र विजयः धर्मः च भवतीति अहं मन्ये ।

धृतराष्ट्रः - सञ्जय ! गीतोपदेशं निशम्य नष्टमोहः पार्थः अन्ये पाण्डवाः च किं कृतवन्तः ?

सञ्जयः - राजन् ! तदनन्तरम् अर्जुनः भूमौ स्थितं गाण्डीवं स्वीकृत्य धृतवान् । गाण्डीवधरं पार्थं सन्दृश्य सर्वे तत्र आगत्य स्थिताः । युधिष्ठिरः स्वस्य कवचं विसृज्य वरायुधं निक्षिप्य क्षिप्रं रथात् अवरुह्य पद्भ्यामेव पितामहम् अभिप्रेक्ष्य अगच्छत् । अन्येऽपि राजानः तम् अनुसृत्य गतवन्तः ।

**अवधेयम्**

| उपसर्गरहितानि क्रियापदानि | | | उपसर्गसहितानि क्रियापदानि | | |
|---|---|---|---|---|---|
| गच्छति | → | गत्वा | आगच्छति | → | आगत्य |
| नयति | → | नीत्वा | आनयति | → | आनीय |
| गृह्णाति | → | गृहीत्वा | संगृह्णाति | → | संगृह्य |
| स्मरति | → | स्मृत्वा | विस्मरति | → | विस्मृत्य |
| त्यजति | → | त्यक्त्वा | परित्यज्यति | → | परित्यज्य |
| गच्छति | → | गत्वा | अवगच्छति | → | अवगत्य |

धातुः यदि उपसर्गसहितः भवति, तर्हि क्त्वाप्रत्ययस्य स्थाने ल्यप्प्रत्ययः भवति । आगत्य, विस्मृत्य, आनीय - इत्यादीनि ल्यप्प्रत्ययान्तानि अव्ययानि । ल्यबन्तानि इत्यपि तेषां नाम ।

www.thearyasamaj.org



उच्चैः पठत, जानीत च –

| | क्त्वान्तरूपम् | उपसर्गसहितं क्रियापदम् | ल्यबन्तरूपम् |
|---|---|---|---|
| गच्छति | गत्वा | आगच्छति | आगत्य |
| नयति | नीत्वा | आनयति | आनीय |
| करोति | कृत्वा | उपकरोति | उपकृत्य |
| स्मरति | स्मृत्वा | विस्मरति | विस्मृत्य |
| लिखति | लिखित्वा | विलिखति | विलिख्य |
| क्रीणाति | क्रीत्वा | विक्रीणीते | विक्रीय |
| जानाति | ज्ञात्वा | विजानाति | विज्ञाय |
| स्थापयति | स्थापयित्वा | संस्थापयति | संस्थाप्य |
| प्रेषयति | प्रेषयित्वा | सम्प्रेषयति | संप्रेष्य |
| हरति | हृत्वा | संहरति | संहृत्य |
| नमति | नत्वा | प्रणमति | प्रणम्य |
| क्षालयति | क्षालयित्वा | प्रक्षालयति | प्रक्षाल्य |
| कर्षति | कृष्ट्वा | आकर्षति | आकृष्य |
| तिष्ठति | स्थित्वा | उत्तिष्ठति | उत्थाय |
| स्मरति | स्मृत्वा | संस्मरति | संस्मृत्य |
| भवति | भूत्वा | अनुभवति | अनुभूय |
| दिशति | दिष्ट्वा | निर्दिशति | निर्दिश्य |
| ईक्षते | ईक्षित्वा | निरीक्षते | निरीक्ष्य |
| भाषते | भाषित्वा | सम्भाषते | सम्भाष्य |
| वर्तते | वर्तित्वा | परिवर्तते | परिवृत्य |
| कुरुते | कृत्वा | परिष्कुरुते | परिष्कृत्य |

www.thearyasamaj.org



## अभ्यासः

1. यथोदाहरणं ल्यबन्तरूपाणि लिखत –

उदा – प्र + क्षालयति　　　　प्रक्षाल्य

| | | | |
|---|---|---|---|
| आ + गच्छति | .............. | प्र + नमति | ............... |
| परि + गणयति | परिगणय्य | वि + गणयति | ............... |
| निर् + गच्छति | ................ | उत् + तिष्ठति | ............... |
| सम् + स्थापयति | ................ | अनु + भवति | ............... |
| सम् + हरति | ................ | परि + वेषयति | ............... |
| परि + त्यजति | ................ | अभि + नन्दति | अभिनन्द्य |
| आ + छादयति | आच्छाद्य | उप + करोति | .............. |
| प्र + आप्नोति | प्राप्य | उद् + धरति | उद्धृत्य |
| सम् + आप्नोति | ................ | वि + चारयति | विचार्य |
| सं + ईक्षते | समीक्ष्य | प्र + पद्यते | प्रपद्य |
| निर् + ईक्षते | निरीक्ष्य | सं + भाषते | सम्भाष्य |

2. कोष्ठकात् शुद्धं ल्यबन्तरूपं चित्वा रिक्तस्थाने लिखत –

1. विलिख्य
2. ...............................।
3. ...............................।
4. ...............................।
5. ...............................।
6. ...............................।
7. ...............................।
8. ...............................।
9. ...............................।
10. ..............................।
11. ..............................।
12. ..............................।
13. ..............................।

| | |
|---|---|
| विलिख्य | विलिखित्वा |
| आनीत्वा | आनीय |
| सम्प्रेषयित्वा | सम्प्रेष्य |
| विज्ञाय | विज्ञात्वा |
| उद्धृत्वा | उद्धृत्य |
| समाप्य | समापयित्वा |
| विचार्य | विचारयित्वा |
| उद्घाट्य | उद्घाटयित्वा |
| प्रविष्ट्वा | प्रविश्य |
| आहूय | आहूत्वा |
| संहत्वा | संहृत्य |
| परिवेष्य | परिवेषयित्वा |
| उत्थित्वा | उत्थाय |

www.thearyasamaj.org



3. यथोदाहरणं ल्यबन्तरूपस्य उपयोगेन वाक्यद्वयं योजयित्वा वदत –

1. छात्रः विद्यालयं प्रविष्टवान्। पठितवान्। छात्रः विद्यालयं प्रविश्य पठितवान्।
2. त्वं सर्वधर्मान् परित्यज। मामेकं शरणं व्रज। ................................... ।
3. सञ्जयः केशवार्जुनयोः संवादं संस्मरति। हृष्यति। ................................... ।
4. दुर्योधनः आचार्यम् उपसङ्गच्छते। ब्रवीति। ................................... ।
5. योगी द्वाराणि संयच्छति। मनः हृदि स्थापयति। ................................... ।
6. प्राणं भ्रुवोः मध्ये आवेशयति। ध्यानं करोति। ................................... ।
7. पूर्णस्य पूर्णम् आदत्ते। पूर्णम् एव अवशिष्यते। ................................... ।
8. मानवः स्वकर्मणा देवम् अभ्यर्चति। सिद्धिं विन्दति। ................................... ।
9. त्वं मम उपदेशं विमृश। यथेच्छं कुरु। ................................... ।
10. योगी निश्चलम् उपविशति। योगम् आचरति। ................................... ।
11. स्वकर्माणि मनसा संन्यस्यन्तु। सुखं जीवन्तु। ................................... ।
12. ज्ञानम् उपाश्रयति। ईश्वरस्य साधर्म्यं प्राप्नोति। ................................... ।
13. क्षेत्रक्षेत्रज्ञज्ञानं विजानाति। ईश्वरभावम् आप्नोति। ................................... ।
14. पार्थः कृष्णं शिरसा प्रणमति। कृताञ्जलिः वदति। ................................... ।
15. योगी प्राणं मूर्ध्नि आधत्ते। योगम् आचरति। ................................... ।
16. ज्ञानी इन्द्रियाणि संहरते। मनःस्थैर्यम् आप्नोति। ................................... ।

एतानि वाक्यानि परिशीलयत –

1. क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ।
2. आसने उपविश्य योगम् आचरन्तु।
3. सर्वाणि कर्माणि ईश्वरे संन्यस्य अध्यात्मचेतसा जीवनं कुरु।
4. आत्मना आत्मानं संस्तभ्य कामरूपं शत्रुं जहि।
5. उभयोः सेनयोः मध्ये रथं स्थापयित्वा कृष्णः अर्जुनम् उक्तवान्।
6. सिद्ध्यसिद्ध्योः समः भूत्वा कर्माणि कुरु।
7. स्वधर्मम् अपि अवेक्ष्य विकम्पितुं न अर्हसि।
8. दम्भमानमदान्विताः कामम् आश्रित्य प्रवर्तन्ते।
9. एतत् शास्त्रं बुद्ध्वा भवान् बुद्धिमान् स्यात्।
10. तमः ज्ञानम् आवृत्य प्रमादे सञ्जयति।

www.thearyasamaj.org



11. केशवस्य एतत् वचनं श्रुत्वा किरीटी अवदत्।
12. भगवन्तं स्मरन्, शरीरं मुक्त्वा नरः देवपदं गच्छति।

4. तत्तत्संख्याकं गीताश्लोकं परिशील्य आवरणे स्थितस्य धातोः क्त्वान्तेन ल्यबन्तेन वा रूपेण रिक्तस्थानानि पूरयत –

| | | |
|---|---|---|
| 1. | दुर्योधनः आचार्यम् ..................... (उप+सं+गम्) वचनम् अब्रवीत्। | (1.2) |
| 2. | केशवस्य वचनं .....................(श्रु) किरीटी भीतवान्। | (11.35) |
| 3. | अहं वैश्वानरः .....................(भू) चतुर्विधम् अन्नं पचामि। | (15.14) |
| 4. | भीष्मः सिंहनादं ..................... (वि+नद्) शङ्खम् अधमत्। | ( 1.12 ) |
| 5. | तत् .....................(ज्ञा) अमृतत्वम् अश्नुते। | (13.12) |
| 6. | रजसि प्रलयं .....................(गम्) कर्मसङ्गिषु जायते। | (14.15) |
| 7. | गोविन्दम् .....................(वच्) तूष्णीं बभूव। | (2.9) |
| 8. | दुर्योधनः पाण्डवानीकं ..................... (दृश्)द्रोणम् अब्रवीत्। | (1.2) |
| 9. | भीष्मः शङ्खं ..................... (ध्मा) हर्षं जनयति। | (1.12) |
| 10. | माधवः स्यन्दने ..................... (ष्ठा) पाञ्चजन्यम् अधमत्। | (1.14) |
| 11. | योधाः प्राणान् ..................... (त्यज) युद्धार्थम् अवस्थिताः। | (1.33) |
| 12. | वयं स्वजनं ..................... (हन्) सुखिनः न भवामः। | (1.37) |
| 13. | अर्जुन ! स्वधर्ममपि च ..................... (अव+ईक्ष्) न विकम्पितुमर्हसि। | (2.31) |
| 14. | मनीषिणः कर्मफलं ..................... (त्यज्) अनामयं पदं गच्छन्ति। | (2.51) |
| 15. | श्रद्धावान् ज्ञानं ..................... (लभ्) परां शान्तिम् अधिगच्छति। | (4.39) |
| 16. | अर्जुन, हृदयस्थम् अज्ञानजं संशयं (छिद्) उत्तिष्ठ। | (4.42) |

5. तत्तत्संख्याकं गीताश्लोकम् उच्चैः पठित्वा एतासु पङ्क्तिषु क्त्वान्तं ल्यबन्तं वा जानीत –

| | |
|---|---|
| 1.2 दृष्ट्वा तु पाण्डवानीकम्। | 1.20 अथ व्यवस्थितान् दृष्ट्वा ....। |
| 1.20 धनुः उद्यम्य पाण्डवः। | 1.36 निहत्य धार्तराष्ट्रान् नः .... । |
| 1.37 स्वजनं हि कथं हत्वा सुखिनः स्याम ? | 3.43 एवं बुद्धेः परं बुद्ध्वा संस्तभ्य आत्मानम्। |
| 6.12 तत्रैकाग्रं मनः कृत्वा ... । | 6.12 उपविश्य आसने युञ्ज्यात् .... । |
| 8.12 सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च। | 8.19 भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते। |
| 9.13 ज्ञात्वा भूतादिम् अव्ययम्। | 11.35 सगद्गदं भीतभीतः प्रणम्य। |
| 18.51 धृत्यात्मानं नियम्य च। | |

www.thearyasamaj.org

# 36 आत्मैव आत्मनो बन्धुः



च / अपि / एव / इति / यत्

एतानि वाक्यानि उच्चारयत –

1. कुन्त्याः पुत्राः युधिष्ठिरः, भीमः, अर्जुनः च सन्ति।
2. सत्त्वं, रजः, तमः च इति त्रयः गुणाः।
3. जाग्रत्, स्वप्नः, सुषुप्तिः च इति तिस्रः अवस्थाः सन्ति।
4. भगवद्गीता ब्रह्मसूत्रम् उपनिषदः च प्रस्थानत्रयी।
5. मानापमानयोः शत्रौ मित्रे च समः जनः कृष्णस्य प्रियः।
6. संन्यासः कर्मयोगः च निःश्रेयसकरौ स्तः।
7. सांख्यं च योगं च एकं यः पश्यति सः पश्यति।
8. भूमिः, आपः, अनलः, वायुः, खं, मनः, बुद्धिः, अहङ्कारः च इति भगवतः प्रकृतिः अष्टधा।

एतत्संख्याकेषु गीताश्लोकेषु चकारस्य प्रयोगं परिशीलयत –

1.1, 1.4, 1.5, 1.6, 1.8, 7.4, 7.16, 9.19, 10.3, 10.7, 10.9, 10.32, 10.34, 12.18, 16.4, 16.6, 15.15, 18.14, 17.14, 17.15

उच्चैः पठत –

रमा पठति। नूतनः पठति। गिरिः पठति।

रमा नूतनः गिरिः च पठन्ति।

* अत्र शिशवः बालाः युवकाः युवत्यः ज्येष्ठाः च सन्ति।
* प्रयागे गङ्गा यमुना सरस्वती च इति तिस्रः नद्यः मिलन्ति।
* अस्माकं परीक्षा सोमवासरे मङ्गलवासरे च अस्ति।
* विमलायाः विमलेशस्य च कक्ष्या कुत्र अस्ति ?
* इदं जलं राजेशाय कल्पनायै, रमायै च यच्छतु।

**अवधेयम्**

'च' इति अव्ययस्य प्रयोगः समुच्चयः इत्यर्थे भवति।

उदा – आम्रं सेवफलं च।

– माता पिता बालाः च गच्छन्ति।

www.thearyasamaj.org



## अपि

उच्चैः पठत –

केवलं बालाः न, युवकाः अपि धाविष्यन्ति।
महाभारते केवलं कथाः न, तत्त्वचिन्तनम् अपि अस्ति।
कौरवेषु दुष्टाः एव न, सज्जनाः अपि आसन्।
कृष्णः अर्जुनस्य सारथिः अस्ति, मित्रम् अपि।
अर्जुनः केवलं वामहस्तेन न, दक्षिणहस्तेन शरं प्रयुङ्क्ते।
योगी कर्म कुर्वन् अपि न लिप्यते।
सः गुरुणा अपि दुःखेन न विचाल्यते।
सांख्यैः यत् प्राप्यते, योगैः अपि तत् गम्यते।

एतेषु वाक्येषु अपि इत्यव्ययम् अवलोकयत –

1. श्रुत्वा अपि ब्रह्म कश्चित् न जानाति।
2. स्वधर्मम् अपि चावेक्ष्य न विकम्पितुम् अर्हसि।
3. स्वल्पम् अपि अस्य धर्मस्य महतः भयात् त्रायते।
4. इन्द्रियाणि यततः पुरुषस्य अपि मनः हरन्ति।
5. न कश्चित् क्षणम् अपि कर्म विना न तिष्ठति।
6. भक्ताः कर्मभिः मुच्यन्ते, श्रद्धावन्तः अनसूयन्तः अपि मुच्यन्ते।
7. ज्ञानी अपि स्वप्रकृत्यनुसारं चेष्टते।
8. अनिच्छन् अपि मनुष्यः कथं पापं चरति ?
9. चातुर्वण्यस्य कर्ता अकर्ता अपि ईश्वरः अस्ति।
10. पूर्वैः मुमुक्षुभिः अपि ज्ञात्वा कार्यं कृतम्।
11. पण्डिताः अपि कार्याकार्यविषये भ्रमन्ति।
12. कर्म अकर्म विकर्म अपि ज्ञातव्यम्।
13. निःसङ्गः कार्यं कुर्वन् अपि कर्मबन्धनं न प्राप्नोति।
14. अत्यन्तं पापी अपि ज्ञानेन मोक्षं प्राप्नोति।
15. योगयुक्तः जितेन्द्रियः कार्यं कुर्वन् अपि न नश्यति।
16. सर्वाणि कार्याणि अपि ईश्वरार्पणरूपेण करणीयानि।
17. शौर्यं, तेजः, धृतिः, युद्धे अपलायनमपि क्षात्रस्वभावः भवति।

www.thearyasamaj.org



18. यस्य अहङ्कारः नास्ति सः कृत्वा अपि न करोति।
19. शौचम्, आर्जवं, ब्रह्मचर्यम्, अहिंसा अपि शारीरं तपः भवति।
20. यातयामं, गतरसं, पूति, पर्युषितम्, उच्छिष्टम् अमेध्यम् अपि भोजनं तामसप्रियं भवति।
21. मनुष्येषु सात्त्विकी, राजसी, तामसी अपि प्रकृतिः भवति।
22. अज्ञानिनः एतत् मम अस्ति, तत् अपि मम भविष्यति इति चिन्तयन्ति।

**अवधेयम्** 'अपि' इति अव्ययस्य प्रयोगः सप्तभिः विभक्तिभिः युक्तेषु वाक्येषु अपि शक्यः।

उच्चैः पठत –

**एव**



सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥

अत्र – उपनिषदः एव गावः।
श्रीकृष्णः एव दोग्धा।
पार्थः एव वत्सः।
बुद्धिमन्तः एव भोक्तारः।

**अवधेयम्**

'एव' इति अव्ययस्य प्रयोगः 'निश्चयः' इत्यर्थे क्रियते। एतत् अन्यस्य निवारणं करोति।
'एव' इति अव्ययस्य प्रयोगः अपि सप्तभिः विभक्तिभिः युक्तेषु वाक्येषु शक्यः।

## अभ्यासः

1. यथोदाहरणं वाक्यानि पुनः लिखत –

यथा – 1. भवान् अधुना गृहं गमिष्यति। भवान् कार्यालयं न गमिष्यति।
भवान् अधुना गृहम् एव गमिष्यति, कार्यालयं न।

2. वयं सर्वे भोजनं करिष्यामः। वयं मधुरं न खादिष्यामः।

........................................................................ ।

3. ताः विद्यालयं गच्छन्ति। ताः अन्यत्र न गच्छन्ति।

........................................................................ ।

4. पुस्तकालये पुस्तकानि सन्ति। पुस्तकालये उत्तरपुस्तकानि न सन्ति।

........................................................................ ।

www.thearyasamaj.org



5. सौचिकः वस्त्रं सीव्यति । सौचिकः वस्त्रं न वयति ।

........................................................................ ।

6. सिंहः गर्जति । शुकः न गर्जति ।

........................................................................ ।

7. वृक्षः फलति । काष्ठं न फलति ।

........................................................................ ।

8. सज्जनः उपकारं करोति । मूर्खः न करोति ।

........................................................................ ।

9. हंसः तरति । मूषकः न तरति ।

........................................................................ ।

10. मयूरः नृत्यति । शुनकः न नृत्यति ।

........................................................................ ।

11. नदी वहति । सागरः न वहति ।

........................................................................ ।

एतानि वाक्यानि उच्चैः पठत –

1. अस्माकम् अधिकारः कर्मणि एव अस्ति ।
2. जनकादयः कार्येण एव सिद्धिं प्राप्तवन्तः ।
3. लोकसङ्ग्रहम् एव विचिन्त्य कार्यं करणीयम् ।
4. सर्वदा कार्यम् एव करणीयम् ।
5. ब्रह्मकर्मसमाधिना ब्रह्म एव गन्तव्यम् ।
6. ज्ञानेन एव पापनाशः भवति ।
7. ईश्वरम् एव शरणं गच्छ ।
8. श्रद्धावान् एव ज्ञानं प्राप्नोति ।
9. दुष्टाः ईश्वरम् अज्ञात्वा अधोगतिम् एव यान्ति ।
10. ईश्वरे एव मनः योजयसि तर्हि सुखं भवति ।

इति

एतत् सम्भाषणम् उच्चैः पठत –

अर्जुनः – कृष्ण ! मां क्षमस्व ।

कृष्णः – पार्थ ! किमर्थं त्वं क्षमां याचसे ?

अर्जुनः – अहं तव महत्त्वं न ज्ञातवान् । त्वं मम सखा इति मत्वा व्यवहृतवान् । त्वं सामान्यः इति विचार्य यादव, सखे इति सम्बोधितवान् ।

कृष्णः – पार्थ ! चिन्तां मा कुरु । अज्ञानं ज्ञानम् आवृणोति इति जानीहि । तेन जन्तवः मुह्यन्ति इति

www.thearyasamaj.org



अपि। परन्तु बुधाः तु अहं सर्वस्य प्रभवः इति मत्वा मां भजन्ते। तेषाम् अज्ञानजं तमः अहं ज्ञानदीपेन नाशयामि। त्वम् इदानीं ज्ञानं प्राप्तवान् असि।

अर्जुनः – कृष्ण ! मम मोहः नष्टः इति, स्मृतिः लब्धा इति च चिन्तयामि। अनुगृहीतोऽस्मि।

एतानि वाक्यानि उच्चैः पठत –

1. 'संस्कृतम् एव राजभाषा भवेत्' इति डा. भीमराव–अम्बेड्करः अचिन्तयत्।
2. 'योगक्षेमं वहाम्यहम्' इति श्रीकृष्णः अवदत्।
3. 'सीदन्ति मम गात्राणि' इति अर्जुनः अवदत्।
4. 'विमृश्यैतदशेषेण यथेच्छसि तथा कुरु' इति श्रीकृष्णः उक्तवान्।
5. 'तदात्मानं सृजाम्यहम्' इति कः उक्तवान् ?

## अवधेयम्

यदा कस्यापि अन्यस्य जनस्य ग्रन्थस्य वा वचनं, कथनं, सन्देशः – इत्यादीनाम् उद्धरणं क्रियते तदा वचन–कथन–सन्देशादीनाम् अन्ते 'इति' अव्ययस्य प्रयोगः भवति।

* 'इति' अव्ययात् पूर्वं वचनं कथनं वा यथावत् उच्यते।

यथा – 'अहम् अद्य एव मिलामि' इति नागेन्द्रः अवदत्।

## अभ्यासः

3. 'इति' शब्दं प्रयुज्य वाक्यानि पुनः लिखत –

1. 'अहम् अद्य एव कार्यं पूर्णं करिष्यामि।' नवीनः अवदत्।
2. 'सत्यम् एव जीवनस्य आधारशिला।' महात्मा गान्धिः अचिन्तयत्।
3. 'राष्ट्राय इदं न मम।' श्रीगुरुजीः चिन्तितवान्।
4. 'भवन्तः मह्यं रक्तं यच्छन्तु, अहं भवद्भ्यः स्वातन्त्र्यं दास्यामि।' सुभाषचन्द्रबसुः उद्घोषितवान्।
5. 'बालाः धरायाः पुष्पाणि।' रवीन्द्रनाथठाकुरस्य चिन्तनम् आसीत्।

1. .................................................................................. ।
2. .................................................................................. ।
3. .................................................................................. ।
4. .................................................................................. ।
5. .................................................................................. ।

www.thearyasamaj.org

3. यथोदाहरणं वाक्यानि लिखत –

1. 'सत्यमेव जयते' – मुण्डकोपनिषद्
2. 'कर्मण्येवाधिकारस्ते' – श्रीमद्भगवद्गीता
3. 'गुणाः पूजास्थानम्' – भवभूतिः
4. 'सत्यं वद, धर्मं चर' – तैत्तिरीयोपनिषद्
5. 'यतो धर्मस्ततो जयः' – महाभारतम्
6. 'सर्वमात्मवशं सुखम्' – चाणक्यनीतिः

उदा – 'सत्यमेव जयते' इति मुण्डकोपनिषदः वचनम्।

2. .................................................................................. ।
3. .................................................................................. ।
4. .................................................................................. ।
5. .................................................................................. ।
6. .................................................................................. ।

उच्चैः पठत, जानीत च –

यत्

1. युद्धं न करोमि इति मा वदतु।
   – मा वदतु यत् युद्धं न करोमि।
2. 'कुरुक्षेत्रे युयुत्सवः किम् अकुर्वत' इति धृतराष्ट्रः पृष्टवान्।
   – धृतराष्ट्रः पृष्टवान् यत् कुरुक्षेत्रे युयुत्सवः किम् अकुर्वत।
3. 'मम पूर्वजन्मानि कानि ?' इति अहं स्मरामि।
   – अहं स्मरामि यत् मम पूर्वजन्मानि कानि ?

**अवधेयम्**

इति इत्यस्य प्रयोगद्वारा यत् उच्यते तत् 'यत्'पदयोगेन अपि वक्तुं शक्यते।
उदा – 'लोको भिन्नरुचिः' इति पण्डिताः वदन्ति।
पण्डिताः वदन्ति यत् लोको भिन्नरुचिः।

4. यत् इति पदम् उपयुज्य वाक्यानि रचयत –

1. 'परोपकाराय एव मम जीवनम्' – सज्जनाः चिन्तयन्ति।
2. 'हितं मनोहारि च वचः दुर्लभम्' – भारवेः वचनम् अस्ति।
3. 'सत्यं वद' – गुरुः शिष्यम् अकथयत्।
4. 'कुत्र प्रदर्शनम्' – मां मा पृच्छ।

www.thearyasamaj.org



5. 'उत्तिष्ठत जाग्रत' स्वामिनः विवेकानन्दस्य उद्घोषः ।

1. ........................................................................ ।

2. ........................................................................ ।

3. ........................................................................ ।

4. ........................................................................ ।

5. ........................................................................ ।

## 5. 'इति' शब्दं परित्यज्य 'यत्' शब्दं योजयित्वा वाक्यं रचयत –

उदा – ईशावास्यमिदं सर्वम् इति ईशावास्योपनिषदः कथनम् अस्ति ।
ईशावास्योपनिषदः कथनम् अस्ति यत् ईशावास्यमिदं सर्वम् ।

2. 'क्षम्यताम्, क्षम्यताम्' इति अनुजः अवदत् ।

........................................................................ ।

3. 'आगच्छतु, आगच्छतु' इति गृहस्वामी अवदत् ।

........................................................................ ।

4. 'शीघ्रं शीघ्रं चलतु' इति पिता कथयति ।

........................................................................ ।

5. 'मया एव क्रियते' इति शङ्करः वदति ।

........................................................................ ।

6. 'वसुधैव कुटुम्बकम्' इति भावना विश्वशान्तेः मूलम् अस्ति ।

........................................................................ ।

7. 'कर्मण्येवाधिकारस्ते मा फलेषु' इति कृष्णः अवदत् ।

........................................................................ ।

8. 'अहं न योत्स्ये' इति अर्जुनः उक्तवान् ।

........................................................................ ।

9. 'स्वधर्मे निधनं श्रेयः' इति जानीत ।

........................................................................ ।

10. 'काम्यानां कर्मणां न्यासः संन्यासः' इति कवयः वदन्ति ।

........................................................................ ।

www.thearyasamaj.org

3. अधः कृष्णस्य उपदेशवाक्यानि दत्तानि। तानि 'यत्' इति पदेन पुनः कथयत –

यथा – कृष्णः अवदत् यत् मन्मनाः भव।

1. मन्मनाः भव। ........................................ ।
2. अहं पापेभ्यः मोक्षयिष्यामि। ........................................।
3. मामेकं शरणं व्रज। ........................................ ।
4. सदोषमपि सहजं कर्म न त्यजेत्। ........................................।
5. श्रद्धावान् लभते ज्ञानम्। ........................................।
6. अहं लोकक्षयकृत् प्रवृद्धः कालः अस्मि। ........................................।
7. योगक्षेमं वहाम्यहम्। ........................................।
8. आत्मना आत्मानम् उद्धरेत्। ........................................।
9. ये यथा मां प्रपद्यन्ते तान् तथैव भजामि। ........................................।
10. अहं कर्म न कुर्यां चेत् लोकाः उत्सीदेयुः। ........................................।
11. अहं सर्वभूतेषु समः अस्मि। ........................................।

4. एतेषु गीताश्लोकेषु अव्ययानि अवलोकयत –

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥14.02॥

अपरं भवतो जन्म परं जन्म विवस्वतः।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥04.04॥

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठायुध्यस्व जेतासि रणे सपत्नान् ॥ 01.34 ॥
भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥ 01.08 ॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ 02.66 ॥
अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ 01.04 ॥

www.thearyasamaj.org

# 37 दिव्यं ददामि ते चक्षुः



उच्चैः पठत जानीत च –

चतुर्थीविभक्तिः



शिवः



अर्जुनः



शिवः अर्जुनाय पाशुपतास्त्रं ददाति।



आञ्जनेयः



सीता



आञ्जनेयः सीतायै अङ्गुलीयकं ददाति।



भीमः



द्रौपदी



भीमः द्रौपद्यै सौगन्धिकपुष्पं ददाति।

1. इन्द्रः कर्णाय शक्त्यायुधं दत्तवान्।
2. शिक्षिका छात्रायै गीतां दत्तवती।
3. भक्तः देवतायै फलम् अर्पयति।
4. कृष्णः अर्जुनाय दिव्यं चक्षुः दत्तवान्।
5. यत् कस्मै अपि अश्रद्धया ददाति तत् असत् भवति।

www.thearyasamaj.org



6. देवाः मानवाय इष्टान् भोगान् यच्छन्ति।
7. मनुष्याः देवाय हविः अर्पयन्ति।
8. भक्ताय ईश्वरः सद्बुद्धिं ददाति।
9. कस्मै अपि यत् किमपि ददाति तत् अपि ईश्वरार्पणं करोतु।
10. अभक्ताय गीता न देया।
11. भक्ताः भक्त्या पत्रं, पुष्पं, फलम् इत्यादि ईश्वराय ददति।
12. ज्ञानिनः शुश्रूषवे ज्ञानं ददति।
13. भगवान् मुमुक्षवे मोक्षं ददाति।

**अवधेयम्**

| प्रथमाविभक्तिः | | | चतुर्थीविभक्तिः | | |
|---|---|---|---|---|---|
| योधः | योधौ | योधाः | योधाय | योधाभ्याम् | योधेभ्यः |
| हृषीकेशः | हृषीकेशौ | हृषीकेशाः | हृषीकेशाय | हृषीकेशाभ्याम् | हृषीकेशेभ्यः |
| देवता | देवते | देवताः | देवतायै | देवताभ्याम् | देवताभ्यः |
| वीणा | वीणे | वीणाः | वीणायै | वीणाभ्याम् | वीणाभ्यः |
| महती | महत्यौ | महत्यः | महत्यै | महतीभ्याम् | महतीभ्यः |
| ब्राह्मी | ब्राह्म्यौ | ब्राह्म्यः | ब्राह्म्यै | ब्राह्मीभ्याम् | ब्राह्मीभ्यः |
| पात्रं | पात्रे | पात्राणि | पात्राय | पात्राभ्याम् | पात्रेभ्यः |
| गात्रं | गात्रे | गात्राणि | गात्राय | गात्राभ्याम् | गात्रेभ्यः |

## अभ्यासः

1. कौरवपाण्डवानां कन्दुकक्रीडाप्रसङ्गे कः कस्मै कन्दुकं ददाति इति अत्र दर्शितम् अस्ति। तद् दृष्ट्वा यथोदाहरणं वाक्यानि लिखत –

युधिष्ठिरः - नकुलः - सहदेवः - सुबाहुः - अर्जुनः - युयुत्सुः - भीमः - दुर्योधनः - सोमकीर्तिः - दुश्शला - विवित्सुः।

उदा – युधिष्ठिरः नकुलाय कन्दुकं ददाति। ................................... ।

................................... । ................................... ।

................................... । ................................... ।

................................... । ................................... ।

................................... । ................................... ।

www.thearyasamaj.org



एतानि वाक्यानि उच्चैः पठत –

1. दाता यतये भिक्षां ददाति।
2. कृष्णः साधवे अभयं ददाति।
3. प्रजापतिः कर्त्रे कर्मफलं ददाति।
4. श्रीकृष्णः द्रौपद्यै अभयं ददाति।
5. रोगी वैद्याय धन्यवादं समर्पयति।
6. नायकः चम्वै उत्साहं ददाति।
7. पुत्रः मात्रे फलं ददाति।
8. नेता प्रतिनिधये उपायनं ददाति।
9. गुरुः वटवे आशिषं ददाति।
10. भक्तः मूर्तये पुष्पम् अर्पयति।
11. आपणिकः उपभोक्त्रे वस्तु ददाति।
12. कृषकः धेनवे तृणं ददाति।
13. श्वश्रूः वध्वै कङ्कणानि ददाति।
14. देवः भक्ताय वरं ददाति।

उच्चैः पठत, जानीत च –

**चतुर्थीविभक्तिरूपाणि**

| | | | |
|---|---|---|---|
| वैज्ञानिकः | वैज्ञानिकाय | वैज्ञानिकाभ्याम् | वैज्ञानिकेभ्यः |
| कविः | कवये | कविभ्याम् | कविभ्यः |
| अरिः | अरये | अरिभ्याम् | अरिभ्यः |
| अतिथिः | अतिथये | अतिथिभ्याम् | अतिथिभ्यः |
| गुरुः | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| कुरुः | कुरवे | कुरुभ्याम् | कुरुभ्यः |
| बन्धुः | बन्धवे | बन्धुभ्याम् | बन्धुभ्यः |
| चिकीर्षुः | चिकीर्षवे | चिकीर्षुभ्याम् | चिकीर्षुभ्यः |
| युयुत्सुः | युयुत्सवे | युयुत्सुभ्याम् | युयुत्सुभ्यः |

www.thearyasamaj.org

| | | | |
|---|---|---|---|
| भ्राता | भ्रात्रे | भ्रातृभ्याम् | भ्रातृभ्यः |
| अभियन्ता | अभियन्त्रे | अभियन्तृभ्याम् | अभियन्तृभ्यः |
| कर्ता | कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| देवता | देवतायै | देवताभ्याम् | देवताभ्यः |
| मूर्तिः | मूर्त्यै / मूर्तये | मूर्तिभ्याम् | मूर्तिभ्यः |
| नारी | नार्यै | नारीभ्याम् | नारीभ्यः |
| महती | महत्यै | महतीभ्याम् | महतीभ्यः |
| पृथिवी | पृथिव्यै | पृथिवीभ्याम् | पृथिवीभ्यः |
| धेनुः | धेन्वै / धेनवे | धेनुभ्याम् | धेनुभ्यः |
| तनुः | तन्वै / तनवे | तनुभ्याम् | तनुभ्यः |
| चमूः | चम्वै | चमूभ्याम् | चमूभ्यः |
| माता | मात्रे | मातृभ्याम् | मातृभ्यः |
| युद्धम् | युद्धाय | युद्धाभ्याम् | युद्धेभ्यः |
| दधि | दध्ने | दधिभ्याम् | दधिभ्यः |
| वारि | वारिणे | वारिभ्याम् | वारिभ्यः |
| मधु | मधुने | मधुभ्याम् | मधुभ्यः |

## अभ्यासः

2. यथोदाहरणं चतुर्थीविभक्तिरूपैः रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| सारथिः | सारथये | सारथिभ्याम् | सारथिभ्यः |
| सेनापतिः | ........ | ........ | ........ |
| ऋषिः | ........ | ........ | ........ |
| गुरुः | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| वटुः | ........ | ........ | ........ |
| शत्रुः | ........ | ........ | ........ |
| विभुः | ........ | ........ | ........ |
| पिता | पित्रे | पितृभ्याम् | पितृभ्यः |
| विधाता | ........ | ........ | ........ |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| कर्ता | ........ | ........ | ........ |
| भूमिः | भूमये/भूम्यै | भूमिभ्याम् | भूमिभ्यः |
| विभूतिः | ........ | ........ | ........ |
| मूर्तिः | ........ | ........ | ........ |
| तनुः | तन्वै | तनुभ्याम् | तनुभ्यः |
| धेनुः | ........ | ........ | ........ |
| रज्जुः | ........ | ........ | ........ |
| चमूः | चम्वै | चमूभ्याम् | चमूभ्यः |
| वधूः | ........ | ........ | ........ |
| माता | मात्रे | मातृभ्याम् | मातृभ्यः |
| स्वसा | ........ | ........ | ........ |
| वारि | वारिणे | वारिभ्याम् | वारिभ्यः |
| दधि | ........ | ........ | ........ |
| मधु | मधुने | मधुभ्याम् | मधुभ्यः |
| वस्तु | ........ | ........ | ........ |

3. आवरणे विद्यमानस्य शब्दस्य चतुर्थीविभक्तिरूपेण रिक्तस्थानानि पूरयत –

उदा – माद्री पुत्राभ्यां (पुत्रौ) खाद्यं ददाति।

1. भटः ......... (अश्वौ) जलं दत्तवान्।
2. सः ......... (मित्रे) पुस्तकं ददाति।
3. अनुजा ......... (बन्धू) मधुरं दत्तवती।
4. राजा ......... (गुरू) उपायनानि ददाति।
5. पितामहः ......... (पौत्रौ) गीतां ददाति।
6. अहं ......... (भ्रातरौ) वस्त्राणि यच्छामि।
7. भक्तः ......... (मूर्ती) पुष्पाणि समर्पयति।
8. भवान् ......... (धेनू) तृणानि दत्तवान्।
9. कृष्णः ......... (मातरौ) वस्त्राणि दत्तवान्।
10. पिता ......... (पुत्र्यौ) शाटिकां दत्तवान्।

www.thearyasamaj.org



4. एतस्य कोष्ठकस्य साहाय्येन यथोदाहरणं वाक्यानि रचयत –

| | | | | |
|---|---|---|---|---|
| गृहस्थः | अतिथिः | अतिथयः | आतिथ्यं | |
| रथिकः | सारथिः | सारथयः | प्रग्रहं | |
| गुरुः | वटुः | वटवः | आशिषं | |
| माता | सूनुः | सूनवः | दुग्धं | |
| दाता | भोक्ता | भोक्तारः | भोजनं | |
| प्रकृतिः | कर्ता | कर्तारः | प्रेरणां | ददाति |
| नेता | कविः | कवयः | मानपत्रं | |
| कृषकः | जन्तुः | जन्तवः | आहारं | |
| भवान् | व्यक्तिः | व्यक्तयः | वस्त्राणि | |
| शिक्षकः | अध्येता | अध्येतारः | पुस्तकानि | |
| अध्यक्षः | श्रोता | श्रोतारः | उपायनानि | |

उदा – गृहस्थःअतिथये आतिथ्यं ददाति । गृहस्थः अतिथिभ्यः आतिथ्यं ददाति ।

1. ........................ ददाति । ................................ ददाति ।
2. ........................ ददाति । ................................ ददाति ।
3. ........................ ददाति । ................................ ददाति ।
4. ........................ ददाति । ................................ ददाति ।
5. ........................ ददाति । ................................ ददाति ।
6. ........................ ददाति । ................................ ददाति ।
7. ........................ ददाति । ................................ ददाति ।
8. ........................ ददाति । ................................ ददाति ।
9. ........................ ददाति । ................................ ददाति ।
10. ........................ ददाति । ................................ ददाति ।

उच्चैः पठत, लिखत च–

| | | | | |
|---|---|---|---|---|
| तद् | पुंलिङ्गे नपुंसकलिङ्गे च | तस्मै | ताभ्याम् | तेभ्यः |
| तद् | स्त्रीलिङ्गे | तस्यै | ताभ्याम् | ताभ्यः |
| एतद् | पुंलिङ्गे नपुंसकलिङ्गे च | एतस्मै | एताभ्याम् | एतेभ्यः |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| एतद् | स्त्रीलिङ्गे | एतस्यै | एताभ्याम् | एताभ्यः |
| किम् | पुंलिङ्गे नपुंसकलिङ्गे च | कस्मै | काभ्याम् | केभ्यः |
| किम् | स्त्रीलिङ्गे | कस्यै | काभ्याम् | काभ्यः |
| सर्व | पुंलिङ्गे नपुंसकलिङ्गे च | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्व | स्त्रीलिङ्गे | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| युष्मद् | त्रिषु लिङ्गेषु | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| अस्मद् | त्रिषु लिङ्गेषु | मह्यम् | आवाभ्याम् | अस्मभ्यम् |
| भवत् | पुंलिङ्गे नपुंसकलिङ्गे च | भवते | भवद्भ्याम् | भवद्भ्यः |
| भवत् | स्त्रीलिङ्गे | भवत्यै | भवतीभ्याम् | भवतीभ्यः |

5. सर्वनामशब्दानां चतुर्थीविभक्तिरूपेण यथोदाहरणं रिक्तस्थानानि पूरयत –

उदा – सैनिकाः खिद्यन्ते। तेभ्यः (ते) आश्वासनं यच्छत।

1. सेनाः सन्नद्धाः। .......... (ताः) आयुधानि प्रयच्छत।
2. कृष्णार्जुनौ सेनामध्यम् आगतौ। .......... (तौ) अवकाशं प्रयच्छत।
3. सा सात्त्विकी बुद्धिः। .......... (सा) सदवकाशं कल्पयत।
4. एषः संसाररूपः अश्वत्थः। .......... (एषः) असङ्गशस्त्रम् अलम्।
5. सर्वे फलम् इच्छन्ति। .................... (कः) ददानि।
6. सर्वे धर्मपरायणाः। .......... (सर्वे) सहकारं प्रयच्छामः।
7. अहं पुस्तकप्रियः। .......... (अहं) पुस्तकं यच्छत।

तादर्थ्ये चतुर्थी

6. यथोदाहरणं रिक्तस्थानानि पूरयत –

द्रोणाचार्यः

1. ............... (पुत्रः) कुन्तम्
2. ............... (दुर्योधनः) गदाम्
3. ............... (युधिष्ठिरः) खड्गम्
4. ............... (अर्जुनः) चापम्
5. ............... (भीमसेनः) गदाम्
6. ............... (पत्नी) धेनुम्

आनयति।

उदा– द्रोणाचार्यः पुत्राय कुन्तम् आनयति।

www.thearyasamaj.org



उच्चैः पठत जानीत च –

**नमः प्रयोगे चतुर्थी**

कृष्णाय नमः। गङ्गायै नमः। लक्ष्म्यै नमः। विष्णवे नमः।

7. यथोदाहरणं रिक्तस्थानानि पूरयत –

उदा – (कविः) कवये नमः।

| | | | |
|---|---|---|---|
| 1. (पार्थसारथिः) | ............ । | 2. (देवर्षिः) | ............ । |
| 3. (मनुः) | ............ । | 4. (पृथिवी) | ............ । |
| 5. (भवान्) | ............ । | 6. (धेनुः) | ............ । |
| 7. (देवता) | ............ । | 8. (स्रष्टा) | ............ । |
| 9. (धाता) | ............ । | 10. (मूर्तिः) | ............ । |
| 11. (प्रजापतिः) | ............ । | 12. (माता) | ............ । |

**रोचते प्रयोगे चतुर्थी**

8. कोष्ठकाधारेण यथोदाहरणं वाक्यानि लिखत –

| | | |
|---|---|---|
| कृष्णः | भक्तिः | उदा – कृष्णाय भक्तिः रोचते। |
| हृषीकेशः | पाञ्चजन्यः | 1. .................................... । |
| धनञ्जयः | विजयः | 2. .................................... । |
| प्रकृतिः | पुरुषः | 3. .................................... । |
| श्रद्धा | सत्कार्यम् | 4. .................................... । |
| सिद्धिः | श्रमः | 5. .................................... । |
| त्वम् | किम् | 6. ....................................? |
| साधुः | समबुद्धिः | 7. .................................... । |
| अहम् | समर्पणम् | 8. .................................... । |
| संस्कृतिः | अनुशासनम् | 9. .................................... । |
| वयम् | भारतम् | 10. .................................... । |
| सर्वे | गीता | 11. .................................... । |

**अवधेयम्**

नमः इति शब्दस्य योगः यत्र तस्य शब्दस्य चतुर्थीविभक्तिः भवति। यथा – हरये नमः।

रोचते इत्यस्य प्रयोगे यस्मै रोचते तस्य चतुर्थीविभक्तिः भवति। यथा – हरये भक्तिः रोचते।

www.thearyasamaj.org



क्रुध्यति / ईर्ष्यति / द्रुह्यति / असूयति

9. कः कस्मै क्रुध्यति / ईर्ष्यति / द्रुह्यति / असूयति इति यथोदाहरणं वदत –

| | | | |
|---|---|---|---|
| कंसः | कृष्णः | क्रुध्यति | उदा – कंसः कृष्णाय क्रुध्यति। |
| पूतना | कृष्णः | द्रुह्यति | |
| भिक्षुकः | धनिकः | असूयति | |
| दुर्जनः | सज्जनाः | क्रुध्यति | |
| कौरवाः | पाण्डवाः | ईर्ष्यन्ति | |
| महिषासुरः | दुर्गा | द्रुह्यति | |
| नकुलः | सर्पाः | असूयति | |
| निर्धनाः | धनिकाः | ईर्ष्यन्ति | |
| रावणः | रामः | क्रुध्यति | |
| राक्षसाः | देवाः | ईर्ष्यन्ति | |

**अवधेयम्**

क्रुध्यति (कुप्यति) / ईर्ष्यति / द्रुह्यति / असूयति इत्येतेषां प्रयोगः यत्र क्रियते तत्र क्रोधादीनां पात्रस्य चतुर्थीविभक्तिः भवति। उदा – रावणः रामाय क्रुध्यति / ईर्ष्यति / द्रुह्यति / असूयति।

किमर्थम् ?

10. यथोदाहरणं वदत –

उदा – सैनिकाः किमर्थं युद्धं कुर्वन्ति ?
सैनिकाः देशरक्षणाय युद्धं कुर्वन्ति।

1. कौरवाः – पाण्डवाः किमर्थं कुरुक्षेत्रे समवेताः ? (धर्मयुद्धम्)
2. कृष्णः किमर्थं गीताम् उपदिष्टवान् ? (उद्‌बोधनम्)
3. पर्यटकाः किमर्थं भारतम् आगच्छन्ति ? (ज्ञानार्जनम्)
4. सर्वे किमर्थं योगासनं कुर्वन्ति ? (स्वास्थ्यवर्धनम्)
5. भारतीयाः किमर्थं प्रार्थनां कुर्वन्ति ? (मानवकल्याणम्)
6. आर्ताः किमर्थं देवं भजन्ति ? (आर्तिनाशः/दुःखवारणम्)
7. मुनयः किमर्थं तपः कुर्वन्ति ? (मोक्षः)

www.thearyasamaj.org



11. कोष्ठकस्थपदानि उपयुज्य 'भवन्तः किमर्थं भगवद्गीतां पठन्ति' इति यथोदाहरणं वाक्यानि वदत –

| | | | |
|---|---|---|---|
| ज्ञानम् | सिद्धिः | आत्मविकासः | चित्तशुद्धिः |
| धर्मरक्षा | सन्तृप्तिः | सुखम् | पुण्यार्जनम् |

उदा – अहं ज्ञानार्थं भगवद्गीतां पठामि।

कल्पते

एतानि वाक्यानि परिशीलयत –

दैवीसम्पत् मोक्षाय कल्पते। स्वधर्माचरणं कीर्तये कल्पते।
परधर्माचरणं पापाय कल्पते। गीताध्ययनम् आत्मविकासाय कल्पते।
मात्रास्पर्शाः यं न व्यथयन्ति सः अमृतत्वाय कल्पते। भक्तियोगेन यः सेवेत सः ब्रह्मभूयाय कल्पते।

**अवधेयम्**

कल्पते इत्यस्य प्रयोगे कस्मै कल्पते तस्य चतुर्थीविभक्तिः भवति।
उदा – आसुरीसम्पत् बन्धनाय कल्पते।

12. शब्दान् दृष्ट्वा किं कस्मै कल्पते इति यथोदाहरणं वदत –

ध्यानम् – शान्तिः अध्ययनं – विकासः विषयध्यानम् – विनाशः
मननम् – बुद्धिवर्धनम् परिश्रमः – विजयः स्थिरोत्साहः – प्रगतिः
गीतामृतम् – अमृतत्वम् परोपकारः – पुण्यम् तमोगुणः – बन्धः

उदा – ध्यानं शान्तये कल्पते।

13. एतेषु श्लोकेषु चतुर्थीविभक्तिरूपाणि अवलोकयत –

कृष्णाय वासुदेवाय देवकीनन्दनाय च।
नन्दगोपकुमाराय गोविन्दाय नमो नमः॥
प्रपन्नपारिजाताय तोत्त्रवेत्रैकपाणये।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ 4.8॥
इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥18.66॥

www.thearyasamaj.org



# 38 अन्धाय अनन्धाय देहि

एतां कथां सावधानतया पठत –

अव्ययानि

पुरा देवलः नाम सर्वशास्त्रकोविदः धार्मिकः ऋषिः आसीत्। तस्य सुवर्चला नाम गुणवती कन्यका आसीत्।

सुवर्चला यदा प्राप्तवयस्का जाता तदा देवलः 'पुत्रीं कस्मै ददामि' इति चिन्ताकुलः अभवत्। तदा सुवर्चला एव पितरम् उक्तवती – "पितः! माम् अन्धाय अनन्धाय देहि" इति। तत् श्रुत्वा देवलः अवदत् – "पुत्रि! किमर्थम् उन्मत्ता इव वदसि ?" इति। सुवर्चला अवदत् – "पितः! नाहम् उन्मत्ता इव वदामि। सत्यमेव वदामि। भवान् येभ्यः मां दातुं चिन्तयति तादृशान् ऋषिकुमारान् अत्र आनयतु। अहमेव तेषु योग्यं चिनोमि" इति।

"त्वं यथा वदसि तथा" इति उक्त्वा देवलः तादृशान् ऋषिकुमारान् आनेतुं सर्वेभ्यः आश्रमेभ्यः शिष्यान् प्रेषितवान्। देवलस्य प्रभावं सुवर्चलायाः ख्यातिं च श्रुत्वा बहवः ऋषिकुमाराः तां परिणेतुम् आगताः। देवलः तान् सर्वान् विधिवत् सम्पूज्य पुत्रीम् अवदत् – "पुत्रि! एतेषु योग्यं वरय। तस्मै ऋषिकुमाराय त्वां दास्यामि" इति।

सुवर्चला तान् दृष्ट्वा उक्तवती – "भवत्सु यः अन्धः अस्ति, अनन्धः अस्ति तस्मै पिता मां दास्यति" इति। ऋषिकुमाराः तस्याः वचनं श्रुत्वा विस्मिताः जाताः। ततः सर्वे परस्परं मुखं दृष्ट्वा असन्तोषेण देवलं कटुवचनैः निन्दित्वा स्वस्थानाय गतवन्तः। ततः सुवर्चला सन्तोषेण पितृगृहे एव आसीत्।

अथ कदाचित् श्वेतकेतुः नाम न्यायविशारदः ऋषिकुमारः एतं वृत्तान्तं श्रुत्वा तत्र आगतवान्, यत्र देवलस्य आश्रमः आसीत्।

देवलः तं विधिवत् सम्पूज्य पुत्रीम् उक्तवान् – "उद्दालकस्य पुत्रः एषः श्वेतकेतुः महाप्राज्ञः अस्ति। एतं वरय" इति। सुवर्चला तत् श्रुत्वा कुपिता अभवत्। तदा श्वेतकेतुः ताम् अवदत् – अहम् अन्धः अस्मि, अनन्धः अपि अस्मि" इति। "तत् कथम् ?" इति सुवर्चला अपृच्छत्।

श्वेतकेतुः अवदत् – "परमात्मनः कारणादेव जीवात्मा अहं पश्यामि, शृणोमि जिघ्रामि वा। परमात्मा एव चक्षुः। वस्तुतः सः एव पश्यति। नाहम्। अतः अहम् अन्धः। किन्तु मम कदापि संशयः न भवति। अतः संशयाभावरूपं चक्षुः मम अस्ति। अतः अहम् अनन्धः। एवम् अहम् अन्धः, अनन्धः अपि" इति।

श्वेतकेतोः उत्तरेण सुवर्चला नितरां सन्तुष्टा अभवत्। सा पितरम् अवदत् – "पितः! एषः मह्यं रोचते। मया एषः वृतः अस्ति। माम् एतस्मै ददातु" इति।

देवलः अपि अत्यन्तं सन्तोषेण श्वेतकेतवे सुवर्चलां दत्तवान्। सुवर्चला श्वेतकेतोः सहधर्मचरी अभवत्। तौ दम्पती दीर्घकालं यावत् सुखेन गार्हस्थ्यम् आचरितवन्तौ।

(एतस्मिन् पाठे कानिचित् अव्ययानि वर्णाक्षरैः दर्शितानि सन्ति।)

www.thearyasamaj.org

## अवधेयम्

त्रिषु लिङ्गेषु, सप्तसु विभक्तिषु त्रिषु वचनेषु च यत् विकारं न प्राप्नोति तत् अव्ययम्।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

यथा – त्रिषु लिङ्गेषु –

कृष्णः अपि युध्यते । पृतना (सेना) अपि युध्यते। सैन्यम् अपि युध्यते ।

सप्तसु विभक्तिषु –

कृष्णः अपि तुष्यति।
कृष्णम् अपि पश्यतु भवान्।
कृष्णेन सह अपि गच्छामि।
कृष्णाय अपि देहि।
कृष्णात् अपि स्वीकरोतु।
कृष्णस्य अपि अनुग्रहम् इच्छामि।
कृष्णे अपि भक्तिः अस्तु।

त्रिषु वचनेषु –

योधः अपि युद्धं करोति।
योधौ अपि युद्धं कुरुतः।
योधाः अपि युद्धं कुर्वन्ति।

एतेषु सर्वेषु वाक्येषु 'अपि' इत्यस्य कोऽपि विकारः नैव जातः। तत् सर्वत्रापि समानतया एव अस्ति। अव्ययानि एवमेव तिष्ठन्ति।

यदा – तदा, यथा – तथा, यत्र – तत्र – इत्यादीनि नित्यसम्बद्धानि अव्ययानि। तन्नाम यत्र 'यदा' इत्यस्य प्रयोगः अस्ति तस्मिन् वाक्ये 'तदा' इत्यस्य अपि प्रयोगः भवति।

### यदा – तदा

उदा –

यदा ज्ञानसूर्यः उदेति तदा हृदयकमलं विकसति।
यदा तमः वर्धते तदा व्यामोहः भवति।

www.thearyasamaj.org



## अभ्यासः

1. 'यदा–तदा' अव्यययोः योजनेन वाक्यानि रचयत –

1. अर्जुनः विषीदति । कृष्णः सान्त्वयति । यदा अर्जुनः विषीदति तदा कृष्णः सान्त्वयति ।
2. धर्मस्य ग्लानिः । भगवतः अवतारः । .................................... ।
3. चित्तं विनियतम् । योगः उच्यते । .................................... ।
4. द्रष्टा अनुपश्यति । भगवद्भावं प्राप्नोति । .................................... ।
5. मोहकलिलं नश्यति । निर्वेदः भवति । .................................... ।
6. अधर्मस्य अभ्युत्थानम् । भगवतः आविर्भावः । .................................... ।
7. निश्चला बुद्धिः । योगः भवति । .................................... ।
8. कर्मसु अनुषज्जते । योगारूढः भवति । .................................... ।
9. इन्द्रियाणि विषयेभ्यः निवर्तन्ते । स्थितप्रज्ञः उच्यते । .................................... ।
10. कामः भवति । क्रोधः भवति । .................................... ।
11. सङ्गः भवति । कामः भवति । .................................... ।
12. अभयं भवति । दैवी सम्पद् भवति । .................................... ।
13. आत्मज्ञानं भवति । वैराग्यं भवति । .................................... ।
14. कामान् प्रजहाति । स्थितप्रज्ञता । .................................... ।
15. सर्वं नश्वरम् । भयं कुतः ? – .................................... ।

एतं श्लोकम् उच्चैः पठत –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥4.7॥

('यदा यदा धर्मस्य ग्लानिः भवति, अधर्मस्य च उत्कर्षः भवति, तदा अहम् अवतारं करोमि' इति श्रीकृष्णः वदति ।)

**यथा – तथा**

यथा कृष्णः वदति तथा अर्जुनः करोति ।
यथा अश्वः धावति तथा गजः न धावति ।
यथा वासांसि जीर्णानि भवन्ति तथा शरीराणि जीर्णानि भवन्ति ।
यथा देहे कौमाराद्यवस्था तथा आत्मनि अनेकदेहावस्था ।

www.thearyasamaj.org



यथा रविः लोकं प्रकाशयति तथा क्षेत्री क्षेत्रं प्रकाशयति।

यथा अग्निः काष्ठानि भस्मसात्कुरुते तथा ज्ञानाग्निः कर्माणि भस्मसात् कुरुते।

यथा राजा तथा प्रजाः।

यथा कर्म तथा बुद्धिः।

यथा इच्छसि तथा कुरु।

3. 'यथा-तथा' - अव्यययोः योजनेन एतेषां शब्दानां च साहाय्येन यथोदाहरणं वाक्यानि रचयत -

| | |
|---|---|
| उदा - माता-पिता | यथा मम माता गायति, तथा मम पिता न गायति। |
| 1. राजादेशः - सैनिकः | .............................................. । |
| 2. दुर्योधनः - धृतराष्ट्रः | .............................................. । |
| 3. हिरण्यकशिपुः - प्रह्लादः | .............................................. । |
| 4. राजा - प्रजाः | .............................................. । |
| 5. रामः - विभीषणः | .............................................. । |

4. यथोदाहरणं वाक्यानि रचयत -

1. यथा पूर्वं जनाः आसन् तथा इदानीं न सन्ति।

| | |
|---|---|
| 2. यथा माता पचति | .......................................... । |
| 3. यथा अध्यापिका वदति | .......................................... । |
| 4. यथा वैद्यः वदति | .......................................... । |
| 5. यथा नरः करोति | .......................................... । |
| 6. यथा हिमालयः अस्ति | .......................................... । |
| 7. यथा सिंहः गर्जति | .......................................... । |
| 8. यथा नर्तकी नृत्यति | .......................................... । |

एतौ श्लोकौ उच्चैः पठत -

यथा देशस्तथा भाषा यथा राजा तथा प्रजाः।
यथा भूमिस्तथा तोयं यथा बीजस्तथाङ्कुरः॥

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ 4.37॥

www.thearyasamaj.org



यत्र – तत्र

यत्र पुष्पाणि सन्ति तत्र भ्रमराः आगच्छन्ति।

भवन्तः यत्र वसन्ति तत्र एव संस्कृतकार्यं कुर्वन्तु।

यत्र दीपः अस्ति तत्र अन्धकारः न भवति।

यत्र धर्मः भवति तत्र विजयः भवति।

5. 'यत्र – तत्र' अव्यययोः योजनेन एतेषां शब्दानां साहाय्येन वाक्यानि रचयत –

उदा – रामनाम – आञ्जनेयः यत्र रामनामसङ्कीर्तनं भवति तत्र आञ्जनेयः भवति।

1. शर्करा – पिपीलिकाः ........................................ ।
2. शंब्दः – शिशुः ........................................ ।
3. भूकम्पः – समाजसेवकाः ........................................ ।
4. माता – शिशुः ........................................ ।
5. कृष्णः – विजयः ........................................ ।
6. धूमः – अग्निः ........................................ ।
7. पुष्पाणि – सुगन्धः ........................................ ।
8. पर्वतः – वायुः ........................................ ।
9. क्रीडाङ्गणम् – बालकाः ........................................ ।
10. भक्तिः – देवानुग्रहः ........................................ ।

6. भवन्तः कुत्र कुत्र गच्छन्ति इति चिन्तयित्वा यथोदाहरणं दश वाक्यानि वदत –

उदा – यत्र उत्सवः भवति तत्र अहं गच्छामि।

एतान् श्लोकान् उच्चैः पठत –

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिः ध्रुवा नीतिर्मतिर्मम ॥18.78॥

(योगेश्वरः कृष्णः, धनुर्धारी अर्जुनः च यत्र भवतः तत्र लक्ष्मीः, विजयः, सम्पत्, अचला नीतिः च निश्चयेन भविष्यन्ति इति मम अभिप्रायः।)

यत्र यत्र रघुनाथकीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम्।
बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम्॥

(यत्र यत्र श्रीरामचन्द्रस्य कीर्तनं भवति, तत्र तत्र हनूमान् भवति। सः मस्तके अञ्जलिं निधाय तिष्ठति। तस्य नेत्रे बाष्पजलेन पूर्णे भवतः। तस्य राक्षसनाशकस्य हनूमतः नमस्कारं कुर्वन्तु।)

www.thearyasamaj.org

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।

(यत्र महिलानां गौरवं भवति तत्र देवाः सन्तोषेण तिष्ठन्ति। यत्र महिलानां गौरवं न भवति तत्र सर्वाः क्रियाः विफलाः भवन्ति।)

एतान् श्लोकान् परिशीलयत –

यत्रोपरमते चित्तं निरुद्धं योगसेवया।
यत्र चैवात्मनात्मानं पश्यन् आत्मनि तुष्यति ॥6 – 20॥
सुखमात्यन्तिकं यत्तत् बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥6–21॥

1. यत्र आधुनिकविचाराः सन्ति तत्र अपि भगवद्गीता प्रसक्ता अस्ति।
2. यत्र समस्याः सन्ति तत्र गीता परिहारं निर्दिशति।
3. यत्र प्रबन्धतज्ज्ञाः मिलन्ति तत्र अपि गीताविषये चर्चा भवति।
4. यत्र भगवद्गीतापठनं भवति तत्र शान्तिः भवति।
5. यत्र जिज्ञासवः सन्ति तत्र भगवद्गीता भवति।
6. कुरुक्षेत्रे यत्र गीतोपदेशः प्रवृत्तः तत्र प्रदर्शिनी आयोजिता अस्ति।
7. यत्र भारतयुद्धम् अभवत् तत्र गवेषकाः खननं कुर्वन्ति।
8. यत्र विचारमथनं प्रचलति तत्र तत्त्वबोधः जायते।

| किन्तु / निश्चयेन / प्रायशः / खलु / अपेक्षया |
|---|

एतत् सम्भाषणम् उच्चैः पठत –

कृष्णः – अहं यदस्ति तत् सर्वम् उक्तवान्। भवतः इतोऽपि सन्देहाः न सन्ति खलु ?

अर्जुन : – नास्ति कृष्ण ! अहं पूर्वस्य अपेक्षया सर्वं सम्यक् अवगच्छामि। किन्तु मया किं करणीयम् इति भवान् वदतु।

कृष्णः – प्रायशः किं किं वक्तव्यं तत् सर्वम् अहम् उक्तवान्। भवतः विवेकः अस्ति खलु ? मम कथनस्य अपेक्षया भवान् स्वयं विचिन्त्य यथा इच्छति तथा करोतु।

अर्जुनः – हे भगवन्, इदानीम् अहं स्मृतिं प्राप्तवान्। अहं भवतः वाक्यं निश्चयेन पालयामि।

एतानि वाक्यानि उच्चैः पठत –

www.thearyasamaj.org



मनः निश्चयेन दुर्निग्रहं चलं च भवति।

जातस्य मृत्युः निश्चयेन भवति।

मृतस्य जन्म अपि निश्चयेन भवति।

निश्चयेन शस्त्राणि आत्मानं न छिन्दन्ति।

निश्चयेन पावकः आत्मानं न दहति।

भगवान् निश्चयेन पापेभ्यः मोक्षयिष्यति।

कल्याणकृत् निश्चयेन दुर्गतिं न गच्छति।

आर्तजनस्य अपेक्षया ज्ञानी विशिष्यते।

कर्मयोगस्य अपेक्षया ज्ञानयोगः विशिष्यते।

## अभ्यासः

1. किन्तु, निश्चयेन, प्रायशः, अपेक्षया, खलु – एतेषु योग्यं शब्दं स्वीकृत्य रिक्तस्थानानि पूरयत –

यथा – अर्जुनः धीरः आसीत्। किन्तु बान्धवान् दृष्ट्वा चञ्चलः अभवत्।

1. ज्ञानमार्गस्य ........................ भक्तिमार्गः सरलः।
2. गीतोपदेशेन अर्जुनस्य विषादः नष्टः ........................ ?
3. विश्वरूपदर्शनेन अर्जुनः ........................ भीतः जातः।
4. भगवद्गीता ........................ सर्वासु भाषासु अनूदिता अस्ति।

2. 'अपेक्षया' उपयुज्य वाक्यानि पठत –

उदा – परधर्मस्य अपेक्षया स्वधर्मः श्रेष्ठः।

1. संख्यानुसारं भारतयुद्धे कौरवाणाम् ............ पाण्डवाः अल्पाः आसन्।
2. ब्रह्मध्यानस्य ........................ भक्तिः सरला।
3. भक्तस्य धार्मिकविधीनाम् ........................ भावः श्रेष्ठः।
4. अकर्मणः ........................ कर्मकरणं श्रेयस्करम्।
5. कर्मसंन्यासस्य ........................ कर्मयोगः विशिष्टः।
6. द्रव्ययज्ञस्य ........................ ज्ञानयज्ञः श्रेष्ठः भवति।

www.thearyasamaj.org



अद्यतन–ह्यस्तन–श्वस्तन–पूर्वतन–इदानीन्तन

एतत् सम्भाषणम् उच्चैः पठत –

भीमः – भ्रातः, किं चिन्तयसि ? भवान् नितरां खिन्नः इव ....

युधिष्ठिरः– आं भीम ! अहम् अभिमन्युं स्मरामि स्म । अद्यतनयुद्धे अनन्यगतिकतया अहं तं चक्रव्यूहं भेत्तुं प्रेरितवान् । तेनैव सः मृत्युम् उपेतः । तेन विना श्वस्तनं युद्धं कथं भवेत् ? न जाने ।

भीमः – सत्यमेव भ्रातः ! ह्यस्तने युद्धे तस्य पराक्रमः आश्चर्यास्पदम् आसीत् । सः वीरक्षत्रियः । सः स्वधर्मम् आचर्य वीरस्वर्गं प्राप्नोत् । भ्रातः! त्वं मा खिद्यस्व । क्षत्रियाः एव एतादृशं युद्धं लभन्ते । आगच्छ । आवां श्वस्तनयुद्धस्य विषये चिन्तयाव ।

1. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानं पूरयत –

| अद्यतननाटकस्य ह्यस्तनलेखः, अद्यतनकार्यम्, श्वस्तनकार्यक्रमाय, श्वस्तनपरीक्षार्थम्, पूर्वतनकार्यम् |
|---|

1. सुलेखा लेखनकार्यं सम्यक् करोति । तस्याः ................ समीचीनः अस्ति ।
2. श्यामा ............. पूर्णतः पठिष्यति ।
3. बालाः ............. नाट्याभ्यासं कुर्वन्ति ।
4. भवती ............ कदा करिष्यति ?
5. दीपकः ........... अधुना पर्यन्तं न कृतवान् ।
6. गिरीशः अधुना ..................... अभ्यासं करोति ।

2. एतत् सम्भाषणं पूर्णं कुरुत –

सुधीरः – गिरीश ! ह्यस्तनपाठं लिखितवान् वा ?

गिरीशः – आम्, महोदय ! ................... लिखितवान् ।

सुधीरः – अधुना किं करोषि ?

गिरीशः – अधुना अहं ................. पाठस्य सज्जतां करोमि । भवान् किं करोति ?

www.thearyasamaj.org



सुधीरः - अहम् ................ पाठं लिखामि।

गिरीशः - शोभनम्, लिखतु। अहं गच्छामि।

3. एतत् सम्भाषणं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

श्यामः - गोविन्द ! भवतः अद्य परीक्षा आसीत् किम् ?

गोविन्दः - आम्। आसीत्। ततः एव आगच्छामि।

श्यामः - अद्यतनपरीक्षापत्रं कथम् आसीत् ?

गोविन्दः - अतीव सरलम् आसीत्।

श्यामः - एवं वा ! पूर्वतनपरीक्षापत्रं कथम् आसीत् ?

गोविन्दः - तत् तु कठिनम् आसीत्।

श्यामः - अहम् अधुना इदानीन्तनकार्यार्थं पत्रालयं गच्छामि।

गोविन्दः - गच्छतु। भवान् श्वस्तनपरीक्षायाः सज्जतां कदा करिष्यति?

श्यामः - सायङ्काले करिष्यामि। अधुना गच्छामि।

1. अतीव सरलं किम् आसीत् ? .................................... ।
2. कठिनं किम् आसीत् ? .................................... ।
3. श्यामः पत्रालयं किमर्थं गच्छति ? .................................... ।
4. श्यामः कस्याः सज्जतां सायङ्काले करिष्यति ? .................................... ।

4. अधो निर्दिष्टपदानां प्रयोगेण वाक्यानि वदत -

1. अद्यतनकार्यम्- ................................ ।
2. ह्यस्तनपाठम् - ................................ ।
3. श्वस्तननाटकम् - ................................ ।
4. इदानीन्तनसूचनाम् - ................................ ।

www.thearyasamaj.org

5. कोष्ठकस्य साहाय्येन दशवाक्यानि रचयत –

| | | | |
|---|---|---|---|
| | अद्यतन- | | पठितवान् |
| सः | पूर्वतन- | | पठितवती |
| सा | श्वस्तन- | समाचारं | पठति |
| | इदानीन्तन- | | पठिष्यति |
| | ह्यस्तन- | | |

6. कोष्ठके स्थितान् शब्दान् उपयुज्य यथोदाहरणं वाक्यानि लिखत –

| | |
|---|---|
| 1. गान्धारः | कन्दहार् |
| 2. लवपुरम् | लाहोर् |
| 3. भाग्यनगरम् | हैदराबाद् |
| 4. कर्णावती | अहमदाबाद् |
| 5. लक्ष्मणपुरम् | लखनौ |
| 6. पाटलीपुत्रम् | पटना |

उदा – इन्द्रप्रस्थम् – देहली

इन्द्रप्रस्थस्य इदानीन्तननाम देहली। देहल्याः पूर्वतननाम इन्द्रप्रस्थम्।

1. .................................................................................... ।

2. .................................................................................... ।

3. .................................................................................... ।

4. .................................................................................... ।

5. .................................................................................... ।

6. .................................................................................... ।

www.thearyasamaj.org

# 39. असङ्गशस्त्रेण दृढेन छित्त्वा



पश्यत, उच्चैः पठत च –

तृतीयाविभक्तिः



अर्जुनः



रथः



अर्जुनः रथेन गच्छति।



अर्जुनः बाणेन प्रहरति।



भीमः गदया प्रहरति।



आचार्यः जलेन अभिषिञ्चति।

उच्चैः पठत –

1. भटः हयेन गच्छति।
2. कृष्णः चक्रायुधेन शिशुपालं हतवान्।
3. ज्ञानम् अज्ञानेन आवृतं भवति।
4. अग्निः धूमेन आवृतः।
5. कृष्णः अङ्गुल्या निर्दिशति।
6. भक्तः मालया देवम् अलङ्करोति।
7. साधकः योगबलेन परमपुरुषम् उपैति।
8. दुर्योधनः गदया शत्रून् प्राहरत्।
9. योधः हस्ताभ्यां काहलं वादयति।
10. वयं पादाभ्यां सञ्चरामः।
11. बलरामः हलेन शत्रून् मारितवान्।

www.thearyasamaj.org



## अवधेयम्

| प्रथमाविभक्तिः | | | तृतीयाविभक्तिः | | |
|---|---|---|---|---|---|
| हस्तः | हस्तौ | हस्ताः | हस्तेन | हस्ताभ्याम् | हस्तैः |
| माला | माले | मालाः | मालया | मालाभ्याम् | मालाभिः |
| सूची | सूच्यौ | सूच्यः | सूच्या | सूचीभ्याम् | सूचीभिः |
| फलम् | फले | फलानि | फलेन | फलाभ्याम् | फलैः |

## अभ्यासः

1. तृतीयाविभक्तिरूपैः रिक्तस्थानं पूरयत –

कृष्णः

1. हस्तः – ..................... सेनां दर्शयति ।
2. रथः – ..................... गच्छति ।
3. कशा – ..................... अश्वान् चोदयति ।
4. गदा – ..................... शत्रून् हन्ति ।
5. वंशी – ..................... मधुरं गायति ।
6. वेत्रम् – ..................... धेनुं स्पृशति ।
7. चक्रम् – ..................... दुष्टान् निगृह्णाति ।

2. आवरणे स्थितस्य शब्दस्य तृतीयाविभक्तिरूपेण यथोदाहरणं वाक्यानि रचयत –

उदा– योद्धारः (खड्गाः) खड्गैः युध्यन्ते।

1. भक्ताः (पत्राणि) ................................ देवम् अर्चन्ति ।
2. ऋषयः (वेदमन्त्राः) ................................ हवनं कुर्वन्ति ।
3. अर्जुनः (दिव्यदृष्टिः) ........................... विश्वरूपं दृष्टवान् ।
4. भीमः (गदा) ........................................ रिपून् प्रहरति ।
5. वयं (नेत्रे) ............................................ पश्यामः ।
6. अश्वाः (पादाः) ........................................ धावन्ति ।
7. द्रौपदी (कमलानि) ............................ मालां रचयति ।
8. नार्यः (द्रोण्यः) ........................................ जलं नयन्ति ।
9. धृष्टद्युम्नः (खड्गः) ......................... द्रोणाचार्यं हतवान् ।

www.thearyasamaj.org



उच्चैः पठत, जानीत च -

| प्रथमाविभक्तिः | | | तृतीयाविभक्तिः | | |
|---|---|---|---|---|---|
| बालः | बालौ | बालाः | बालेन | बालाभ्याम् | बालैः |
| योधः | योधौ | योधाः | योधेन | योधाभ्याम् | योधैः |
| वेदः | वेदौ | वेदाः | वेदेन | वेदाभ्याम् | वेदैः |
| मुनिः | मुनी | मुनयः | मुनिना | मुनिभ्याम् | मुनिभिः |
| कविः | कवी | कवयः | कविना | कविभ्याम् | कविभिः |
| शिशुः | शिशू | शिशवः | शिशुना | शिशुभ्याम् | शिशुभिः |
| तन्तुः | तन्तू | तन्तवः | तन्तुना | तन्तुभ्याम् | तन्तुभिः |
| वक्ता | वक्तारौ | वक्तारः | वक्त्रा | वक्तृभ्याम् | वक्तृभिः |
| दाता | दातारौ | दातारः | दात्रा | दातृभ्याम् | दातृभिः |
| महिला | महिले | महिलाः | महिलया | महिलाभ्याम् | महिलाभिः |
| श्रद्धा | श्रद्धे | श्रद्धाः | श्रद्धया | श्रद्धाभ्याम् | श्रद्धाभिः |
| मूर्तिः | मूर्ती | मूर्तयः | मूर्त्या | मूर्तिभ्याम् | मूर्तिभिः |
| मतिः | मती | मतयः | मत्या | मतिभ्याम् | मतिभिः |
| दर्वी | दर्व्यौ | दर्व्यः | दर्व्या | दर्वीभ्याम् | दर्वीभिः |
| कर्तरी | कर्तर्यौ | कर्तर्यः | कर्तर्या | कर्तरीभ्याम् | कर्तरीभिः |
| भगिनी | भगिन्यौ | भगिन्यः | भगिन्या | भगिनीभ्याम् | भगिनीभिः |
| नारी | नार्यौ | नार्यः | नार्या | नारीभ्याम् | नारीभिः |
| धेनुः | धेनू | धेनवः | धेन्वा | धेनुभ्याम् | धेनुभिः |
| तनुः | तनू | तनवः | तन्वा | तनुभ्याम् | तनुभिः |
| चञ्चुः | चञ्चू | चञ्चवः | चञ्च्वा | चञ्चुभ्याम् | चञ्चुभिः |
| वधूः | वध्वौ | वध्वः | वध्वा | वधूभ्याम् | वधूभिः |
| फलम् | फले | फलानि | फलेन | फलाभ्याम् | फलैः |
| पुष्पम् | पुष्पे | पुष्पाणि | पुष्पेण | पुष्पाभ्याम् | पुष्पैः |
| वस्त्रम् | वस्त्रे | वस्त्राणि | वस्त्रेण | वस्त्राभ्याम् | वस्त्रैः |
| सैन्यम् | सैन्ये | सैन्यानि | सैन्येन | सैन्याभ्याम् | सैन्यैः |

www.thearyasamaj.org



3. कोष्ठकं दृष्ट्वा तृतीयाविभक्तिरूपैः रिक्तस्थानानि पूरयत –

| | | | |
|---|---|---|---|
| योधः | योधेन | योधाभ्याम् | योधैः |
| हयः | ............. | ............. | ............. |
| धर्मः | ............. | ............. | ............. |
| योगः | ............. | ............. | ............. |
| रविः | रविणा | रविभ्याम् | रविभिः |
| यतिः | यतिना | ............. | ............. |
| मणिः | ............. | ............. | ............. |
| समाधिः | ............. | ............. | ............. |
| प्रभुः | प्रभुणा | ............. | ............. |
| गुरुः | ............. | ............. | ............. |
| इक्षुः | ............. | ............. | ............. |
| क्रतुः | ............. | ............. | ............. |
| रिपुः | ............. | ............. | ............. |
| पिता | पित्रा | पितृभ्याम् | पितृभिः |
| धाता | ............. | ............. | ............. |
| स्रष्टा | ............. | ............. | ............. |
| हन्ता | ............. | ............. | ............. |
| निशा | निशया | निशाभ्याम् | निशाभिः |
| श्रद्धा | ............. | ............. | ............. |
| माया | ............. | ............. | ............. |
| प्रभा | ............. | ............. | ............. |
| कीर्तिः | कीर्त्या | कीर्तिभ्याम् | कीर्तिभिः |
| धृतिः | ............. | ............. | ............. |
| मही | मह्या | महीभ्याम् | महीभिः |
| नदी | ............. | ............. | ............. |
| धेनुः | धेन्वा | धेनुभ्याम् | धेनुभिः |
| तनुः | ............. | ............. | ............. |

www.thearyasamaj.org



## अभ्यासः

4. कोष्ठके विद्यमानानां शब्दानां तृतीयाविभक्तिरूपं प्रयुज्य वाक्यं पूरयत –

1. अर्जुनः ................ शत्रून् हतवान् ।
2. भीमः दुर्योधनः च ........... युध्येते ।
3. सारथिः ................ अश्वान् बध्नाति ।
4. ................ मुक्तः भक्तः कृष्णस्य प्रियः ।
5. वयम् ................ कृष्णम् आप्तुम् इच्छामः ।
6. रथः ................ चलति ।
7. बलरामः ................ प्रहरति ।
8. पाण्डवाः ................ रणघोषं कृतवन्तः ।
9. ................ तूणीरः पूर्णः अस्ति
10. किं नो ................ गोविन्द !
11. पक्षिणः ................ डयन्ते ।
12. छात्राः ................ लिखन्ति ।

1. इषवः
2. गदे
3. रज्जवः
4. हर्षामर्षभयोद्वेगाः
5. अभ्यासयोगः
6. चक्रे
7. हलम्
8. शङ्खाः
9. शराः
10. राज्यम्
11. पक्षौ
12. लेखन्यः

5. 'क' विभागे एकः शब्दः दत्तः अस्ति। 'ख' विभागे तस्य शब्दस्य तृतीयाविभक्तेः रूपद्वयं दत्तम् अस्ति। तयोः उचितं रूपं चित्वा रिक्तस्थाने लिखत।

उदा – यज्ञौ – यज्ञाभ्याम्

1 ...........................।
2. ...........................।
3. ...........................।
4. ...........................।
5. ...........................।
6. ...........................।
7. ...........................।
8. ...........................।
9. ...........................।
10. ...........................।

| क | ख |
|---|---|
| यज्ञौ | यज्ञाभ्याम् / यज्ञैः |
| नद्यौ | नदीभ्याम् / नदीभिः |
| क्रतवः | क्रतुभ्याम् / क्रतुभिः |
| आदित्याः | आदित्याभ्याम् / आदित्यैः |
| सृतिः | सृत्या / सृतिभ्याम् |
| मित्रे | मित्राभ्याम् / मित्रैः |
| हयाः | हयैः / हयाभ्याम् |
| नार्यौ | नारीभ्याम् / नारीभिः |
| शरौ | शराभ्याम् / शरैः |
| वज्रम् | वज्रेण / वज्रैः |

www.thearyasamaj.org



6. रेखाङ्किततान् शब्दान् अधिकृत्य यथोदाहरणं प्रश्नान् लिखत –

उदा – ते पुष्पैः अर्चन्ति। ते कैः अर्चन्ति ?

1. अर्जुनः हस्ताभ्याम् अयुद्ध्यत। ........................................ ।
2. सिद्धसङ्घाः स्तुतिभिः स्तुवन्ति। ........................................ ।
3. सर्वविद् सर्वभावेन देवं भजति। ........................................ ।
4. वैनतेयः चञ्च्वा नागान् भक्षयति। ........................................ ।
5. वयं कर्णाभ्यां शृणुमः। ........................................ ।
6. भक्ताः श्रद्धया भजन्ति। ........................................ ।
7. योधौ हयाभ्यां गच्छतः। ........................................ ।
8. भारतं धर्मेण शोभते। ........................................ ।
9. खगाः पक्षाभ्यां खे डयन्ते। ........................................ ।
10. यूयं यज्ञेन प्रसविष्यध्वम्। ........................................ ।
11. ते रागद्वेषवियुक्तैः इन्द्रियैः विषयान् सेवन्ते। ........................................ ।
12. योगी अनन्यचित्ततया देवं स्मरति। ........................................ ।
13. अर्जुनः शिष्यभावेन कृष्णं पृच्छति। ........................................ ।
14. वयं राज्यसुखलोभेन स्वजनं हन्तुम् उद्यताः स्मः। ........................................ ।
15. सत्त्वगुणः सुखज्ञानसङ्गाभ्यां जीवं देहे बध्नाति। ........................................ ।
16. दैवीसम्पदा मोक्षः सिद्ध्यति। ........................................ ।
17. तमोगुणः प्रमादालस्यनिद्राभिः जीवचैतन्यं बध्नाति। ........................................ ।
18. आशापाशशतैः बद्धाः अन्यायेन अर्थसञ्चयान् ईहन्ते। ........................................ ।
19. ईश्वरः यन्त्रारूढानि सर्वभूतानि मायया भ्रामयति। ........................................ ।

7. अधः प्रदत्तसंख्याकेषु गीताश्लोकेषु तृतीयाविभक्तिं परिशीलयत –

1.14, 1. 32, 3.38, 3.39 4.24, 4.34, 5.11,
7.22, 7.27, 8.8, 8.22, 8.10, 9.15, 9.28,
13.4, 13.24

www.thearyasamaj.org



8. आवरणे दत्तस्य शब्दस्य उचितेन विभक्तिरूपेण रिक्तस्थानं पूरयत –

उदा – गदाः तत्र सन्ति। ताभिः (ताः) भवन्तः युध्यन्ताम्।

1. कूर्चाः समीचीनाः सन्ति। ............................(ते) चित्रकारः चित्राणि लिखति।
2. छुरिका तीक्ष्णा अस्ति। ............................ (सा) जागरूकतया कर्तयतु।
3. पुष्पाणि सुन्दराणि सन्ति। ............................ (तानि) देवम् अर्चामः।
4. विमानं शीघ्रं गच्छति। ............................ (तत्) भवान् प्रयाणं करोतु।
5. फलम् उत्तमम् अस्ति। ............................ (तत्) फलरसं निर्मातु।
6. तत्र मार्जनी अस्ति। ................................ (सा) मार्जयतु।
7. तानि वस्त्राणि मलिनानि। ........................... (तानि) किं करोमि ?

उच्चैः पठत –

| प्रथमाविभक्तिः | तृतीयाविभक्तिः | | |
|---|---|---|---|
| सः / तत् | तेन | ताभ्याम् | तैः |
| एषः / एतत् | एतेन | एताभ्याम् | एतैः |
| कः / किम् | केन | काभ्याम् | कैः |
| सा | तया | ताभ्याम् | ताभिः |
| एषा | एतया | एताभ्याम् | एताभिः |
| का | कया | काभ्याम् | काभिः |
| भवान् | भवता | भवद्भ्याम् | भवद्भिः |
| भवती | भवत्या | भवतीभ्याम् | भवतीभिः |
| अहम् | मया | आवाभ्याम् | अस्माभिः |
| त्वम् | त्वया | युवाभ्याम् | युष्माभिः |
| सर्वः / सर्वम् | सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वा | सर्वया | सर्वाभ्याम् | सर्वाभिः |

www.thearyasamaj.org



उच्चैः पठत, जानीत च

सहयोगे तृतीया



धृतराष्ट्रः



सञ्जयः



धृतराष्ट्रः सञ्जयेन सह सम्भाषणं करोति।



कृष्णः राधया सह नृत्यति।



अर्जुनः द्रौपद्या सह तिष्ठति।



कृष्णः मात्रा सह क्रीडति।

एतानि वाक्यानि उच्चैः पठत –

1. शिशुः मात्रा सह प्रसन्नः तिष्ठति।
2. शकुनिः नकुलसहदेवाभ्यां सह युद्धं कृतवान्।
3. श्रीकृष्णः पाण्डवैः सह आसीत्।
4. भीष्मः गङ्गया सह वार्तालापं कृतवान्।
5. बालिका शिक्षिकाभिः सह भ्रमणार्थं गच्छति।
6. त्वं भगिन्या सह पठ।
7. भवन्तः अस्माभिः सह क्रीडन्तु।
8. अहं त्वया सह चलामि।
9. सेनापतिः सारथिना सह तिष्ठति।
10. पाण्डवाः गन्धर्वैः सह अयुध्यन्त।

www.thearyasamaj.org



## अभ्यासः

कुरुक्षेत्रे युद्धारम्भे पाण्डवसेनापतिः धृष्टद्युम्नः कः केन सह युध्येत इति निर्दिशति। अधः तेषां नामानि दत्तानि सन्ति।

### 1. तेषाम् उपयोगेन यथोदाहरणं 'सह' इति शब्देन वाक्यानि रचयत –

| | |
|---|---|
| उदा – अर्जुनः – कर्णः | अर्जुनः कर्णेन सह युध्येत। |
| 1. भीमः – दुर्योधनः | .............................. । |
| 2. नकुलः – द्रौणिः | .............................. । |
| 3. उत्तमौजाः – कृपः | .............................. । |
| 4. सहदेवः – शकुनिः | .............................. । |
| 5. चेकितानः – शलः | .............................. । |
| 6. शिखण्डी – भीष्मः | .............................. । |
| 7. अभिमन्युः – वृषसेनः | .............................. । |
| 8. सात्यकिः – जयद्रथः | .............................. । |
| 9. धृष्टकेतुः – शल्यः | .............................. । |

### 2. उदाहरणं दृष्ट्वा वाक्यानि रचयत –

उदा – सीता रामेण सह वनं गच्छति।

1. धृतराष्ट्रः .......................... सह वार्तालापं करोति।
2. अहं ...................... सह युध्येय इति अर्जुनः पृष्टवान्।
3. भक्तः ............................ सह स्नेहेन व्यवहरति।
4. कर्णः ........................... सह सम्भाषणं कृतवान्।
5. सः ...................................... सह गच्छति।
6. प्रजापतिः ........................... सह प्रजाः असृजत्।
7. अहं .................................. सह गीतं गास्यामि।
8. माता ............................... सह मन्दिरं गमिष्यति।
9. नायकः ........................... सह युद्धभूमिं प्रविशति।

रामः, सञ्जयः, के, सर्वे, कुन्ती, मित्रम्, यज्ञः, एतौ, भगिनी, सारथिः

www.thearyasamaj.org



पश्यत, उच्चैः पठत च –

विना योगे तृतीया



कृष्णेन सह पाण्डवसैन्यम् अस्ति।



कृष्णेन विना कौरवसैन्यम् अस्ति।

सूर्येण विना प्रकाशः न भवति।
घट्या विना समयस्य ज्ञानं न भवति।
रामः भरतशत्रुघ्नाभ्यां विना वनं गतवान्।
दशरथः रामेण विना न जीवितवान्।

अहं मित्रेण विना विपणिं गच्छामि।
वेदैः विना भारतस्य प्रसिद्धिः नास्ति।
सैनिकैः विना देशरक्षणं न भवति।

## अभ्यासः

1. कोष्ठके दत्तानां शब्दानां साहाय्येन रिक्तस्थानानि पूरयत –

उदा – बालः दुग्धेन विना भोजनं न करोति।

1. वृद्धः ........................................ विना न चलति। (दण्डः)
2. देशः ........................................ विना न शोभते। (देशभक्तः)
3. सः ........................................ विना कुत्रापि न गच्छति। (अहम्)
4. ........................................ विना ज्ञानं न लभते। (श्रद्धा)
5. त्वं ........................................ विना कार्यं कुरु। (सङ्गः)
6. ........................................ विना मुक्तिः न भवति। (ज्ञानम्)
7. कर्णः ........................................ विना अयुध्यत। (दिव्यकवचम्)
8. अभिमन्युः........................................ विना चक्रव्यूहं भिन्नवान्। (भीतिः)
9. अश्वत्थामा ........................................ विना वनं गतवान्। (मणिः)

www.thearyasamaj.org

# 40 न त्वं शोचितुम् अर्हसि



उच्चैः पठत, जानीत च –

तुमुन्-प्रत्ययान्तानि

वृद्धः – आगच्छतु भगिनि !

लता – धन्यवादः महोदय ! नूतनं गीतापुस्तकं क्रेतुम् इच्छामि। कतिभिः रूप्यकैः पुस्तकं लब्धुं शक्नोमि ?

वृद्धः – कियन्मूल्यस्य पुस्तकं स्वीकर्तुम् इच्छसि ?

लता – शतपर्यन्तं दातुं शक्नोमि महोदय !

वृद्धः – तत्र बहुविधानि पुस्तकानि द्रष्टुं शक्नोषि।

लता – तेष्वेव वर्णमयम् एकं चेतुम् इच्छामि।

वृद्धः – जीवनं यशस्वि कर्तुं गीताध्ययनं कुरु।

### तुमुन्प्रत्ययान्तरूपाणि

| | | | |
|---|---|---|---|
| लिखति | लेखितुम् | प्रविशति | प्रवेष्टुम् |
| खादति | खादितुम् | विस्मरति | विस्मर्तुम् |
| क्रीडति | क्रीडितुम् | उत्तिष्ठति | उत्थातुम् |
| चलति | चलितुम् | गच्छति | गन्तुम् |
| धावति | धावितुम् | उन्नयति | उन्नेतुम् |
| जानाति | ज्ञातुम् | अनुकरोति | अनुकर्तुम् |
| हसति | हसितुम् | आकर्षति | आक्रष्टुम् |
| ददाति | दातुम् | वदति | वदितुम् |
| तिष्ठति | स्थातुम् | युध्यते | योद्धुम् |
| पश्यति | द्रष्टुम् | चिन्तयति | चिन्तयितुम् |
| गायति | गातुम् | भक्षयति | भक्षयितुम् |
| शृणोति | श्रोतुम् | दहति | दग्धुम् |
| नयति | नेतुम् | नृत्यति | नर्तितुम् |
| आनयति | आनेतुम् | दण्डयति | दण्डयितुम् |

www.thearyasamaj.org



## अभ्यासः

1. तुमुन्नन्तरूपस्य प्रयोगेण वाक्यद्वयम् एकं वाक्यं कृत्वा लिखत –

1. धावकः धावति, क्रीडाङ्गणं गच्छति। धावकः धावितुं क्रीडाङ्गणं गच्छति।
2. बालकः पठिष्यति, पुस्तकं स्वीकरिष्यति।
........................ पठितुं ................................................ ।
3. शिशुः चलितवान्, प्रयत्नं कृतवान् ।
............................................................................... ।
4. मातरः अर्चिष्यन्ति, मन्दिरं गमिष्यन्ति।
............................................................................... ।
5. भ्राता जलम् अपिबत्, पाकशालाम् अगच्छत्।
............................................................................... ।
6. ते वैज्ञानिकाः भविष्यन्ति, सम्यक् पठिष्यन्ति।
............................................................................... ।
7. सैनिकाः युध्यन्ते, रणाङ्गणं गच्छन्ति।
............................................................................... ।
8. वक्ता अवदत्, सभाम् अगच्छत्।
............................................................................... ।
9. युवत्यः गायन्ति, मञ्चे तिष्ठन्ति।
............................................................................... ।
10. अभियन्ता भवनं निर्माति, मानचित्रं लिखति।
............................................................................... ।
11. रामस्य सेना लङ्कां गच्छति, सेतुं निर्माति।
............................................................................... ।
12. भगिन्यः चाकलेहं खादन्ति, आपणं गच्छन्ति।
............................................................................... ।

www.thearyasamaj.org



2. कोष्ठके विद्यमानानि पदानि दृष्ट्वा यथोदाहरणं वाक्यानि रचयत –

बालिका

खेलति ..................... क्रीडाक्षेत्रं
खादति.....................उपाहारगृहं
भ्रमति .....................कश्मीरं
अर्चति ..................... मन्दिरं
पठति .....................विद्यालयं
पत्रं प्रेषयति.................पत्रालयं
मिलति .................... राष्ट्रपतिभवनं
स्नातका भवति........... महाविद्यालयं
रसं पास्यति ............. आपणं
क्रेष्यति.................विपणिं
लेखिष्यति .............प्रकोष्ठं

गच्छति

उदा – 1. बालिका खेलितुं क्रीडाक्षेत्रं गच्छति।

2. बालिका ................................................ ।
3. बालिका ................................................ ।
4. बालिका ................................................ ।
5. बालिका ................................................ ।
6. बालिका ................................................ ।
7. बालिका ................................................ ।
8. बालिका ................................................ ।
9. बालिका ................................................ ।
10. बालिका ................................................ ।

www.thearyasamaj.org

# 41 अतः अस्मि लोके

पश्यत, उच्चैः पठत च –

अतः



रात्रिः अभवत् अतः चन्द्रः आकाशे उदितः।

सुबोधः – सुरुचे ! भवती कुत्र गच्छति ? किम् आरोग्यं सम्यक् नास्ति ?
सुरुचिः – आं भ्रातः ! आरोग्यं सम्यक् नास्ति। अतः वैद्यस्य समीपं गच्छामि।
सुबोधः – एवम् ! अहम् अपि आगच्छामि वैद्यस्य समीपम्।
सुरुचिः – किमर्थम् ? किं जातम् ?
सुबोधः – भगिनि ! मम पादे पीडा अस्ति, अतः अहम् अपि आगच्छामि।
सुरुचिः – तर्हि आगच्छतु भ्रातः ! शीघ्रं चलाव।
सुबोधः – आगच्छामि।

उच्चैः पठत, जानीत च –

- यानं शीघ्रं प्राप्तम्, अतः अहं शीघ्रम् आगतः।
- विद्युत् नास्ति, अतः व्यजनं न भ्रमति।
- सः सम्यक् पठितवान् अतः विषयं सम्यक् जानाति।
- अस्य मूल्यम् अधिकम्, अतः अहं न क्रीणामि।

**अवधेयम्**

यानं शीघ्रं प्राप्तम्। अतः शीघ्रम् आगतः।
अत्र आगमनं कार्यं, शीघ्रं यानप्राप्तिः कारणम्। एतादृशस्य वाक्यद्वयस्य प्रयोगः यदा भवति, तदा यत्र कारणवाक्यं पूर्वम् उच्यते, कार्यवाक्यं च अनन्तरम् उच्यते तत्र कार्यवाक्ये 'अतः' इति अव्ययपदं योज्यते।
यथा – अद्य शैत्यम् अधिकम् अस्ति, अतः उष्णजलं पास्यामि।

www.thearyasamaj.org



उच्चैः पठत –

1. भीमः पाके आसक्तः । अतः वल्लवः भूत्वा पाकशालां गतः ।
2. धर्मराजः द्यूते इच्छुकः । अतः सः कङ्कः भूत्वा द्यूतेन क्रीडति ।
3. अर्जुनः सङ्गीतप्रियः । अतः बृहन्नला भूत्वा नृत्यं सङ्गीतं च पाठयति ।
4. नकुलाय अश्वचालनं रोचते । अतः दामग्रन्थिः भूत्वा अश्वपालकः अभवत् ।
5. सहदेवस्य गोपालने अभिरुचिः । अतः तन्तिपालः भूत्वा गोपालकः अभवत् ।
6. द्रौपदी केशकर्मणि कुशला । अतः सैरन्ध्री भूत्वा सुदेष्णां सेवते ।
7. कर्णः शप्तः आसीत् । अतः ब्रह्मविद्यां विस्मृतवान् ।
8. युद्धे बन्धून् दृष्टवान् । अतः अर्जुनः विषण्णः जातः ।

यतः

उच्चैः पठत, जानीत च –



प्रकोष्ठे अन्धकारः नास्ति,
यतः दीपः ज्वलति ।

1. एषा बालिका स्वस्था, यतः एषा प्रतिदिनं भ्रमणं करोति ।
2. एषः बालकः अपि स्वस्थः, यतः एषः अपि प्रातः भ्रमणं करोति ।
3. दीपः न ज्वलति, यतः विद्युत् नास्ति ।
4. अहम् अभ्यासं करोमि, यतः सम्यक् संस्कृतं वक्तुम् इच्छामि ।
5. वयम् एव परिवेषणं कुर्मः, यतः अद्य अस्माकं पर्यायः अस्ति ।
6. अद्य बुधवासरः अस्ति, यतः ह्यः मङ्गलवासरः आसीत् ।

**अवधेयम्**

अत्र वाक्येषु कार्यवाक्यं प्रथमम् उक्तम्, कारणवाक्यं च अनन्तरम् । 'यतः' इति अव्ययस्य प्रयोगः कारणवाक्येन सह कृतः अस्ति ।
उदा – अहम् उष्णजलं पातुम् इच्छामि, यतः अद्य शैत्यम् अस्ति ।

www.thearyasamaj.org



यथोदाहरणं यतः योजयित्वा पठत –

उदा – 1. सः पञ्च वस्त्राणि धृतवान् यतः तत्र शैत्यम् अस्ति।

1. कृष्णः गीताम् उपदिष्टवान् – अर्जुनः विषण्णः।
2. रोगमुक्तः भवति – सः योगम् अनुसरति।
3. अभ्यासेन मनः गृह्यते। तत् दुर्निग्रहं चलम्।
4. अहं ते दिव्यं चक्षुः ददामि। अनेन स्वचक्षुषा मां द्रष्टुं न शक्यसे।
5. तव वचनं करिष्ये। मोहः नष्टः।
6. अहं ते हितं वक्ष्यामि – त्वं मे प्रियः।
7. ऋषयः ब्रह्मनिर्वाणं लभन्ते – ते क्षीणकल्मषाः
8. त्वं शोचितुं न अर्हसि – अयम् आत्मा अच्छेद्यः।

श्रीकृष्णस्य रणनीतेः विवरणम् अत्र अस्ति। यतः इति उपयुज्य योग्यं वाक्यं रचयत –

| | | | |
|---|---|---|---|
| श्रीकृष्णः | मायया सूर्यम् आच्छादितवान् | यतः | जयद्रथस्य वधः कर्तव्यः। |
| | घटोत्कचं कर्णस्य समीपं प्रेषितवान् | | अर्जुनः शक्त्यायुधात् रक्षणीयः। |
| | लोहभीमं धृतराष्ट्रस्य समीपं प्रेषितवान् | | भीमस्य रक्षणं कार्यम्। |
| | अश्वत्थामा हतः इति वाचितवान् | | द्रोणाचार्यः मारणीयः। |
| | पाण्डवान् अन्यत्र नयति। | | द्रोणपुत्रस्य कुटिलताम् ऊहितवान्। |

1. .................................................................................... ।
2. .................................................................................... ।
3. .................................................................................... ।
4. .................................................................................... ।
5. .................................................................................... ।

www.thearyasamaj.org

# 42 हे कृष्ण ! हे माधव !



पश्यत, जानीत च –

सम्बोधनम्



अम्ब ! अत्र पश्य ।



राजन् ! शृणु ।



पाञ्चालि ! किमहं गच्छानि ?

**अवधेयम्**

— सम्बोधनरूपस्य प्रयोगः सूचनार्थं भवति । सामान्यतः एतदर्थं (!) इति चिह्नस्य, अल्पविरामस्य (,) वा उपयोगः भवति । यथा – मित्र ! सखि ! पुत्रि ! पुत्र !

— सम्बोधनरूपात् पूर्वं 'भोः, हे, रे, अये, अयि' इत्यादीनि अपि कदाचित् प्रयुज्यन्ते ।

यथा – हे मित्र !

— सामान्यसम्बोधनानि

पुरुषम् उद्दिश्य – मित्र !

महिलाम् उद्दिश्य – सखि ! भगिनि !

सामान्यम् – भोः ! अयि भोः !

\+ आदरसूचनार्थं नामसूचकपदेन सह –

* पुंलिङ्गे – प्रायः वर्य–महोदय – महाशयमहाभागशब्दाः योज्यन्ते ।

यथा – राजेशवर्य ! सुधीरवर्य !

राकेशमहाशय ! आशुतोषमहाभाग !

* स्त्रीलिङ्गे – प्रायः वर्या–महोदया – भगिनीशब्दाः योज्यन्ते ।

यथा – लतावर्ये ! रेखामहोदये ! लक्ष्मीभगिनि !

* नामनिर्देशं विना –

* पुंलिङ्गे – मान्य / आर्य / श्रीमन् – इत्यादीनि प्रयुज्यन्ते ।

* स्त्रीलिङ्गे – मान्ये / आर्ये / भगिनि – इत्यादीनि प्रयुज्यन्ते ।

www.thearyasamaj.org



सम्बोधनरूपाणि

| | | | |
|---|---|---|---|
| पुत्रः | पुत्र ! | पुत्रौ ! | पुत्राः! |
| मान्या | मान्ये ! | मान्ये ! | मान्याः ! |
| अम्बा | अम्ब ! | अम्बे ! | अम्बाः ! |
| लक्ष्मीः | लक्ष्मि ! | लक्ष्म्यौ ! | लक्ष्म्यः ! |
| गौरी | गौरि ! | गौर्यौ ! | गौर्यः! |
| पिता | पितः ! | पितरौ ! | पितरः ! |
| माता | मातः ! | मातरौ ! | मातरः ! |
| गुरुः | गुरो ! | गुरू ! | गुरवः ! |
| मित्रम् | मित्र ! | मित्रे ! | मित्राणि ! |
| मुनिः | मुने ! | मुनी ! | मुनयः ! |
| मन्त्री | मन्त्रिन् ! | मन्त्रिणौ ! | मन्त्रिणः ! |
| राजा | राजन् ! | राजानौ ! | राजानः ! |
| श्रीमान् | श्रीमन् ! | श्रीमन्तौ ! | श्रीमन्तः ! |

## अभ्यासः

1. भगवद्गीतायाम् एतानि सम्बोधनपदानि कुत्र सन्ति इति अवलोकयत –

सञ्जय, द्विजोत्तम, महीपते, अच्युत, भारत, केशव, मधुसूदन, जनार्दन, माधव, अरिसूदन, आचार्य, परन्तप, कौन्तेय, कुरुनन्दन, धनञ्जय, पार्थ, पुरुषर्षभ, अनघ, अर्जुन, महाबाहो, पाण्डव, कुरुसत्तम

2. एतेषां सम्बोधनरूपाणि रिक्तस्थानेषु लिखत –

| | | | |
|---|---|---|---|
| हृषीकेशः | – हृषीकेश | योगी | – ........................ |
| इक्ष्वाकुः | – ........................ | सव्यसाची | – ........................ |
| युधामन्युः | – ........................ | सुभद्रा | – ........................ |
| कुन्ती | – ........................ | भगवान् | – ........................ |
| कर्ता | – ........................ | धाता | – ........................ |
| गुडाकेशः | – ........................ | महाबाहुः | – ........................ |

www.thearyasamaj.org

# 43 गर्वभङ्गः



एतां कथाम् उच्चैः पठत –

अव्ययानि



मत्स्यदेशस्य महाराजः विराटः । पाण्डवाः अज्ञातवाससमये विराटराजस्य आस्थाने प्रच्छन्नरूपेण आसन् । त्रिगर्तनरेशः सुशर्मा विराटराजस्य गोसम्पत्तिम् अपहर्तुं तत्र आगच्छति । विराटः युद्धार्थं सन्नद्धः भवति । पाण्डवाः अपि तेन सह युद्धार्थं गच्छन्ति । पाण्डवानां साहाय्येन विराटः युद्धे जयं प्राप्नोति । सः त्रिगर्तं गच्छति ।

अत्रान्तरे कौरवाः ससैन्यं विराटनगरम् आगत्य गोधनम् अपहरन्ति । तदा गवाध्यक्षः रक्षणाय राजकुमारम् उत्तरं निवेदयति । उत्तरः वदति – "यद्यपि अहं युद्धे कुशलः, तथापि इदानीं न गच्छामि । यतः इदानीं मम सारथिः नास्ति । यदि सारथिः अस्ति तर्हि अहं युद्धार्थं गमिष्यामि, दुर्योधनं, भीष्मं, कर्णं, द्रोणं च विद्राव्य गोधनं रक्षिष्यामि" इति ।

तदा सैरन्ध्री वदति – "अत्र बृहन्नला या अस्ति, पूर्वं सा अर्जुनस्य सारथिः आसीत् । तां नय" इति । ततः सा एव बृहन्नलां तत्र आनयति । बृहन्नला वदति– "गीतं, नृत्यं, वाद्यं वा करिष्यामि । सारथ्यं कथं करिष्यामि ?" इति । उत्तरः वदति – "गायकः, नर्तकः च अनन्तरं भव । इदानीन्तु सारथिः भव" इति ।

ततः बृहन्नला रथम् आरुह्य अश्वं प्रेरयति । किन्तु युद्धभूमौ विशालं कुरुसैन्यं दृष्ट्वा उत्तरः हतोत्साहः भवति । सः वदति – "मम पिता त्रिगर्तदेशं गतवान् अस्ति । सर्वामपि सेनां सः नीतवान् अस्ति । अहम् एकः बालः एतान् अस्त्रकोविदान् प्रतिरोद्धुं न शक्नोमि, बृहन्नले ! निवर्तस्व" इति ।

बृहन्नला वदति – "स्त्रीणां पुरतः बहु जल्पसि । इदानीं कथं युद्धं न करोषि ? यदि न युद्ध्यसे तर्हि सर्वे प्रहसिष्यन्ति" इति ।

"ये केऽपि हसन्तु । मम चिन्ता नास्ति" इति उक्त्वा उत्तरः रथात् अवतीर्य अधावत् । बृहन्नला तु "एषः धर्मः न । क्षत्रियः कदापि पलायनं न करोति । युद्धमेव श्रेयः, न पलायनम्" इति तम् अनुधावति । केशेषु गृह्णाति च । तदा उत्तरः वदति – "तुभ्यं शतं सुवर्णनाणकानि ददामि । अष्ट मणीन् ददामि । उत्तमं रथम्, अश्वान् गजान् च ददामि । मां मुञ्च" इति ।

"मास्तु चिन्ता । आवाम् अग्रे गच्छाव । त्वं मम सारथिः भव । अहं युद्धं करिष्यामि" इति उक्त्वा बृहन्नला तं रथम् आरोपयति ।

www.thearyasamaj.org



ततः तौ श्मशानभूमिं गच्छतः। तत्र शमीवृक्षे पाण्डवैः पूर्वं रक्षितानि आयुधानि गृह्णीतः। तदा उत्तरः जिज्ञासया "को भवान् ?" इति बृहन्नलां पृच्छति। बृहन्नला – "अहम् अर्जुनः। युधिष्ठिरः, भीमः, नकुलः, सहदेवश्चापि तव पितुः आश्रिताः एव सन्ति" इति वदति। तदा उत्तरः धैर्यं प्राप्नोति।

ततः प्रवृत्ते युद्धे अर्जुनः भीष्मद्रोणकर्णादिसहितान् कौरवान् पराजित्य विराटराजस्य गोधनं रक्षति। तावता पाण्डवानाम् अज्ञातवासः अपि समाप्तः भवति। विराटराजः स्वपुत्र्याः उत्तरायाः विवाहम् अर्जुनस्य पुत्रेण अभिमन्युना सह कारयति।

1. एतेषां प्रश्नानाम् उत्तरं लिखत –

1. विराटः कस्य देशस्य महाराजः ?

........................................................................................

2. गवाध्यक्षः रक्षणाय कं निवेदयति ?

........................................................................................

3. त्रिगर्तनरेशः कः ?

........................................................................................

4. उत्तरः कुत्र बहु जल्पति ?

........................................................................................

5. शमीवृक्षे कैः आयुधानि रक्षितानि आसन् ?

........................................................................................

6. उत्तरायाः विवाहः केन सह भवति ?

........................................................................................

2. एतेषाम् उत्तराणां प्रश्नवाक्यं लिखत –

1. त्रिगर्तनरेशः गोसम्पत्तिम् अपहर्तुम् आगच्छति।

........................................................................................

2. उत्तरः विराटस्य पुत्रः।

........................................................................................

3. सैरन्ध्री बृहन्नलाम् आनयति।

........................................................................................

4. ततः तौ श्मशानभूमिं गच्छतः।

........................................................................................

5. पाण्डवानाम् अज्ञातवासः समाप्तः भवति।

........................................................................................

www.thearyasamaj.org



## अवधेयम्

अस्मिन् पाठे नूतनानि अपि अव्ययानि प्रयुक्तानि सन्ति –

यथा – यद्यपि – तथापि यदि – तर्हि

एतानि अपि नित्यसम्बद्धानि अव्ययानि। अतः एतेषां प्रयोगे अपि द्वयोः मिलित्वा एव (समानवाक्ये) प्रयोगः भवति।

### यद्यपि – तथापि

उच्चैः पठत –

यद्यपि समुद्रे अधिकं जलम् अस्ति तथापि न उपयोगाय।

यद्यपि सः वृद्धः तथापि धावति।

यद्यपि सः राजपुत्रः तथापि विनयशीलः।

यद्यपि अर्जुनः शूरः तथापि युद्धार्थं न प्रवृत्तः।

यद्यपि कर्णः सूतपुत्रः इति ख्यातः तथापि सः महारथः।

यद्यपि शिखण्डी नपुंसकः तथापि सः महावीरः।

यद्यपि सर्वे स्वधर्मं जानन्ति, तथापि आचरणे न प्रवर्तन्ते।

## अभ्यासः

यथोदाहरणं वाक्यानि वदत –

उदा – यद्यपि मरणं निश्चितं तथापि जनाः तत् न चिन्तयन्ति।

1. सः बहु कष्टे अस्ति – न प्रकटयति।
2. तव बहूनि जन्मानि अतीतानि – त्वं न स्मरसि।
3. अन्तः भगवान् अस्ति – वयं न जानीमः।
4. एषा रात्रिः – संयमी जागर्ति।
5. कृष्णः युद्धनिपुणः – कुरुक्षेत्रे शस्त्रं न उत्थापयति।
6. ज्ञानयोगः श्रेष्ठः – कर्म करोतु।
7. शरीरं नश्वरं – मोहः न नश्यति।
8. जनाः पापस्य फलं नेच्छन्ति – पापं कुर्वन्ति एव।
9. कर्मफले इच्छा नास्ति – कर्म करोमि।
10. मनः तत्त्वम् इच्छति – तत् ज्ञातं न भवति।

www.thearyasamaj.org



## यदि – तर्हि

यदि भवान् योगासनं करोति तर्हि शरीरं दृढं भवति।
यदि ज्वरः अस्ति तर्हि वैद्यं पश्यतु।
यदि विद्युत् अस्ति तर्हि दीपः ज्वलति।
यदि अध्ययनं करोति तर्हि मनः सुदृढं भवति।
यदि जिज्ञासा अस्ति तर्हि गीतां सुखेन अवगच्छति।
यदि इन्द्रियनिग्रहं करोषि तर्हि मनोनिग्रहः सरलः।

### 1. यथोदाहरणं रिक्तस्थानानि पूरयत –

उदा – यदि बुभुक्षा अस्ति तर्हि भवान् खादतु।

1. यदि पिपासा अस्ति ..........................................................।
2. यदि ज्ञानम् आवश्यकम् ..........................................................।
3. यदि मित्रम् आगच्छति ..........................................................।
4. यदि दुःखम् अस्ति ..........................................................।
5. यदि अन्धकारः अस्ति ..........................................................।
6. यदि कष्टम् आपतति..........................................................।
7. यदि उत्सवः अस्ति ..........................................................।
8. यदि दीनं पश्यामि..........................................................।
9. यदि आरोग्यम् आवश्यकम् ..........................................................।

### 2. यथोदाहरणं रिक्तस्थानानि पूरयत –

उदा – 1. विद्युत् अस्ति। दीपः ज्वलति।
यदि विद्युत् अस्ति तर्हि दीपः ज्वलति।

1. स्नानं न करोति। शरीरं मलिनं भवति।

.......................................................................... ।

3. कार्यालयस्य विरामः अस्ति। चलचित्रं पश्यामि।

.......................................................................... ।

4. आत्मविश्वासः अस्ति। सर्वं सुकरं भवति।

www.thearyasamaj.org



.................................................................................. ।

5. सर्वे सत्कार्यं कुर्वन्ति । देशस्य उन्नतिः भवति ।

.................................................................................. ।

6. मूल्यं न्यूनम् अस्ति । फलानि क्रीणामि ।

.................................................................................. ।

7. भवती विपणिं गच्छति । अहमपि आगच्छामि ।

.................................................................................. ।

8. भवान् न पठति । परीक्षायाम् उत्तीर्णः न भवति ।

.................................................................................. ।

## अन्यानि अपि कानिचित् अव्ययानि

यावत् – तावत्

उच्चैः पठत –

नद्यां यावत् जलम् अस्ति तावत् सरोवरे नास्ति ।

कर्णाटकं यावत् विशालं केरलं तावत् विशालं नास्ति ।

एषा यावत् कार्यं करोति तावत् अन्या न करोति ।

भीमस्य यावत् धैर्यम् अस्ति तावत् अन्येषां नास्ति ।

मम भगिनी यावत् पठति तावत् अहं न पठामि ।

यावत् युद्धं न करोषि तावत् राज्यं न प्राप्नोषि ।

यावत् आत्मज्ञानं न भवति तावत् मोक्षः न भवति ।

यावत् तपः न आचरति तावत् शान्तिः न लभ्यते ।

यावत् विश्वरूपं न पश्यति तावत् अर्जुनः न विश्वसिति ।

### अवधेयम्

'यावत् – तावत्' इत्येतत् युगलम् अवधिं (दैर्घ्यं कालं च) सूचयति । 'यावत्' इत्यस्य प्रयोगः कृतः चेत् 'तावत्' इत्यपि प्रयोक्तव्यम् एव ।

www.thearyasamaj.org



एतत् सम्भाषणम् उच्चैः पठत –

चेत् – नो चेत्

मिलिन्दः – आगामिमासस्य कार्यक्रमस्य विषये चिन्तनम् एव न कृतम्। यदि एवम् एव दिनानि गच्छन्ति तर्हि...

नारायणः – मित्र ! चिन्ता मास्तु। यदि वयं सर्वे कार्याणि विभज्य स्वीकुर्मः, तर्हि न कोऽपि क्लेशः भवति।

मिलिन्दः – यदि अस्माकं गोष्ठी भवति, तर्हि खलु कार्यविभागः ?

नारायणः – अस्तु मित्र ! अद्य एव गोष्ठी भवतु। आगच्छामि तावत्। यदि कार्यालयं विलम्बेन गच्छामि, तर्हि मम अधिकारी कुप्यति।

मिलिन्दः – सायं मम गृहम् आगच्छति खलु भवान् ?

नारायणः – शक्यं चेत् सायङ्काले आगच्छामि। नो चेत् दूरभाषां करोमि।

मिलिन्दः – शक्यं चेत् इति ?

नारायणः – आम् ! अद्य गणनापरिशोधकः अस्माकं कार्यालयम् आगतः अस्ति। सः प्रायः चतुर्वादने गच्छति। सः गच्छति चेत् अहं भवतः गृहम् आगच्छामि। नो चेत्...

मिलिन्दः – भोः ! कार्यक्रमस्वरूपविषये अद्य एव निर्णयं कुर्मः।

नारायणः – अस्तु। शक्यं चेत् सायङ्काले मिलामः। नो चेत् श्वः प्रातः काले मेलिष्यामः।

मिलिन्दः – श्वः अरविन्दस्य समयः न भविष्यति चेत् ?

नारायणः – तर्हि अहम् अद्य रात्रौ अरविन्दस्य गृहमेव गच्छामि।

मिलिन्दः – सः गृहे अस्ति चेत् समीचिनम्। नो चेत् ....?

नारायणः – नो चेत् उषसि पुनः गमिष्यामि। चिन्ता मास्तु भवतः।

## अभ्यासः

थोदाहरणं वाक्यानि रचयत –

उदा – भवान् शीघ्रम् आगच्छतु। नो चेत् पिता तर्जयति।

1. गीताम् अर्थसहितं पठतु । ...................... भारतीयदर्शनं सम्यक् ज्ञातुं न शक्नोति।
2. औषधं स्वीकरोतु। ................................... ज्वरः वर्धते।

www.thearyasamaj.org

3. पठितं तदा तदा वदतु । ............................ विस्मरणं भवति ।

4. परश्वः भवतः गृहम् आगमिष्यामि । ........................... प्रपरश्वः ।

5. सम्यक् पठतु । .................. उत्तीर्णता कथं प्राप्यते ?

6. सुरेशः आगच्छति । ............................ माम् आह्वयतु ।

7. उपविश्य पठतु । ............................. उत्थाय वा पठतु ।

8. सः आगच्छतु । ......................... भवान् आगच्छतु ।

9. भवान् आगच्छतु । .................................... अनुजं प्रेषयतु ।

10. विना शब्दं पठतु । ...................... इतः निर्गच्छतु ।

उच्चैः पठत –

1. धर्मयुद्धे विजयः भवति चेत् राज्यं प्राप्नोति, नो चेत् स्वर्गं प्राप्नोति ।

2. वृक्षसंवर्धनं करोति चेत् वृष्टिः भवति, नो चेत् अवर्षणम् ।

3. इन्द्रियनिग्रहं करोति चेत् योगी, नो चेत् मिथ्याचारी ।

4. मुक्तसङ्गः कर्म कुरु, नो चेत् बन्धने तिष्ठति ।

5. मयि चित्तं समाधातुं न शक्नोषि चेत् अभ्यासयोगेन मां प्राप्नुहि, नो चेत् मत्कर्मपरमः भव ।

6. विषयध्यानं न करोतु नो चेत् प्रणश्यति ।

7. असक्तः सन् कर्म कुरु नो चेत् परमपदं न प्राप्नोषि ।

8. अहं कर्म न कुर्यां चेत् लोकाः उत्सीदेयुः ।

9. सर्वोऽपि स्वधर्मम् आचरेत् नो चेत् श्रेयः न प्राप्नोति ।

10. अर्जुन ! त्वं धर्म्यं युद्धं कुर्याः नो चेत् पापमवाप्स्यसि ।

www.thearyasamaj.org



# 44 दशमस्त्वमसि

प्रथमं दृश्यम्

सप्तविभक्तयः

उच्चैः पठत –

(कस्यचित् गुरोः आश्रमः। गुरुः उन्नतस्थाने उपविश्य ध्यानमग्नः अस्ति। दश शिष्याः प्रविशन्ति।)

शिष्याः – आचार्य ! नमो नमः।

गुरुः – ( नेत्रे उन्मील्य) प्रियशिष्याः ! सर्वे आगताः किम् ?

शिष्याः – आं गुरो, वयं सर्वेऽपि आगताः।

गुरुः – समीचीनम्। शिष्याः ! अद्य अनध्ययनम् अस्ति। भवतां पाठः नास्ति।

प्रथमः – (सन्तोषेण) सत्यं वा ?

गुरुः – आम्। परन्तु अन्यदेकं कार्यं सूचयामि।

द्वितीयः – किं तत् गुरो ?

गुरुः – वदामि, सावधानं शृण्वन्तु। पार्श्वस्थे ग्रामे अद्य रथोत्सवः प्रचलति। भवन्तः सर्वे तत्र गत्वा रथोत्सवं दृष्ट्वा सायङ्काले प्रत्यागच्छन्तु।

तृतीयः – (सन्तोषेण) अहो भाग्यम् ! महान् सन्तोषः ! वयं सर्वे इदानीम् एव गच्छामः।

सर्वे – गच्छामः, गच्छामः। (सज्जाः भवन्ति)।

गुरुः – परन्तु बहुजागरूकतया गन्तव्यम् । यतः, अहं भवतां बुद्धिमत्तां जानामि।

चतुर्थः – वयं बहु जागरूकाः भवामः गुरो !

गुरुः – भवतु। सर्वे मिलित्वा एव गच्छन्तु।

पञ्चमः – तथैव अस्तु गुरो।

गुरुः – (स्वगतम् )तथापि एतेषां मन्दमतीनां विषये इतोऽपि मम विश्वासः नास्ति। अतः एवं करोमि। (प्रकाशः) सर्वे पङ्क्तिशः तिष्ठन्तु।
(शिष्याः तिष्ठन्ति। गुरुः गणयति)
एकं,द्वे, त्रीणि,चत्वारि,पञ्च,षट्, सप्त, अष्ट, नव, दश......। पश्यन्तु,भवन्तः दश जनाः सन्ति। मध्ये मध्ये परिशीलयन्तु, सर्वे आगताः वा, कोऽपि च्युतः वा इति।

षष्ठः – अवश्यं परिशीलयामः गुरो ! वयं गच्छामः।

गुरुः – शुभं भवतु।
(गुरुः गच्छति। शिष्याः सन्तोषेण नृत्यन्तः अन्यस्यां दिशि गच्छन्ति।)

www.thearyasamaj.org





द्वितीयं दृश्यम्

प्रथमः – भोः, सर्वे शीघ्रम् आगच्छन्तु। नो चेत् विलम्बः भवति।

सर्वे – आगताः भोः, आगताः

द्वितीयः – वयं सर्वेऽपि स्मः किल ?

सर्वे – स्मः। कः संशयः ?

तृतीयः – परन्तु मित्राणि, वयम् इदानीमेव एकां नदीं तीर्त्वा अग्रे आगतवन्तः। तत्र सर्वेऽपि नदीं तीर्णवन्तः वा इति मम संशयः।

द्वितीयः – ममापि सः एव संशयः।

चतुर्थः – अतः एव गुरुः उक्तवान् अस्ति, मध्ये मध्ये सर्वे सन्ति वा इति परिशीलयन्तु इति।

पञ्चमः – सत्यम्। दश जनाः अपि स्मः वा इति इदानीम् एव परिशीलयामः।

षष्ठः – मित्राणि, भवन्तः सर्वे पङ्क्तिरूपेण तिष्ठन्तु। अहं गणयामि। (सर्वे तिष्ठन्ति) इदानीं गणयामि। एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव,.....!

प्रथमः – सत्यं खलु...., दशमः कुत्र गतः ?

www.thearyasamaj.org

द्वितीयः – भोः, भवान् गणनां सम्यक् न जानाति। आगच्छतु, अहं गणयामि.... एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव,.....!
सत्यमेव खलु.. ! नव जनाः एव सन्ति।

चतुर्थः – तर्हि दशमः कः ? सः कुत्र गतः ?

पञ्चमः – अत्र एव स्यात्। एतेषु एव स्यात्। एतेषु दशमः कः ? दशमः कः ?

पथिकः – (प्रविश्य) भोः, कः कोलाहलः ? का समस्या भवताम् ?

पञ्चमः – भोः, गुरोः आदेशानुसारं वयं दश जनाः रथोत्सवार्थं प्रस्थिताः। इदानीं पश्यामः, नव जना एव स्मः। हा हन्त ...! (उच्चैः रोदिति)

पथिकः – (स्वगतम्) कथम् एवं वदति एषः ?(मनसा एव सर्वान् गणयति।)(प्रकाशः) भोः, सर्वे सन्ति खलु ?

पञ्चमः – न हि, न हि... पश्यतु, अहमेव गणयित्वा दर्शयामि। एकं, द्वे, त्रीणि, चत्वारि,पञ्च, षट्, सप्त, अष्ट, नव, पश्यतु, नव जनाः एव स्मः। दशमः कुत्र गतः ?

पथिकः – (हसन्) मित्र ! भवान् एव दशमः, यः दशमस्य अन्वेषणं करोति।
(सर्वे निष्कम्पाः तिष्ठन्ति। निरूपकः नेपथ्ये वदति।)

निरूपकः – मित्राणि...! एषः एव लोकस्य व्यवहारः। एवमेव वयम् आत्मनः अन्वेषणं कुर्वन्तः भवामः। विषयः, देहः, इन्द्रियाणि, प्राणाः, मनः, बुद्धिः, अहङ्कारः, चित्तम्, अज्ञानम् – इत्येतेषु अन्यतमः एव आत्मा स्यात् इति चिन्तयन्तः वयं तत्र एव तस्य अन्वेषणं कुर्मः। परन्तु वयं न जानीमः यत् यः अन्वेषणं करोति सः एव आत्मा। सः एव परमं ब्रह्म !!

(पटाक्षेपः)

## अभ्यासः

1. निर्देशानुसारं रूपाणि परिवर्त्य यथोदाहरणं लिखत –

| पदानि | विभक्तिः | प्रथमान्तरूपाणि एवं परिवर्तयत | | |
|---|---|---|---|---|
| आचार्य ! | सम्बोधनप्रथमा | आचार्यः | (ष.वि) ए.व | आचार्यस्य |
| भवन्तः | प्रथमा | भवन्तः | (स.वि) ब.व | भवत्सु |
| मित्राणि | ............ | ............ | (प.वि) ब.व | .......... |

www.thearyasamaj.org



| | | | | |
|---|---|---|---|---|
| मन्दमतीनां | ............ | ............ | (तृ.वि) ब.व | ............ |
| विषये | ............ | ............ | (द्वि.वि) ए.व | ............ |
| वयं | ............ | ............ | (च.वि) ब.व | ............ |
| एतं | ............ | ............ | (ष.वि) ए.व | ............ |
| मम | ............ | ............ | (स.वि) ए.व | ............ |
| जनाः | ............ | ............ | (द्वि.वि) ब.व | ............ |
| बुद्धिमत्तां | ............ | ............ | (प्र.वि) ब.व | ............ |
| पथिकः | ............ | ............ | (द्वि.वि) ए.व | ............ |
| गुरुः | ............ | ............ | (तृ.वि) ए.व | ............ |
| एतेषु | ............ | ............ | (च.वि) ब.व | ............ |
| भवतां | ............ | ............ | (प.वि) ब.व | ............ |
| विश्वासः | ............ | ............ | (ष.वि) ए.व | ............ |
| गुरोः | ............ | ............ | (स.वि) ए.व | ............ |

### 2. निर्देशानुसारं यथोदाहरणं वाक्यानि परिवर्तयत –

उदा.– दश शिष्याः प्रविशन्ति। (लोट् लकारे) — दश शिष्याः प्रविशन्तु।

1. सर्वे आगताः किम् ?(लट्) ........................
2. वयम् इदानीं गच्छामः। (ए.व.) ........................
3. परन्तु अन्यदेकं कार्यं सूचयामि। (प्र.पु.) ........................
4. सायङ्काले प्रत्यागच्छन्तु। (लट्) ........................
5. अन्वेषणं करोति। (म.पु.) ........................
6. सज्जाः भवन्ति। (लोट्) ........................

### 3. एतानि अव्ययपदानि उपयुज्य वाक्यानि रचयत–

1. अपि – ........................................................
2. अद्य – ........................................................
3. आम् – ........................................................

www.thearyasamaj.org

4. परन्तु - ..........................................................................
5. तत्र - ..........................................................................
6. एव - ..........................................................................
7. इदानीम् - ..........................................................................
8. न - ..........................................................................
9. खलु - ..........................................................................
10. कुत्र - ..........................................................................

4. अङ्कैः संख्यां लिखत-

| | |
|---|---|
| एकम् - | षट् - |
| द्वे - | सप्त - |
| त्रीणि - | अष्ट - |
| चत्वारि - | नव - |
| पञ्च - | दश - |

5. पाठात् क्त्वान्तानि, ल्यबन्तानि च अव्ययानि चित्वा वाक्यानि रचयत -

1. ..........................................................................
2. ..........................................................................
3. ..........................................................................
4. ..........................................................................

6. यथोदाहरणं क्रियापदं विभज्य वाक्यानि पुनः लिखत -

उदा - कार्यं सूचयामि। - कार्यस्य सूचनां करोमि।
1. वयम् इदानीं गच्छामः। - .......................................।
2. गुरुः गणयति। - .......................................।
3. कार्यं परिशीलयामः। - .......................................।
4. दशमम् अन्वेषयति। - .......................................।
5. निरूपकः नेपथ्ये कथयति। - .......................................।

www.thearyasamaj.org



# परिशिष्टम्

अकारान्तः पुंलिङ्गः 'राम' शब्दः

| | ए.व. | द्विव. | ब.व. |
|---|---|---|---|
| प्र.वि. | रामः | रामौ | रामाः |
| संप्र.वि. | हे राम | हे रामौ | हे रामाः |
| द्वि.वि. | रामम् | रामौ | रामान् |
| तृ.वि. | रामेण | रामाभ्याम् | रामैः |
| च.वि. | रामाय | रामाभ्याम् | रामेभ्यः |
| पं.वि. | रामात् | रामाभ्याम् | रामेभ्यः |
| ष.वि. | रामस्य | रामयोः | रामाणाम् |
| स.वि. | रामे | रामयोः | रामेषु |

इकारान्तः पुंलिङ्गः 'हरि' शब्दः

| ए.व. | द्विव. | ब.व. |
|---|---|---|
| हरिः | हरी | हरयः |
| हे हरे | हे हरी | हे हरयः |
| हरिम् | हरी | हरीन् |
| हरिणा | हरिभ्याम् | हरिभिः |
| हरये | हरिभ्याम् | हरिभ्यः |
| हरेः | हरिभ्याम् | हरिभ्यः |
| हरेः | हर्योः | हरीणाम् |
| हरौ | हर्योः | हरिषु |

उकारान्तः पुंलिङ्गः 'गुरु' शब्दः

| ए.व. | द्विव. | ब.व. |
|---|---|---|
| गुरुः | गुरू | गुरवः |
| हे गुरो | हे गुरू | हे गुरवः |
| गुरुम् | गुरू | गुरून् |
| गुरुणा | गुरुभ्याम् | गुरुभिः |
| गुरवे | गुरुभ्याम् | गुरुभ्यः |
| गुरोः | गुरुभ्याम् | गुरुभ्यः |
| गुरोः | गुर्वोः | गुरूणाम् |
| गुरौ | गुर्वोः | गुरुषु |

ऋकारान्तः पुंलिङ्गः 'कर्तृ' शब्दः

| ए.व. | द्विव. | ब.व. |
|---|---|---|
| कर्ता | कर्तारौ | कर्तारः |
| हे कर्तः | हे कर्तारौ | हे कर्तारः |
| कर्तारम् | कर्तारौ | कर्तॄन् |
| कर्त्रा | कर्तृभ्याम् | कर्तृभिः |
| कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः |
| कर्तुः | कर्तृभ्याम् | कर्तृभ्यः |
| कर्तुः | कर्त्रोः | कर्तॄणाम् |
| कर्तरि | कर्त्रोः | कर्तृषु |

ऋकारान्तः पुंलिङ्गः 'पितृ' शब्दः

| ए.व. | द्विव. | ब.व. |
|---|---|---|
| पिता | पितरौ | पितरः |
| हे पितः | हे पितरौ | हे पितरः |
| पितरम् | पितरौ | पितॄन् |
| पित्रा | पितृभ्याम् | पितृभिः |
| पित्रे | पितृभ्याम् | पितृभ्यः |
| पितुः | पितृभ्याम् | पितृभ्यः |
| पितुः | पित्रोः | पितॄणाम् |
| पितरि | पित्रोः | पितृषु |

आकारान्तः स्त्रीलिङ्गः 'रमा' शब्दः

| ए.व. | द्विव. | ब.व. |
|---|---|---|
| रमा | रमे | रमाः |
| हे रमे | हे रमे | हे रमाः |
| रमाम् | रमे | रमाः |
| रमया | रमाभ्याम् | रमाभिः |
| रमायै | रमाभ्याम् | रमाभ्यः |
| रमायाः | रमाभ्याम् | रमाभ्यः |
| रमायाः | रमयोः | रमाणाम् |
| रमायाम् | रमयोः | रमासु |

www.thearyasamaj.org

इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः

| ए.व. | द्विव. | ब.व. |
|---|---|---|
| मतिः | मती | मतयः |
| हे मते | हे मती | हे मतयः |
| मतिम् | मती | मतीः |
| मत्या | मतिभ्याम् | मतिभिः |
| मत्यै / मतये | मतिभ्याम् | मतिभ्यः |
| मत्याः / मतेः | मतिभ्याम् | मतिभ्यः |
| मत्याः / मतेः | मत्योः | मतीनाम् |
| मत्याम् / मतौ | मत्योः | मतिषु |

उकारान्तः स्त्रीलिङ्गः 'धेनु' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| धेनुः | धेनू | धेनवः |
| हे धेनो | हे धेनू | हे धेनवः |
| धेनुम् | धेनू | धेनूः |
| धेन्वा | धेनुभ्याम् | धेनुभिः |
| धेन्वै / धेनवे | धेनुभ्याम् | धेनुभ्यः |
| धेन्वाः / धेनोः | धेनुभ्याम् | धेनुभ्यः |
| धेन्वाः / धेनोः | धेन्वोः | धेनूनाम् |
| धेन्वाम् / धेनौ | धेन्वोः | धेनुषु |

ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| माता | मातरौ | मातरः |
| हे मातः | हे मतरौ | हे मातरः |
| मातरम् | मातरौ | मातॄः |
| मात्रा | मातृभ्याम् | मातृभिः |
| मात्रे | मातृभ्याम् | मातृभ्यः |
| मातुः | मातृभ्याम् | मातृभ्यः |
| मातुः | मात्रोः | मातॄणाम् |
| मातरि | मात्रोः | मातृषु |

ईकारान्तः स्त्रीलिङ्गः 'गौरी' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| .गौरी | गौर्यौ | गौर्यः |
| हे गौरि | हे गौर्यौ | हे गौर्यः |
| गौरीम् | गौर्यौ | गौरीः |
| गौर्या | गौरीभ्याम् | गौरीभिः |
| गौर्यै | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौर्योः | गौरीणाम् |
| गौर्याम् | गौर्योः | गौरीषु |

ऊकारान्तः स्त्रीलिङ्गः 'वधू' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| वधूः | वध्वौ | वध्वः |
| हे वधु | हे वध्वौ | हे वध्वः |
| वधूम् | वध्वौ | वधूः |
| वध्वा | वधूभ्याम् | वधूभिः |
| वध्वै | वधूभ्याम् | वधूभ्यः |
| वध्वोः | वधूभ्याम् | वधूभ्यः |
| वध्वाः | वध्वोः | वधूनाम् |
| वध्वाम् | वध्वोः | वधूषु |

अकारान्तः नपुंसकलिङ्गः 'ज्ञान' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| हे ज्ञान | हे ज्ञाने | हे ज्ञानानि |
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| ज्ञानात् | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| ज्ञाने | ज्ञानयोः | ज्ञानेषु |

www.thearyasamaj.org



### अकारान्तः नपुंसकलिङ्गः 'वारि' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| वारि | वारिणी | वारीणि |
| हे वारि | हे वारिणी | हे वारीणि |
| वारि | वारिणी | वारीणि |
| वारिणा | वारिभ्याम् | वारिभिः |
| वारिणे | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिणोः | वारीणाम् |
| वारिणि | वारिणोः | वारिषु |

### उकारान्तः नपुंसकलिङ्गः 'मधु' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| मधु | मधुनी | मधूनि |
| हे मधो | हे मधुनी | हे मधूनि |
| मधु | मधुनी | मधूनि |
| मधुना | मधुभ्याम् | मधुभिः |
| मधुने | मधुभ्याम् | मधुभ्यः |
| मधुनः | मधुभ्याम् | मधुभ्यः |
| मधुनः | मधुनोः | मधूनाम् |
| मधुनि | मधुनोः | मधुषु |

### दकारान्तः त्रिलिङ्गः 'अस्मद्' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| अहम् | आवाम् | वयम् |
| माम् / मा | आवाम् / नौ | अस्मान् / नः |
| मया | आवाभ्याम् | अस्माभिः |
| मह्यम् / मे | आवाभ्याम् / नौ | अस्मभ्यम् / नः |
| मत् | आवाभ्याम् | अस्मत् |
| मम / मे | आवयोः / नौ | अस्माकम् / नः |
| मयि | आवयोः | अस्मासु |

### दकारान्तः त्रिलिङ्गः 'युष्मद्' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| त्वम् | युवाम् | यूयम् |
| त्वाम् / त्वा | युवाम् / वाम् | युष्मान् / वः |
| त्वया | युवाभ्याम् | युष्माभिः |
| तुभ्यम् / ते | युवाभ्याम् / वाम् | युष्मभ्यम् / वः |
| त्वत् | युवाभ्याम् | युष्मत् |
| तव / ते | युवयोः / वाम् | युष्माकम् / वः |
| त्वयि | युवयोः | युष्मासु |

### अकारान्तः पुंलिङ्गः 'सर्व' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| सर्वः | सर्वौ | सर्वे |
| हे सर्व | हे सर्वौ | हे सर्वे |
| सर्वम् | सर्वौ | सर्वान् |
| सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्य | सर्वयोः | सर्वेषाम् |
| सर्वस्मिन् | सर्वयोः | सर्वेषु |

### अकारान्तः स्त्रीलिङ्गः 'सर्वा' शब्दः

| ए.व. | द्वि.व. | ब.व. |
|---|---|---|
| सर्वा | सर्वे | सर्वाः |
| हे सर्वे | हे सर्वे | हे सर्वाः |
| सर्वाम् | सर्वे | सर्वाः |
| सर्वया | सर्वाभ्याम् | सर्वाभिः |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वयोः | सर्वासाम् |
| सर्वस्याम् | सर्वयोः | सर्वासु |

www.thearyasamaj.org

### मकारान्तः पुंलिङ्गः 'किम्' शब्दः

| | | |
|---|---|---|
| कः | कौ | के |
| कम् | कौ | कान् |
| केन | काभ्याम् | कैः |
| कस्मै | काभ्याम् | केभ्यः |
| कस्मात् | काभ्याम् | केभ्यः |
| कस्य | कयोः | केषाम् |
| कस्मिन् | कयोः | केषु |

### मकारान्तः स्त्रीलिङ्गः 'किम्' शब्दः

| | | |
|---|---|---|
| का | के | काः |
| काम् | के | काः |
| कया | काभ्याम् | काभिः |
| कस्यै | काभ्याम् | काभ्यः |
| कस्याः | काभ्याम् | काभ्यः |
| कस्याः | कयोः | कासाम् |
| कस्याम् | कयोः | कासु |

### मकारान्तः नपुंसकलिङ्गः 'किम्' शब्दः

| | | |
|---|---|---|
| किम् | के | कानि |
| किम् | के | कानि |
| केन | काभ्याम् | कैः |
| कस्मै | काभ्याम् | केभ्यः |
| कस्मात् | काभ्याम् | केभ्यः |
| कस्य | कयोः | केषाम् |
| कस्मिन् | कयोः | केषु |

### मकारान्तः पुंलिङ्गः 'इदम्' शब्दः

| | | |
|---|---|---|
| अयम् | इमौ | इमे |
| इमम् (एनम्) | इमौ (एनौ) | इमान्(एनान्) |
| अनेन (एनेन) | आभ्याम् | एभिः |
| अस्मै | आभ्याम् | एभ्यः |
| अस्मात् | आभ्याम् | एभ्यः |
| अस्य | अनयोः(एनयोः) | एषाम् |
| अस्मिन् | अनयोः(एनयोः) | एषु |

### मकारान्तः स्त्रीलिङ्गः 'इदम्' शब्दः

| | | |
|---|---|---|
| इयम् | इमे | इमाः |
| इमाम्(एनाम्) | इमे (एने) | इमाः(एनाः) |
| अनया(एनया) | आभ्याम् | आभिः |
| अस्यै | आभ्याम् | आभ्यः |
| अस्याः | आभ्याम् | आभ्यः |
| अस्याः | अनयोः(एनयोः) | आसाम् |
| अस्याम् | अनयोः(एनयोः) | आसु |

### दकारान्तः पुंलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| सः | तौ | ते |
| तम् | तौ | तान् |
| तेन | ताभ्याम् | तैः |
| तस्मै | ताभ्याम् | तेभ्यः |
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्य | तयोः | तेषाम् |
| तस्मिन् | तयोः | तेषु |

www.thearyasamaj.org



दकारान्तः नपुंसकलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| तत् | ते | तानि |
| तत् | ते | तानि |
| तेन | ताभ्याम् | तैः |
| तस्मै | ताभ्याम् | तेभ्यः |
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्य | तयोः | तेषाम् |
| तस्मिन् | तयोः | तेषु |

दकारान्तः पुंलिङ्गः 'एतद्' शब्दः

| | | |
|---|---|---|
| एषः | एतौ | एते |
| एतम् | एतौ | एतान् |
| एतेन | एताभ्याम् | एतैः |
| एतस्मै | एताभ्याम् | एतेभ्यः |
| एतस्मात् | एताभ्याम् | एतेभ्यः |
| एतस्य | एतयोः | एतेषाम् |
| एतस्मिन् | एतयोः | एतेषु |

दकारान्तः नपुंसकलिङ्गः 'एतद्' शब्दः

| | | |
|---|---|---|
| एतत् | एते | एतानि |
| एतत् | एते | एतानि |
| एतेन | एताभ्याम् | एतैः |
| एतस्मै | एताभ्याम् | एतेभ्यः |
| एतस्मात् | एताभ्याम् | एतेभ्यः |
| एतस्य | एतयोः | एतेषाम् |
| एतस्मिन् | एतयोः | एतेषु |

मकारान्तः नपुंसकलिङ्गः 'इदम्' शब्दः

| | | |
|---|---|---|
| इदम् | इमे | इमानि |
| इदम् (एनत्) | इमे(एने) | इमानि(एनानि) |

**शेषं पुंलिङ्गवत्**

दकारान्तः स्त्रीलिङ्गः 'तद्' शब्दः

| | | |
|---|---|---|
| सा | ते | ताः |
| ताम् | ते | ताः |
| तया | ताभ्याम् | ताभिः |
| तस्यै | ताभ्याम् | ताभ्यः |
| तस्याः | ताभ्याम् | ताभ्यः |
| तस्याः | तयोः | तासाम् |
| तस्याम् | तयोः | तासु |

दकारान्तः स्त्रीलिङ्गः 'एतद्' शब्दः

| | | |
|---|---|---|
| एषा | एते | एताः |
| एताम् | एते | एताः |
| एतया | एताभ्याम् | एताभिः |
| एतस्यै | एताभ्याम् | एताभ्यः |
| एतस्याः | एताभ्याम् | एताभ्यः |
| एतस्याः | एतयोः | एतासाम् |
| एतस्याम् | एतयोः | एतासु |

तकारान्तः पुंलिङ्गः 'भवत्' शब्दः

| | | |
|---|---|---|
| भवान् | भवन्तौ | भवन्तः |
| हे भवन् | भवन्तौ | भवन्तः |
| भवन्तम् | भवन्तौ | भवतः |
| भवता | भवद्भ्याम् | भवद्भिः |
| भवते | भवद्भ्याम् | भवद्भ्यः |
| भवतः | भवद्भ्याम् | भवद्भ्यः |
| भवतः | भवतोः | भवताम् |
| भवति | भवतोः | भवत्सु |

*एवमेव 'महत्, ज्ञानवत्' इत्यादयः शब्दाः।*

**श्रेयः परमवाप्स्यथ**

www.thearyasamaj.org



# उत्तराणि

9.2.1. पाण्डवानां धनञ्जयः। 2. नक्षत्राणां शशी। 3. वेदानां सामवेदः। 4. इन्द्रियाणां मनः। 5. रुद्राणां शङ्करः। 6. भूतानां चेतना। 7. मासानां मार्गशीर्षः। 8. अक्षराणाम् अकारः।

3. 1. महर्षीणाम् 2. स्थावराणाम् 3. वृक्षाणाम् 4. देवर्षीणाम् 5. गजेन्द्राणाम् 6. आयुधानाम् 7. सर्पाणाम् 8. नागानाम् 9. पितॄणाम् 10. विद्यानाम्

10.1.1. बलरामस्य शिष्यः दुर्योधनः। दुर्योधनस्य गुरुः बलरामः। 2. हरेः पत्नी लक्ष्मीः। लक्ष्म्याः पतिः हरिः। 3. जमदग्नेः पत्नी रेणुका। रेणुकायाः पतिः जमदग्निः। 4. अभिमन्योः माता सुभद्रा। सुभद्रायाः पुत्रः अभिमन्युः।

2. 1. हास्तिनपुरस्य 2. रवेः 3. वेणोः 4. मुनेः 5. लतायाः 6. गुरोः 7. बुद्धेः 8. मातुः 9. वस्तुनः

3.1. बलरामस्य सोदरः। 2. कुचेलस्य मित्रम्। 3. मीरायाः स्वामी। 4. देवक्याः पुत्रः। 5. रुक्मिण्याः पतिः। 6. मथुरायाः राजा।

4.1. पत्रिकायाः नाम सन्देशः। 2. पत्रिकायाः नाम चन्दामामा। 3. ब्रह्मवादिन्याः नाम गार्गी। 4. ब्रह्मवादिन्याः नाम मैत्रेयी। 5. वाद्यस्य नाम 6. वाद्यस्य नाम

5. 1. हस्तयोः 2. गुर्वोः 3. भ्रात्रोः 4. सेनयोः 5. कव्योः 6. भगिन्योः 8. पाण्डवानाम् 9. भारतीयानाम् 10. अस्माकम् 11. नदीनाम् 12. भाषाणाम्

6. 1. मेघानाम् 2. नाटकानाम् 3. देवानाम् 4. सूक्तीनाम् 5. धेनूनाम् 6. वस्तूनाम् 7. कार्यकर्तॄणाम् 8. गुरूणाम् 9. वाद्यानाम् 10. अपत्यानाम्

7. 1. महापुरुषाणाम् 2. कवीनाम् 3. वचनानाम् 4. मित्रयोः 5. नियमानाम् 6. कार्यकर्तॄणाम् 7. मतीनाम् 8. नदीनाम् 9. धेनूनाम् 10. गुरूणाम्

8.1. लवस्य पितामही कौसल्या। 2. कुशस्य मातामहः जनकः। 3. कुशस्य मातामही सुमेधा। 4. दशरथस्य पौत्रः लवः। 5. जनकस्य दौहित्रः कुशः। 6. लक्ष्मणस्य भ्रातृजाया सीता। 7. सीतायाः देवरः लक्ष्मणः। 8. अर्जुनस्य श्यालः धृष्टद्युम्नः। 9. रुक्मिण्याः ननान्दा सुभद्रा। 10. अर्जुनस्य पितृव्यः धृतराष्ट्रः। 11. दुर्योधनस्य मातुलः शकुनिः। 12. कंसस्य भागिनेयः कृष्णः। 13. अर्जुनस्य पितृव्या गान्धारी। 14. अभिमन्योः मातुलानी रुक्मिणी।

10.1. शौर्यस्य 2. ज्ञानस्य 3. कुलस्य, विनयः 4. वित्तस्य 5. अक्रोधः 6. बलवताम् 7. धर्मस्य, निर्व्याजता 8. सर्वेषाम्

11. 2. क्षमायाः फलं शान्तिः। 3. उद्वेगस्य फलं सन्तापः। 4. आशायाः फलं दुःखम्। 5. भक्तेः फलं भगवदनुग्रहः। 6. द्वेषस्य फलं मनस्तापः। 7. शुचितायाः फलं आरोग्यम्। 8. परोपकारस्य फलं पुण्यम्। 9. सेवायाः फलं मनःशान्तिः। 10. परिश्रमस्य फलं साफल्यम्।

11.2. 1. पुरतः 2. अन्तः 3. पुरतः, पृष्ठतः 4. उपरि, अधः

13.5.1. आम्, अहं फलं प्राप्नोमि। 2. आम्, वयं गीतां जानीमः। 3. आम्, वयं पाठं शृणुमः। 4. आम्, वयं श्लोकान् चिनुमः। 5. आम्, अहं गीतासारं जानामि। 6. आम्, आवां गीतपुस्तकं गृह्णीवः। 7. आम्, अहं कार्यं कर्तुं शक्नोमि। 8. आम्, आवां जीवनलक्ष्यं प्राप्नुवः। 9. आम्, वयं गीतायाः कण्ठस्थीकरणं कुर्मः। 10. आम्, वयं पुष्पाणि चेतुं शक्नुमः।

8.1. सारथयः अश्वान् बध्नन्ति। 2. कातराः योद्धुं न शक्नुवन्ति। 3. मुनयः मनः निगृह्णन्ति। 4. योगिजनाः ब्रह्माग्नौ जुह्वति। 5. मानवाः सिद्धिम् आप्नुवन्ति। 6. नेतारः आह्वानं शृण्वन्ति। 7. देवाः वरं ददति। 8. गुरवः ध्यानं कुर्वन्ति। 9. स्वधर्मकर्तारः किल्बिषं न आप्नुवन्ति। 10. योद्धारः शस्त्रं चिन्वन्ति।

13.9.1. जानीतः 2. क्रीणीतः 3. गृह्णीतः 4. कुरुतः 5. शृणुतः 6. शक्नुतः 7. चिनुतः 8. रुदितः 9. प्राप्नुतः 10. दत्तः

11.1. आरोहति 2. नयति 3. करोति 4. ददाति 5. हसति 6. चलति 7. उपविशति 8. विशति 9. वहति 10. वितरति 11. रक्षति 12. त्यजति 13. स्नाति 14. आकर्षति 15. उत्तिष्ठति 16. वसति 17. शक्नोति 18. वदति 19. अवतरति 20. वाति 21. प्रक्षालयति

15.3. 2. त्रायते 3. मन्यध्वे 4. वीक्षेते 5. भाषेते 6. मोदन्ते 7. वन्दे 8. कामयामहे 9. वर्तन्ते 10. लभसे

4.1. तौ नितरां मोदेते। 2. त्वम् आचार्यम् उपसङ्गच्छसे। 3. यूयं संस्कृतेन भाषध्वे। 4. भवन्तौ स्पर्धेथे। 5. कौ युद्धात्

www.thearyasamaj.org

पलायेते ? 6. आवां धर्मरक्षणम् अपेक्षावहे। 7. युवां चमूं वीक्षेथे। 8. ते स्यन्दने विराजन्ते। 9. भवन्तः युद्धं लभन्ते। 10. त्वं महीं भुङ्क्षे। 11. तौ विषयान् उपसेवेते। 12. वयं भगवतः मार्गम् अनुवर्तामहे।

16.2. सन्मार्गम् अनुसरतु। सहयोगं ददातु। प्रकृतिं पश्यतु। संस्कृतं लसतु। ध्येयं स्मरतु। भारतं जयतु।

3.1. करोतु 2. भवतु 3. शृणोतु 4. प्राप्नोतु 5. सम्पादयतु 6. त्यजतु 7. साधयतु 8. प्रदर्शयतु 9. निर्मातु 10. सृजतु

8.1. यूयम् 2. भवन्तः 3. अहम् 4. आवाम् 5. युवाम् 6. यूयम् 7. भवान् 8. यूयम् 9. वयम् 10. आवाम् 11. त्वम् 12. त्वम् 13. त्वम् 14. भवन्तः 15. वयम् 16. त्वम् 17. वयम् 18. त्वम् 19. भवन्तः 20. त्वम्

10. 1. क्षमस्व 2. मोदताम् 3. भजस्व 4. निन्द 5. जहि 6. वीक्षै 7. रमताम् 8. सहस्व 9. रक्षानि 10. हन्तु

12. भवत, तिष्ठ, कुरुत, नयतु, धरत, रचय, तिष्ठन्तु, तिष्ठतु, कुरुत, गच्छतु, आरोहन्तु, गृह्णन्तु, मर्दयन्तु, कुर्वन्तु, अनुसरन्तु, पालयन्तु, क्षिपन्तु, पतन्तु, प्रापयत, भवाम, करवाम।

17.1.1. एकम् 2. षोडश 3. एकः 4. दश 5. द्वे 6. चत्वारः ............

18.2.2.हृदयस्य 3. रथस्य 4. इन्दियाणाम् 5.गीतामृतस्य 6. दुःशशासनस्य 7. शकुनेः 8. इन्द्रियाणाम् 9. वस्त्राणाम् 10. ईश्वरस्य 11. पापस्य 12. श्लोकस्य

3. 2. परिचिन्तनं करोति 3. बोधनं करोति 4. पानं करोति 5. प्रक्षालनं करोति 6. निर्गमनं करोति 7. प्रवेशं कुरुथ 8. परिभ्रमणं करोति 9. अनुसरणं करोति 10. स्मरणं करोति 11. छेदनं करोति 12. अभिनन्दनं करोति 13. आवरणं करोति 14. स्तवनं कुर्वन्ति 15. शोषणं करोति 16. संग्रहणं करोति 15. गानं करोषि।

4. 1. दहति 2. संगृह्णीमः 3. अधिगच्छति 4. जीवथ 5. चिन्तयतः 6. अन्विष्यावः 7. परिहरन्ति 8. छिनत्ति 9. भ्रमति 10. अर्जयति।

5.1. इतिहासस्य 2. देवतानाम् 3. वस्त्रस्य 4. ज्ञानस्य 5. सारथेः 6. रथस्य 7. हृदयानाम् 8. कार्यक्रमाणाम्

19. 2.1. कुरुक्षेत्रे 2. मञ्चे 3. हिमगिरौ 4. पुराणेषु 5. तडागे 6. युद्धभूमौ 7. गुहासु 8. अग्निपुराणे 9. केदारेषु 10. जले 11. कादम्बर्याम् 12. नीडेषु 13. जानुनि 14. खे 15. देहे 16. सद्भावे 17. बुद्धौ 18. पृथिव्याम् 19. संसिद्धौ 20. शुचौ 21.कार्याकार्यव्यवस्थितौ 22. समाधौ 23. ब्राह्मणे, श्वपाके, गवि 24. हृद्देशे 25. आपत्तिषु 26. चम्वाम् 27. क्षित्याम् 28. तेजोराशौ

3. स्यूतयोः, हस्तयोः, तूणीरयोः, इतिहासयोः, अयनयोः, सेनयोः, कूप्योः, पादयोः।

4. कन्दरेषु, गुल्मेषु, गुहासु, तरुषु, लतासु, बिलेषु, वल्मीकेषु, शाखासु।

5. गीतायाम्, स्वधर्मे, गुरौ, संस्कृतौ / संस्कृत्याम्, कार्ये, मातरि, संस्कृते, परधर्मे।

6.1. लोभे 2. त्यागे 3. कीर्त्याम् 4. साधने 5. पठने 6.यज्ञे 7. मात्सर्ये 8. धृत्याम् 9. सत्सङ्गे 10. पुण्ये 11. पापे 12. भोगे 13. शान्त्याम्

8. 1. वक्षःस्थले 2. केशेषु 3. मस्तके 4. पादयोः 5. उदरे 6. कण्ठे।

9.1. कर्णः – धनुर्विद्यायाम् 2. दुर्योधनः – गदायुद्धे 3. नलः – पाककलायाम् 4. विदुरः – नीतिशास्त्रे 5. शकुनिः – द्यूतक्रीडायाम् 6. बृहन्नला–वीणावादने 7. नकुलः – अश्वशिक्षायाम् 8. मयः शिल्पकलायाम्

21.1. 2. ह्यः सोमवासरः आसीत्। 3. परह्यः भानुवासरः आसीत्। 3. प्रपरह्यः शनिवासरः आसीत् 1 4. श्वः बुधवासरः भविष्यति। 5. परश्वः गुरुवासरः भविष्यति। 6. प्रपरश्वः शुक्रवासरः भविष्यति।

2.1. सोमवासरः कदा आसीत् ? 2. भानुवासरः कदा आसीत् ? 3. शनिवासरः कदा आसीत् ? 4. बुधवासरः कदा भविष्यति ? 5. गुरुवासरः कदा भविष्यति ? 6. शुक्रवासरः कदा भविष्यति ?

5.1. गतवान् 2. गतवान् 3. श्रुतवन्तः 4. पठितवान् 5. प्राप्तवान् 6. आनीतवान् 7. प्राप्तवान् 8. दत्तवान् 9. आगतवान् 10. श्रुतवान् 11. स्थितवन्तः 12. कृतवन्तौ 13. आचरितवन्तः 14. युद्धवन्तः 15. ईक्षितवन्तः।

8.1. संजयः 2. अर्जुनः 3. उत्साहम् 4. कृष्णः 5. अर्जुनस्य 6. धृतराष्ट्रः

9.1. जानाति स्म। 2. खादति स्म। 3.करोति स्म। 4. दर्शयति स्म। 5. युद्ध्यते स्म। 6. रचयति स्म। 7. इच्छन्ति स्म 8. ब्रूते स्म 9. भाषते स्म 10. लोकन्ते स्म।

www.thearyasamaj.org

23.2.1. कति जनाः निबिडवनं प्रविष्टवन्तः ? 2. कः प्रथमः प्रहरी सन् स्थितवान् ? 3. कः मल्लयुद्धार्थम् आहूतवान् ? 4. कृष्णः कथं युद्धम् आरब्धवान् ? 5. कृष्णः पिशचं कुत्र बद्धवान् ? 6. कृष्णः कुतः पिशाचं निष्कासितवान् ?

3.1. गुडाकेशः 2. प्रगतिः 3. आनकः 4. ततम् 5. शुचिः 6. हृषीकम्।

4.1. शुद्धम् 2. अशुद्धम् 3. अशुद्धम् 4. शुद्धम् 5. अशुद्धम् 6. शुद्धम्

24. 4. 2.अन्वसरत् 3. न्यक्षिपत् 4. व्यलिखत् 5. व्यस्मरत् 6. पर्यपालयत् 7. प्राविशत् 8. पर्यहरत् 9. प्रायच्छत् 10. समतरत् 11. प्रावर्तत 12.व्यसृजत् 13. अध्यगमत् 14. प्रापद्यत 15. प्रण्यपतत् 16. प्रावर्तत।

5. 1. प्रहृतवान् 2. उपदिष्टवान् 3. उपविष्टवान् 4. अवज्ञातवन्तः 5. प्रोक्तवान् 6. प्रणिपतितवान् 7. समवाप्तवान् 8. निबद्धवन्तः।

25. 3. 2.गुरुम् 3. शिष्यम् 4. मन्दमतिम् 5. सद्गुणम् 6. ऋषीन् 7. मातरम् 8. व्यूहान् 9. जयम् 10. लाक्षागृहम्।

5.2. अश्वौ 3. सिद्धिम् 4. युद्धवार्ताम् 5. भगवद्गीताम् 6. पुष्पितवाणीम् 7. प्रज्ञावादान् 8. गुरून् 9. प्रवृत्तिम् 10.शास्त्रविधिम् 11.विजयम् 12. इन्द्रियाणि 13. प्रज्ञाम् 14. शङ्खौ 15. सेनाः 16. देवान् 17. विषयम् 18. पृथिवीम् 19. कुरून् 20. हरिम् 21. पितॄन् 22. चमूम्।

9.2. तडागम् 3.सूर्यम् 4. स्वाध्यायम् 5. त्वाम् 6. कुल्याम् 7. उपवनम् 8. कविम् 9. योद्धारम् 10. नासिकाम् 11. एताम् 12. विषयम् 13. भारतपङ्कजम्।

10. 2. नदीम् 3. मातरम् 4. जिह्वाम् 5. सृतिम् 6. मन्दिरम् 7. पुष्पाणि 8. धेनुम् 9. यज्ञकुण्डम् 10. गुडम् 11. जलम् 12. अभ्यासं 13 श्रद्धां 14. सङ्गं 15. यागं 16. वायुम्।

11.1. भीष्मम् उभयतः पाण्डवाः सन्ति। 2.तूणीरम् ईषू 3.सूर्यम् 4. गदाम् 5. कृष्णम् 6. यागाश्वम्।

26.1. 1.कौरवाः पाण्डावाः च। 2. धृष्टद्युम्नः 3. असंख्याः 4. द्रुपदस्य 5. भीष्मः 6. पार्थ, अत्र समवेतान् सर्वान् कुरून् पश्य इति। 7. कृष्णः 8. अज्ञाननिवारणार्थम् 9. शङ्खान्, भेरीः, पणवान्, आनकान्, गोमुखान् च वादितवन्तः। 10. विश्वरूपदर्शनेन 11. विश्वरूर्पम् 12. कौरवाः बान्धवाः इति कारणेन। 13. पितॄन्, पितामहान्, आचार्यान्, मातुलान्, भ्रातॄन्, पुत्रान्, पौत्रान्, सखीन्, श्वशूरान्, सुहृदश्च दृष्टवान्। 14. युद्धार्थम् उपस्थितान् सर्वान् द्रष्टुम्

2.1. षष्ठी/द्वि.व. 2. सप्तमी/एक.व. 3. द्वितीया/बहु.व. 4. तृतीया/एक.व. 5. षष्ठी/बहु.व. 6. चतुर्थी/एक.व. 7. प्रथमा एक.व. 8. सप्तमी/एक.व. 9. द्वितीया/बहुं.व. 10. द्वितीया/बहु.व.

3. उक्तवान् (✓), आसन् (✓) कृतवन्तः (✓) कुरु (X) द्रष्टुम् (X) स्थापय (X) आसीत् (✓) चिन्तय (X) प्राप्तवान् (✓) कृत्वा (X), इच्छामि (X) कृतवान् (✓) दर्शितवान् (✓) उपविष्टवान् (✓) स्थापयित्वा (X) पश्य (X), करोमि (X) अनुशोचति (X), अस्मि (X) विसृज्य (X) वादितवन्तः (✓) अभवत् (✓) मारितवान् (✓) भव (X) उक्त्वा (X)

4. द्वितीया – युद्धम्, सिंहनादम्, शङ्खनादम्, शङ्खान्, भेरीः, पणवान्, आनकान्, गोमुखान्, श्रीकृष्णम्, षष्ठी – कौरवाणाम्, पाण्डवनाम्, स्वस्य, रथस्य, सेनयोः, मम, तस्य, श्रीकृष्णस्य, अर्जुनस्य।

सप्तमी – कुरुक्षेत्रभूमौ, रथे, फले, कर्मकरणे, फलविषये।

27.1.1. कृष्णः कदा अवतरिष्यति। 2. तौ गीताचार्यं नंस्यतः। 3. यूयं भक्तियोगं पठिष्यथ। 4. योगिनः तत्त्वं द्रक्ष्यन्ति। 5. वयम् अतः परं न भविष्यामः 6. यूयं स्वनिमित्तमेव पाठं करिष्यथ। 7. शस्त्राणि जीवचैतन्यं न छेत्स्यन्ति। 8. आवां गीतां श्रोष्यावः। 9. त्वं पापं न अनुभविष्यसि। 10. कृष्णार्जुनौ सम्भाषणं करिष्येते। 11. वयं कुरुक्षेत्रं गमिष्यामः। 12. आवां सैन्यविन्यासं द्रक्ष्यावः। 13. कौरवाः पृथक् –पृथक् शङ्खान् ध्मास्यन्ति। 14. युवां ध्यानेन हृदये ईश्वरं द्रक्ष्यथः।15. यूयं निमित्तमात्रं भविष्यथ। 16. लेके दैवम् , असुरम् इति द्वौ विभागौ भविष्यथः। 17. योगिनः कथं कार्यं करिष्यन्ति। 18. नराः अनिच्छन्तः पापं चरिष्यन्ति। 19. भवन्तः अनुद्वेगकरं वाक्यं वदिष्यन्ति। 20. यूयं कर्मयोगाभ्यासं करिष्यथ।

28. 2. 1. कां 2. कौ 3. काभिः 4. किं 5. कुत्र

www.thearyasamaj.org

29. 2 द्वारकायाः, प्राग्जोतिषाम् , पाञ्चालदेशात् ,
अङ्गदेशात् , कोसलात् , कलिङ्गात् , मगधात् ,
मद्रदेशात् , काम्बोजदेशात् , माहिष्मत्याः, हास्तिनपुरात्,
चेदिदेशात् , अवन्त्याः, इन्द्रप्रस्थात्, गान्धारात्,
केकयात्, सिन्धुदेशात् ।

3. गान्धारात् , काश्याः , काम्बोजात् , नागक्षेत्रात् ,
पाञ्चालात् , मद्रदेशात् , कुण्डिननगरात् ।

4. विषयध्यानात् – सङ्गात् – कामात् – क्रोधात् –
सम्मोहात् – स्मृतिविभ्रमात् –बुद्धिनाशात् ।

5.1. हस्तात् 2. स्वर्गात् 3. मुखपद्मात् 4. बालात्
5. शुकात् 6. चक्रव्यूहात् 7. वैशम्पायनसरोवरात्
8. कर्णाभ्याम् 9. नदीभ्यः 10.देशेभ्यः
11. द्वारकायाः 12. द्वैतवनात् । 13. इन्द्रात्
14. काश्याः 15. अग्नेः

6. शिवात् , अग्नेः , इन्द्रात् , पञ्चजनात् ,शन्तनोः,
कर्णात् , परशुरामात् , देवेभ्यः, यक्षात् , बलरामात् ।

7.1. प्रकोष्ठात् 2. गृहात् 3. बालिकायाः
4. पञ्चवादनात् 5. बाल्यकालात् 6. पौषमासात्
7. सायंकालात् 8. दुष्टेभ्यः 9. चेरेभ्यः 10. शत्रुभ्यः
11. संङ्कटेभ्यः 12. चैत्रात् 13. शनिवासरात्
14. परिश्रमात् 15. संस्कृतपाठनात् 16. बिडालात्
17. अल्पात् 17. कस्मात्

32. 1. 1. शीघ्रम् 2. सम्यक् 3. शीघ्रम् 4. उच्चैः
5. मन्दम् 6. उच्चैः 7. सम्यक् 8. सम्यक् 9 .शनैः
10. शीघ्रम्

33.1. 2. स्थित्वा 3. दृष्ट्वा 4. रचयित्वा 5. नीत्वा
6. गीत्वा 7. नत्वा 8. दत्वा 9. स्मृत्वा 10. धावित्वा
11.कर्तयित्वा 12. चालयित्वा 13. खादित्वा 14.
चोरयित्वा 15. त्यक्त्वा 16. पूरयित्वा 17. वर्णयित्वा
18. कथयित्वा 19. चलित्वा 20. भक्षयित्वा

33.3.2. उक्त्वा 3. जित्वा 4. दृष्ट्वा 5. दत्त्वा 6. पृष्ट्वा
7. ज्ञात्वा 8. श्रुत्वा 9. त्यक्त्वा 10. स्मृत्वा
11. लब्ध्वा 12. भुक्त्वा 13. योजयित्वा 14. मृत्वा
15. कृत्वा 16. त्रात्वा 17. भूत्वा 18. कृत्वा
19. अर्चित्वा 20. त्यक्त्वा

34.2.1. पश्यति 2. शृणोति 3. करोति 4. जानाति 5.
गच्छति 6. हसति 7. करोमि

35.2. 2. आनीय 3. संप्रेष्य 4.विज्ञाय 5. उद्धृत्य
6.समाप्य 7. विचार्य 8. उद्घाट्य 9. प्रविश्य
10. आहूय 11. संहृत्य 12. परिवेष्य 13. उत्थाय

3. 2. परित्यज्य 3. संस्मृत्य 4. उपसङ्गम्य 5. संयम्य
6. आवेश्य 7. आदाय 8. अभ्यर्च्य 9. विमृश्य
10. उपविश्य 11. संन्यस्य 12. उपाश्रित्य 13. विज्ञाय
14. प्रणम्य 15. आदाय 16. संहृत्य

4. 1. उपसङ्गम्य 2. श्रुत्वा 3. भूत्वा 4. विनद्य 5. ज्ञात्वा
6. गत्वा 7. उक्त्वा 8. दृष्ट्वा 9. ध्मात्वा 10. स्थित्वा
11. त्यक्त्वा 12. हत्वा 13. अवेक्ष्य 14. त्यक्त्वा
15. लब्ध्वा 16. छित्वा

37. 3.1. अश्वाभ्याम् 2. मित्राभ्याम् 3. बन्धुभ्याम् 4. गुरुभ्याम्
5. पौत्राभ्याम् 6. भ्रातृभ्याम् 7. मूर्तिभ्याम् 8. धेनुभ्याम्
9. मातृभ्याम् 10. पुत्रीभ्याम्

4.1.सारथये, सारथिभ्यः 2. वटवे, वटुभ्यः 3.सूनवे
(शिशुभ्यः), सूनुभ्यः (शिशुभ्यः) 4. भोक्त्रे,भोक्तृभ्यः
5. कर्त्रे, कर्तृभ्यः 6. कवये, कविभ्यः 7. जन्तवे, जन्तुभ्यः
8. व्यक्तये, व्यक्तिभ्यः 9. अध्येत्रे, अध्येतृभ्यः 10. श्रोत्रे,
श्रोतृभ्यः

5. 1. ताभ्यः 2. ताभ्याम् 3. तस्यै 4. एतस्मै 5. कस्मै
6. सर्वेभ्यः 7. मह्यम्

39.1.1. हस्तेन 2. रथेन3. कशया 4. गदया 5. वंश्या
6. वेत्रेण 7. चक्रेण

2. 2. पत्रैः 3.वेदमन्त्रैः 4. दिव्यनेत्रेण 5. गदया
6. नेत्राभ्याम् 7. पादैः 8. कमलैः 9. द्रोणीभिः
10. खड्गेन

4. 1. इषुभिः 2. गदाभ्याम् 3. रज्जुभिः 4. हर्षामर्षभयोद्वेगैः
5. अभ्यासयोगेन 6. चक्राभ्याम् 7. हलेन 8. शङ्खैः
9. शरैः 10. राज्येन 11. पक्षाभ्याम् 12.लेखनीभिः

5. 2. नदीभ्याम् 3. क्रतुभिः 4. आदित्यैः 5. सृत्या
6. मित्राभ्याम् 7. हयैः 8. नारीभ्याम् 9. शराभ्याम्
10. वज्रेण

6. 1. काभ्याम् 2. काभिः 3. केन 4. कया 5. काभ्याम्
6. कया 7. काभ्याम् 8. केन 9. काभ्याम् 10. केन 11. कैः
12. कया 13. केन 14. केन 15. काभ्याम् 16. कया
17. काभिः 18. केन 19. कया

8. 1. तैः 2. तया 3. तैः 4. तेन 5. तेन 6. तया 7. तैः

www.thearyasamaj.org

## शीर्षकाणां मूलश्लोकाः

| पाठ संख्या | शीर्षकम् | मूलश्लोकभागः | श्लोकसंख्या |
|---|---|---|---|
| 1. | विद्धि माम् | उच्चैश्रवसमश्वानां विद्धि माम् अमृतोद्भवम् । | 10.27 |
| 2. | पुरुषः सः | पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । | 8.22 |
| 5. | को भवान् ? | आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद । | 11.31 |
| 6. | न करोति | शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते । | 13.31 |
| 7. | नास्ति बुद्धिः अयुक्तस्य | नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना । | 2.66 |
| 8. | तत्र का परिदेवना ? | अव्यक्तनिधनान्येव तत्र का परिदेवना । | 2.28 |
| 9. | अहं सर्वस्य प्रभवः | अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । | 10.8 |
| 10. | तस्य तस्याचाला श्रद्धा | तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । | 7.21 |
| 11. | अथ पृष्ठतस्ते | नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व । | 11.40 |
| 12. | मा ते सङ्गोऽस्तु | मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि । | 2.47 |
| 13. | न शोचति न कांक्षति | यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति । | 12.17 |
| | | ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । | 18.54 |
| 16. | उत्तिष्ठ, यशो लभस्व | तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् । | 11.33 |
| 17. | पञ्चैतानि महाबाहो | पञ्चैतानि महाबाहो कारणानि निबोध मे । | 18.13 |
| 19. | स्वधर्मे निधनं श्रेयः | स्वधर्मे निधनं श्रेयः परधर्मो भयावहः । | 3.35 |
| 22. | किमकुर्वत सञ्जय ! | मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय । | 1.1 |
| 24. | संशयात्मा विनश्यति | अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति । | 4.40 |
| 25. | योगक्षेमं वहाम्यहम् | तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् । | 9.22 |
| 27. | करिष्ये वचनं तव | स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव । | 18.73 |
| 29. | गाण्डीवं स्रंसते हस्तात् | गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते । | 1.30 |
| 32. | शनैः शनैः उपरमेत् | शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया । | 6.25 |
| 33. | त्यक्त्वोत्तिष्ठ परन्तप ! | क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप । | 2.3 |
| 36. | आत्मैव आत्मनो बन्धुः | आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः । | 6.5 |
| 37. | दिव्यं ददामि ते चक्षुः | दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् । | 11.8 |
| 39. | असङ्गशस्त्रेण दृढेन छित्त्वा | अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा । | 15.3 |
| 40. | न त्वं शोचितुम् अर्हसि | तथापि त्वं महाबाहो नैवं शोचितुमर्हसि । | 2.26 |
| 41. | अतः अस्मि लोके | अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः । | 15.18 |
| 42. | हे कृष्ण ! हे माधव ! | सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति । | 11.41 |

www.thearyasamaj.org

# संस्कृताय भवन्तः कृपया अधोनिर्दिष्टेषु पञ्चविंशत्यां कार्येषु कानिचन पञ्च कार्याणि कुर्वन्तु

१. 'वदतु संस्कृतम्' इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीत्वा पञ्चभ्यः जनेभ्यः ददातु ।
२. 'पत्राचारद्वारा संस्कृतशिक्षणम्' इति योजनायां पञ्च शिक्षार्थिनः योजयतु ।
३. सम्भाषणसन्देशपत्रिकायाः पञ्च ग्राहकान् सङ्गृह्णातु ।
४. पञ्चभ्यः जनेभ्यः संस्कृतभारत्यै धनसहयोगराशिं सङ्गृह्य ददातु ।
५. संस्कृतभारत्याः पञ्च पुस्तकानि क्रेतुं पञ्च जनान् प्रेरयतु ।
६. पञ्चसु स्थानेषु सम्भाषणशिबिराणाम् आयोजने साहाय्यं करोतु ।
७. वर्षे पञ्च दिनानि संस्कृतप्रचारकार्याय ददातु ।
८. पञ्चविधानि प्रचारपत्रकाणि मुद्राप्य ददातु ।
९. पञ्च संश्लेषकान् कारयित्वा मुद्राप्य च ददातु ।
१०. पञ्च संस्कृतशुभाशयपत्राणि कारयित्वा / मुद्रयित्वा ददातु ।
११. पञ्चसु विद्यालयेषु संस्कृतच्छात्रेभ्यः दानाय पञ्च पुरस्कारान् ददातु ।
१२. Pride of India इत्यस्य पुस्तकस्य पञ्च प्रतिकृतीः क्रीणातु विक्रीणतां वा ।
१३. पञ्चसु मन्दिरेषु संस्कृतभारत्याः प्रचारफलकानि स्थापयतु ।
१४. पञ्चानां प्रभावि-प्रतिष्ठित-जनानां कृते संस्कृतभारत्याः परिचयं कारयतु ।
१५. प्रचारार्थं पञ्च वस्त्रफलकानि कारयित्वा ददातु ।
१६. पञ्चानां विद्यालयानां ग्रन्थालयेभ्यः संस्कृतभारत्याः पुस्तकानां गुच्छान् ददातु ।
१७. प्रतिदिनं पञ्च रूप्यकाणि संस्कृतप्रचारकार्याय दानरूपेण दानपात्रे स्थापयतु ।
१८. प्रतिदिनं पञ्चभिः जनैः सह किञ्चित् किञ्चित् संस्कृतसम्भाषणं करोतु ।
१९. पञ्च जनान् संस्कृतं पाठयतु ।
२०. प्रतिसप्ताहं पञ्च नूतनजनान् दूरभाषया सम्पर्क्य संस्कृतभारतीं परिचाययतु ।
२१. संस्कृतकार्ये सहयोगाय पञ्च संस्थाः प्रेरयतु ।
२२. संस्कृतकार्यविषये पञ्च लेखान् लिखतु ।
२३. पञ्चभ्यः जनेभ्यः संस्कृतविषये पत्राणि लिखतु ।
२४. पञ्चसु स्थानेषु संस्कृतविषये, संस्कृतभारत्याः विषये च भाषणं करोतु ।
२५. उपायनदानसमये पञ्चसु प्रसङ्गेषु संस्कृतपुस्तकानि ददातु ।

www.thearyasamaj.org








# सम्भाषणसन्देशः

(बहुवर्णरञ्जिता संस्कृतमासपत्रिका)

सरला भाषा । सुलभावगमनयोग्या ललिता शैली । कथा, विज्ञानं, भाषापाठनं, भाषाभ्यासः, राष्ट्रियचिन्तनं, शब्दसम्पत्तिः, सामयिकविचारः, आधुनिकाः वार्ताः इत्यादयः । अन्येऽपि बहवः लेखाः ।

वार्षिकं ग्राहकशुल्कम् - रू. ११०/-
द्वैवार्षिकं ग्राहकशुल्कम् - रू. २१०/-
त्रैवार्षिकं ग्राहकशुल्कम् - रू. ३००/-

ग्राहकशुल्कं धनादेश(M.O)द्वारा डिमाण्ड् ड्राफ्ट्(D.D) द्वारा वा अधस्तनसङ्केताय प्रेषयन्तु -

**Sambhashana Sandeshah**
'Aksharam', 8th Cross, 2 Phase
Girinagar, Bangalore - 560 085
Ph : (080) 26722576 / 26721052
E mail - samskritam@gmail.com


संस्कृतभारती
देहली

ISBN 978-81-87276-44-4
रू. १५०.००